CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

शास्त्रिदुर्गाशङ्करसंस्कृतग्रन्थमालायाः कर्मकाण्डविभागे षष्ठं पुष्पम् ।

॥ अथ शुक्लयजुर्वेदीयग्रहशान्तिप्रयोगः ॥

सिद्धपद (सिद्धपुर) निवासिना ठाकरोपाह्वविद्वद्वर्य-उमाशङ्करतनुजनुषा श्रीवालुकेश्वरसंस्कृतवैदिकपाठशालाप्रधानाध्यापकेन दुर्गाशङ्करशास्त्रिणा लोकोपकृतये सङ्गृह्य टिप्पण्यादिभिः समलङ्कृत्य परिशोध्य प्रकाशितः ॥

शकाब्दाः १८६० विक्रमाब्दाः १९९५ खिस्ताब्दाः १९३८

॥ सिद्धपुरे कृतवसतिर्मैनोमाशङ्कराङ्गसम्भूतः । दुर्गाशङ्करशास्त्री ग्रहशान्तिं मुद्रयामास ॥

अस्य पुनर्मुद्रणे सर्वेऽधिकारा राजशासनानुसारेण प्रकाशयित्रा स्वायत्तीकृताः सन्ति ॥

द्वितीयावृत्तिः ।

मूल्यं ~~सम्प्रति~~ रु १।२

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गीर्वाणविद्याभूषण
शास्त्री दुर्गाशङ्कर उमाशङ्कर शर्मा ।

॥ अथ सद्गुरुवर्यश्रीचेतना.. दप्रशस्तिः ॥

चिदेव सर्वं चितिभासमानं चितो विभिन्नं न हि किञ्चिदस्ति ॥ समस्तलोकानिति बोधयन्तं तं चेतनानन्दगुरुं भजेऽहम् ॥ १ ॥ आनन्दमानन्दकरं प्रमोदं मोदप्रदं सौख्यमयं सुतोषम् ॥ अद्वैतमाद्यन्तविहीनमेकं तं चेतनानन्दगुरुं भजेऽहम् ॥ २ ॥ सदयहृदयकान्तं पूज्यमानं सुसभ्यै-र्ग्रथितललितपद्यैर्वर्ण्यमानं कवीन्द्रैः ॥ भुवि वितरणलक्ष्मीं प्रीतिपूर्वं दधानं परमगुरुमहं तं चेतना-नन्दमीडे ॥ ३ ॥ मुखकमलसुधांशोर्वाक्सुधां प्रस्रवन्तं जनहितशुभकार्योत्तारणाग्रस्थितं यम् ॥ निजगुणगणकीर्त्यान्तर्गतं सज्जनानां परमगुरुमहं तं चेतनानन्दमीडे ॥ ४ ॥ ददतमतिसहायं दीन-गार्वाणवाण्यां स्वयमतिशयहर्षादुत्सुकेभ्यः शिशुभ्यः॥ सविनयनयदात्रीमार्यवाचं वहन्तं परमगुरुमहं तं चेतनानन्दमीडे ॥ ५ ॥ सततममरवाणीशोभिविद्वज्जनानां स गुरुरिव सुराणां शोभमानः सभा-याम् ॥ निजनिकटगतांस्तान्सत्पथे योजयन्तं परमगुरुमहं तं चेतनानन्दमीडे ॥ ६ ॥ अतिशयचप-लानामिन्द्रियाख्याधराणामचपलमतिदुर्गे दुर्जयानामरीणाम् ॥ नगवदचलचित्तं सत्यमात्रैकनिष्ठं परमगुरुमहं तं चेतनानन्दमीडे ॥ ७ ॥ प्रबलगुणगणानामेकपात्रं धरायां प्रशमितदुरितानां भाजनं मङ्गलानाम् ॥ जगति निखिलजन्तुश्रेयसे यत्नवन्तं परमगुरुमहं तं चेतनानन्दमीडे ॥ ८ ॥ सतत-मभिसरन्तं सत्पथे नीतियुक्तं हरचरणसरोजे सर्वदैवैकचित्तम् ॥ सुकविरचितकाव्योद्यानमध्ये वसन्तं परमगुरुमहं तं चेतनानन्दमीडे ॥९॥ यस्मादाप्ता विद्याऽज्ञानतमोनाशिनी मया शिष्टात् ॥ दुर्गाशङ्करनामा तस्यार्ङ्घ्रिसरोरुहौ ह्यहं नौमि ॥ १० ॥ इति सद्गुरुवर्यश्रीचेतनानन्दप्रशस्तिः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीभाइशङ्करराज्जातः स उमाशङ्करो द्विजः ॥ पिता मे सुकृती जन्मप्रदाता गुरुरादिमः ॥१॥
शुक्लोपाह्वमहानन्दतनयो देवशङ्करः ॥ दीक्षागुरुर्द्वितीयोऽगात्पश्चाद्भूत्वा यतिर्दिवम् ॥ २ ॥ वेदान्तादिबृहद्ग्रन्थां सरहस्यामुपादिशत् ॥
गुरुः श्रीचेतनानन्दब्रह्मचारी तृतीयकः ॥३॥ एतां गुरुत्रयीं स्मृत्वा दुर्गाशङ्करशास्त्रिणा ॥ ग्रहशान्तिर्वैदिकीयं यथामति विरच्यते ॥४॥
श्रमोऽयं क्रियते नूनं परोपकृतये मया ॥ स्याद्व्यूनमिह यत्किञ्चित्क्षन्तव्यं तत्स्वयं बुधैः ॥ ५ ॥

अथ वैदिकग्रहशान्तिप्रयोगप्रारम्भः ॥ कृतमङ्गलस्नानः स्वलङ्कृतः सम्भृतमङ्गलसम्भारः कृतनिर्णेजनान्तपञ्चमहायज्ञान्तनित्यक्रियः परिहिताहतसोत्तरीयवासा यजमानो मङ्गलरङ्गवल्लीमण्डितशुद्धस्थले श्रीपर्ण्यादिप्रशस्तदारुनिर्मिते कुशोत्तरकम्बलाद्यास्तृते स्वासने ऊर्णवस्त्राच्छादिते पीठे प्राङ्मुख उपविश्य पत्नीं स्वदक्षिणतः प्राङ्मुखीमुपवेशयेत् ॥

शिखाबन्धनम्-मानस्तोक इति मन्त्रस्य कुत्सऋषिःजगतीछन्दःएकोरुद्रोदेवताशिखाबन्धनेविनियोगः॥ॐमानस्तोकेतनयेमानुऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषः॥मानोवीरान्रुद्रभामिनोवधीर्हविष्मन्तःसदमित्त्वाहवामहे॥१२॥इत्यनुष्टमात्रांशिखांनैर्ऋत्यांबध्नीयात्॥

पवित्रधारणम्—सव्यहस्ते कुशत्रयं दक्षिणहस्ते कुशद्वयं धारयेत्—ॐपुवित्रेस्थोवैष्णव्यौसवितुर्वः÷प्रसवऽउत्पुनाम्यच्छिद्रेण पुवित्रेणसूर्य्यस्यरश्मिभिः÷ ॥ ११/१ ॥ तस्यतेपवित्रपतेपुवित्रपूतस्ययत्कामः पुनेतच्छकेयम् ॥ ४/१ ॥ अनामिकयोरेकैकं पवित्रं धारयेत् ॥

आचमनम्—ॐकेशवायनमः स्वाहा॥ ॐनारायणायनमः स्वाहा॥ ॐमाधवायनमः स्वाहा॥हस्तप्रक्षालनम्—ॐगोविन्दायनमः॥

प्राणायामः—प्रणवस्य परब्रह्मऋषिः। परमात्मादेवता। दैवी गायत्री छन्दः। भूरादिसप्तव्याहृतीनां विश्वामित्रजमदग्निभरद्वाजगौतमात्रिवसिष्ठकश्यपा ऋषयः। अग्निवायुसूर्यबृहस्पतिवरुणेन्द्रविश्वेदेवादेवताः। गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्यश्छन्दांसि।तत्सवितुरित्यस्य विश्वामित्रऋषिः। सविता देवता। गायत्रीछन्दः। आपोज्योतिरित्यस्य प्रजापतिर्ऋषिः। ब्रह्माग्निवायुसूर्यादेवताः। यजुश्छन्दः।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding: IKS-MoE-Grant-2

सर्वेषां प्राणायामे विनियोगः ॥ ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ॥ धियो यो नः॒ प्रचोदयात् ॥ ३५ ॥ ॐ आपोज्योतीरसोमृतं ब्रह्मभूर्भुवः स्वरोम् ॥ एवं पूरकः कुम्भकः रेचकः क्रमेण त्रिवारं पठेत् ॥

यजमानललाटे तिलकं कुर्यात्—ॐ स्वस्तिनऽइन्द्रोवृद्धश्रवाः स्वस्तिनः॒ पूषाविश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु ॥ ३६ ॥ खस्तिस्तु याऽविनाशाख्या पुण्यकल्याणवृद्धिदा । विनायकप्रिया नित्यं वरदाऽस्तु सदा तव ॥

भद्रसूक्तं पठेत्—ॐ आनो भद्राः क्रतवो यन्तु विश्वतोदब्धासोऽअपरीतासऽउद्भिदः॒ ॥ देवानो यथा सदमिद्वृधेऽअसन्नप्रायुवोरक्षितारो दिवेदिवे ॥ ३७ ॥ देवानां भद्रा सुमतिर्ऋजूयतां देवानाꣳ रातिरभि नो निवर्त्तताम् ॥ देवानाꣳ सख्यमुपसेदिमा वयं देवा नऽआयुः प्रतिरन्तु जीवसे ॥ ३८ ॥ तान्पूर्वयानिविदाहूमहेवयम्भगंमित्रमदितिन्दक्षमस्रिधम् ॥ अर्य्यमणंवरुणꣳसोममश्विनासरस्वतीनः॒ सुभगामयस्करत् ॥ ३९ ॥ तन्नोवातोमयोभुवातु भेषजन्तन्मातापृथिवीतत्पिताद्यौः ? ॥ तद्ग्रावाणः॒ सोमसुतोमयोभुवस्तदश्विनाशृणुतन्धिष्ण्यायुवम् ॥ ४० ॥ तमीशानञ्जगतस्तस्थुषस्पतिंधियञ्जिन्वमवसेहूमहेवयम् ॥ पूषानोयथावेदसामसद्वृधेरक्षितापायुरदब्धः॒ स्वस्तये ॥ ४१ ॥ स्वस्तिनऽइन्द्रोवृद्धश्रवाः स्वस्तिनः॒ पूषाविश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु ॥ ४२ ॥ पृषदश्वामरुतः पृश्निमातरः शुभयावानोविदथेषुजग्मयः ॥ अग्निजिह्मानऊः सूरचक्षसोविश्वेनोदेवाऽअवसागमन्निह ॥ ४३ ॥ भद्रङ्कर्णेभिः शृणुयामदेवाभद्रम्पश्येमाक्षभिर्य्यजत्राः ॥ स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहिदेवहितंयदायुः॒ ॥ ४४ ॥ शुतमिन्नुशुरदोऽअन्तदेवायत्रानश्चक्राजरसंतनूनाम् ॥ पुत्रासोयत्रपितरोभवन्तिमानोमुद्धारीरिषतायुर्गन्तोः ॥ ४५ ॥ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्मातासपितासपुत्रः ? ॥ विश्वेदेवाऽअदितिः पञ्चजनाऽअदितिर्जातमदितिर्जनित्वम् ॥ ४६ ॥ द्यौः ? शान्तिरन्तरिक्षꣳ शान्तिः॒ पृथिवीशान्तिरापः॒ शान्तिरोषधयः॒ शान्तिः॒ वनस्पतयः॒ शान्तिर्विश्वेदेवाः ? शान्तिर्ब्रह्मशान्तिः॒ सर्वꣳ शान्तिः॒ शान्तिरेवशान्तिः॒ सामाशान्तिरेधि ॥ ४७ ॥ यतोयतः॒ समीहसेततोनोऽअभयङ्कुरु ॥ शन्नः॒ कुरुप्रजाभ्योभयन्नः॒ पशुभ्यः॒ ॥ ४८ ॥ सुशान्तिर्भवतु ॥

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding by MoE-Grant-2

देवतानमस्कारः—श्रीमन्महागणाधिपतये नमः इष्टदेवताभ्यो नमः कुलदेवताभ्यो नमः ग्रामदेवताभ्यो नमः स्थानदेवताभ्यो नमः वाणीहिरण्यगर्भाभ्यां नमः श्रीलक्ष्मीनारायणाभ्यां नमः श्रीउमामहेश्वराभ्यां नमः शचीपुरन्दराभ्यां नमः मातापितृचरण-कमलेभ्यो नमः सर्वेभ्यो देवेभ्यो नमः श्रीगुरुभ्यो नमः परमगुरुभ्यो नमः परमेष्ठिगुरुभ्यो नमः परात्परगुरुभ्यो नमः सर्वेभ्यो ब्राह्मणेभ्यो नमोनमः निर्विघ्नमस्तु ॥ सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः । लम्बोदरश्च विकटो विघ्ननाशो गणाधिपः ॥ धूम्रकेतु-र्गणाध्यक्षो भालचन्द्रो गजाननः । द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥ विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा । सङ्ग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते॥ शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम्। प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये॥ अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः। सर्वविघ्नहरस्तस्मै गणाधिपतये नमः॥ सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके । शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते॥सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम्।येषां हृदिस्थो भगवान्मङ्गलायतनं हरिः॥तदेव लग्नं सुदिनं तदेव तारावलं चन्द्रबलं तदेव । विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि॥ लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः। येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः॥ यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः। तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम॥ सर्वेष्वारम्भकार्येषु त्रयस्त्रिभुवनेश्वराः। देवा दिशन्तु नः सिद्धिं ब्रह्मेशानजनार्दनाः॥ विनायकं गुरुं भानुं ब्रह्मविष्णुमहेश्वरान्। सरस्वतीं प्रणौम्यादौ सर्वकार्यार्थसिद्धये॥

सङ्कल्पः—ॐविष्णुर्विष्णुर्विष्णुः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य ब्रह्मणः द्वितीये परार्द्धे श्रीश्वेत-वाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे प्रथमचरणे भरतवर्षे जम्बुद्वीपे रामक्षेत्रे परशुरामाश्रमे दण्डकारण्यदेशे श्रीगोदावर्याः पश्चिमदिग्भागे श्रीमल्लवणाब्धेरुत्तरेतीरे अमुके श्रीशालिवाहनशके अमुकनामसंवत्सरे तथा अमुके श्रीविक्रमवर्षे अमुकनामसंवत्सरे अमुकायने अमुकर्तौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकनक्षत्रे अमुकराशिस्थिते चन्द्रे अमुक-

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

राशिस्थिते सूर्ये अमुकराशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथायथं राशिस्थानस्थितेषु सत्सु एवं गुणविशेषणविशिष्टायां शुभपुण्यतिथौ ममात्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं ममसुतस्य करिष्यमाण उपनयने ग्रहानुकूलतासिद्ध्यर्थं मण्डपस्थापनपूर्वकंग्रहशान्तिकरिष्ये॥

पुनर्जलमादाय—तदङ्गतया गणपतिपूजनं स्वस्तिपुण्याहवाचनम् अविघ्नपूजनं मण्डपदेवतापूजनं मातृकापूजनं वसोर्द्धारा-पूजनम् आयुष्यमन्त्रजपं नान्दीश्राद्धञ्चाहं करिष्ये॥ पुनर्जलमादाय—तत्रादौ दिग्रक्षणं कलशार्चनं च करिष्ये।

दिग्रक्षणम्—वामहस्ते गौरसर्षपान्गृहीत्वा—ॐरुक्षोहणोंवल्गुहनं वैष्णवीमिदमुहन्तं वल्गुमुत्किरामि यम्मेनिष्ट्योयमुमात्यो निचुखानेदमुहन्तंवल्गुमुत्किरामियम्मेसमानोयमसमानोनिचुखानेदमुहन्तं वल्गुमुत्किरामियम्मे सबन्धुर्यमसबन्धुर्निचुखानेदमुहन्तं वल्गुमुत्किरामियम्मेसजातोयमसजातोनिचुखानोत्कृत्याङ्किरामि॥३३/४॥रुक्षोहणोंवोवल्गुहनुदंष्मोक्षामिवैष्णवान्त्रक्षोहणोंवोवल्गुहनो-वंनयामिवैष्णवान्त्रक्षोहणोंवोवल्गुहनोवंस्तृणामि वैष्णवान्त्रक्षोहणौ वांवल्गुहनुाऽउपदधामिवैष्णवीरक्षोहणौवांवल्गुहनौपर्ष्णीहामि वैष्णवीवैष्णवमंसिवैष्णवास्थं ॥३५॥ रक्षसांभागोसिनिरस्तंरक्षऽइदमुहंरक्षोभितिष्ठामीदमुहंरक्षोवबाधऽइदमुहंरक्षोधुमन्तमो-नयामि॥घृतेनद्यावापृथिवीप्रोर्णुवायांवायोवेस्तोकानांमुग्धिराज्यस्यवेतुस्वाहाज्यस्वाहाकृतेऽऊर्द्ध्वंनभसम्मारुतङ्गच्छतम्॥३६/१॥ रुक्षोहा ब्रिश्वचर्षणिरुभियोनिमयोहते॥ द्रोणेसुधस्थमासदत्॥३६/२॥अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः। ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया॥ अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम्। सर्वेषामवरोधेन ग्रहशान्तिं समारभे॥ यदत्र संस्थितं भूतं स्थानमाश्रित्य सर्वतः। स्थानं त्यक्त्वा तु तत्सर्वं यत्रस्थं तत्र गच्छतु॥ भूतप्रेतपिशाचाद्या अपक्रामन्तु राक्षसाः। स्थानादस्माद्व्रजन्त्वन्यत्स्वीकरोमि ध्रुवं त्विमाम्॥ भूतानि राक्षसा वापि येऽत्र तिष्ठन्ति केचन। ते सर्वेऽप्यपगच्छन्तु ग्रहशान्तिं करोम्यहम्॥एतैर्मन्त्रैः सर्वदिक्षु विकिरेत्।

---

१ अथवा करिष्यमाणे मम सुतस्य विवाहे अथवा सुतायाः विवाहे। इत्थं कर्मानुसारेणोच्चारणम्॥ २॥ यदि ग्रहशान्तिकरणपूर्वदिने मण्डप-स्थापनं कृतं चेदत्र मण्डपस्थापनपूर्वकम् इति न वाच्यं केवलं ग्रहशान्तिं करिष्ये इत्येवोहः कार्यः॥

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding by MoE-Grant-2

भैरवनमस्कारः—तीक्ष्णदंष्ट्र महाकाय कल्पान्तदहनोपम । भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि ॥ वामपादतलपार्श्वेन भूमिं त्रिः प्रहृत्य उदकस्पर्शः ॥

---

१ उदकस्पर्शनिर्णयः॥ कात्यायनः—रौद्रं राक्षसमासुरमाभिचारणिकं मन्त्रमुक्त्वा पित्र्यमात्मानं चालम्योपस्पृशेदपः॥ अत्र चकारग्रहणात् तद्वैवतं कर्म कृत्वेति कर्कोपाध्यायादयः सर्वे कल्पसूत्रभाष्यकारा व्याख्यातवन्तः ॥ हेमाद्रौ याज्ञवल्क्योपि—रौद्रंपित्र्यासुरान्मन्त्रांस्तथा चैवाभिचारकान् । व्याहृत्यालम्भ्य चात्मानमपःस्पृष्ट्वाऽन्यमाचरेत्॥अपामुपस्पर्शनम् आचमनमिति हेमाद्रिणा व्याख्यातं लिङ्गात्॥ प्राङ्मुतिष्ठन्नप उपस्पृशतीति प्रवृत्य तेन पूतिरन्तरतो मेध्या वा आपो मेध्यो भूत्वा व्रतमुपायानीति॥ आलम्भमात्रं वा आचमनानुपदेशात्तस्य च नैमित्तिकत्वाच्छन्दसामर्थ्याच्च ॥ अप उपस्पृशतीति लिङ्गमर्थवादमात्रं दीक्षास्नानवदिति कर्कः ॥ छन्दोगपरिशिष्टे कात्यायनः—पित्र्यमन्त्रानुद्रवणे आत्मालम्भे ह्यवेक्षणे । अधोवायुसमुत्सर्गे प्रहासेऽनृतभाषणे ॥ मार्जारमूषकस्पर्शे ह्याक्रुष्टे क्रोधसम्भवे । निमित्तेष्वेषु सर्वत्र कर्म कुर्वन्नपः स्पृशेत्॥ अनुद्रवणमुच्चारणम् ॥ आत्मालम्भो हृदयस्पर्शः ॥ अवेक्षणमपि तस्यैव ॥ अत्र पित्र्यमन्त्रोच्चारणात्मालम्भावेक्षणानि यज्ञादौ विहितान्येव प्राङ्मणि न लौकिकानि॥प्रहासे महति हासे न स्मितमात्रे॥ मार्जारस्य मार्जारकृत एव॥ स्वयंकृते तु स्नानस्योक्तत्वादित्युक्तमाचारादर्शे ॥ आक्रुष्टे परुषभाषणे ॥ क्रोधसम्भवो मानसिकोपि ॥ हेमाद्रौ बृहस्पतिनाप्येवमेवोक्तम् ॥ अपः स्पृशेदित्यनेनापां स्पर्शनमेव विवक्षितं न त्वाचमनमिति भर्तृयज्ञपितृभूतिकर्कोपाध्यायवासुदेवगर्गश्रीअनन्तदेवयाज्ञिकादयः सर्वे कल्पसूत्रभाष्यकारा व्याख्यातवन्तः ॥ संप्रदायादयः पद्धतिकाराश्च ॥ अत्र सर्वेषु वाक्येष्वपः स्पृशेदिति पाठादपःस्पर्शो जलस्पर्श एव याज्ञिकसम्प्रदायाविरुद्धः॥ येषु तु उपस्पृशेदिति पाठस्तत्र तु उपस्पर्शनम् आचमनमित्युक्तमाचारादर्शे ॥ आपस्तम्बः—स्वप्ने क्षवथौ श्वालम्भे लोहितस्य केशानामग्नेर्गवां ब्राह्मणस्य स्त्रियाश्चालम्भे महापथं गत्वा अमेध्यं चोपस्पृश्याप्रयतं च मनुष्यं नीवीं च परिधायाप उपस्पृशेत्॥ हेमाद्रौ मार्कण्डेयपुराणे—श्रुतादौ सम्यगाचामेत्स्पृशेद्वार्द्रतृणादिकम्॥ कुर्वीतालम्भनं वापि दक्षिणश्रवणस्य वै॥यथाविभवतो ह्येतत्पूर्वालाभे ततः परम्॥ न विद्यमाने पूर्वत्र ह्युत्तरप्राप्तिरिष्यते ॥ वसिष्ठः—श्रुते निष्ठीविते सुप्ते परिधानेऽश्रुपातने॥ पञ्चस्वेतेषु चाचामेच्छ्रोत्रं वा दक्षिणं स्पृशेत् ॥ पराशरः—श्रुते निष्ठीविते चैव दन्तश्लिष्टे तथाऽनृते ॥ पतितानां च संभाषे दक्षिणं श्रवणं स्पृशेत्॥ मदनरत्ने बौधायनः—प्रभासादीनि तीर्थानि गङ्गाद्याः सरितस्तथा॥ विप्रस्य दक्षिणे कर्णे सन्तीति मनुरब्रवीत्॥ आदित्यो वरुणः सोमो वह्निर्वायुस्तथैव च ॥ विप्रस्य दक्षिणे कर्णे नित्यं तिष्ठन्ति देवताः॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कलशार्चनम्–स्वबामभागे पूजार्थजलपूरितकलशं संस्थाप्य तत्र वरुणावाहनम्–तत्त्वायामीत्यस्य शुनःशेप ऋषिः त्रिष्टुप्छन्दः वरुणो देवता वरुणावाहने विनियोगः–ॐतत्त्वायामिब्रह्मणावन्दमानुस्तदाशास्तेयजमानोहुविर्भिः ॥ अहेडमानोवरुणेहबोध्युरुशꣳ समानुऽआयुः प्रमोषीः ॥ ५।१।२ ॥ ॐभूर्भुवः स्वः अस्मिन्कलशे वरुणं साङ्गं सपरिवारं सायुधं सशक्तिकꣳ आवाहयामि स्थापयामि ॥ प्रतिष्ठापनम्–ॐमनोजूतिर्ज्जुषतामाज्यंस्पबृहद्यजुर्वातेर्ष्वज्ञमिमन्तनोत्वरिष्टँयज्ञꣳसमिमन्दधातु।विश्वेदेवासऽइहमादयन्तामोꣳम्प्रतिष्ठ॥ ॥ ५।३।२ ॥ ॐवरुणायनमः वरुण सुप्रतिष्ठितो वरदो भव ॥ कलशाभिमन्त्रणपूर्वकदेवतावाहनम्—अनामिकया कलशं स्पृष्ट्वा— कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः । मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥ कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा । ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः । अङ्गैश्च सहिताः सर्वे कलशाम्बुसमाश्रिताः ॥ अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा । आयान्तु देवपूजार्थं दुरितक्षयकारकाः ॥ गङ्गे च यमुने चैव गोदावरि सरस्वति । कावेरि नर्मदे सिन्धो जलेऽस्मिन्सन्निधिं कुरु॥ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवे । तेन सत्येन मे देव तीर्थं देहि दिवाकर॥ पूजनम्–पूर्वे ऋग्वेदाय नमः॥ दक्षिणे यजुर्वेदाय नमः॥पश्चिमे सामवेदाय नमः॥उत्तरे अथर्वणवेदाय नमः॥कलशमध्ये अपाम्पतये वरुणाय नमः॥ कलशाधिष्ठातृदेवताभ्यो नमः ध्यायामि॥कलशाधिष्ठातृदेवताभ्यो नमः आसनार्थे अक्षतान् समर्पयामि॥कलशाधिष्ठातृदेवताभ्यो नमः पाद्यं समर्पयामि॥कलशाधिष्ठातृदेवताभ्यो नमः अर्घं समर्पयामि ॥ कलशाधिष्ठातृदेवताभ्यो नमः आचमनीयं समर्पयामि॥ कलशाधिष्ठातृदेवताभ्यो नमः स्नानं समर्पयामि॥कलशाधिष्ठातृदेवताभ्यो नमः वस्त्रार्थमक्षतान्समर्पयामि ॥ कलशाधिष्ठातृदेवताभ्यो नमः यज्ञोपवीतार्थमक्षतान्समर्पयामि॥ कलशाधिष्ठातृदेवताभ्यो नमः गन्धं समर्पयामि ॥ कलशाधिष्ठातृदेवताभ्यो नमः अक्षतान् समर्पयामि ॥ कलशाधिष्ठातृदेवताभ्यो नमः पुष्पाणि समर्पयामि॥कलशाधिष्ठातृदेवताभ्यो नमः सौभाग्यद्रव्याणि समर्पयामि॥कलशाधिष्ठातृदेवताभ्यो नमः धूपम् आघ्रापयामि॥

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

कलशाधिष्ठातृदेवताभ्यो नमः दीपं दर्शयामि॥ कलशाधिष्ठातृदेवताभ्यो नमः नैवेद्यं निवेदयामि॥ कलशाधिष्ठातृदेवताभ्यो नमः सपूगी-फलताम्बूलं समर्पयामि॥ कलशाधिष्ठातृदेवताभ्यो नमः हिरण्यगर्भदक्षिणां समर्पयामि॥ कलशाधिष्ठातृदेवताभ्यो नमः नीराजयामि॥ मन्त्रपुष्पाञ्जलिः—तत्त्वायामि०॥ कलशाधिष्ठातृदेवताभ्यो नमः मन्त्रपुष्पाञ्जलिं समर्पयामि॥ कलशाधिष्ठातृदेवताभ्यो नमः प्रार्थनापूर्वकं नमस्करोमि ॥ अनया पूजया कलशाधिष्ठातृदेवताः साङ्गाः सपरिवाराः प्रीयन्ताम् ॥ कलशं प्रार्थयेत्—देवदानवसंवादे मथ्यमाने महोदधौ । उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम् ॥ त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः । त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥ शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः । आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ॥ त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः॥ त्वत्प्रसादादिमां पूजां कर्तुमीहे जलोद्भव । सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा॥ अङ्कुशमुद्रया सर्वाणि तीर्थानि ध्यात्वा वं इति धेनुमुद्रया अमृतीकृत्य हूँ इति कवचेनावगुण्ठ्य मत्स्यमुद्रयाऽऽच्छाद्य वंवरुणायनमः इत्यनेनाष्टवारमभिमन्त्र्य तस्मादुदकादुदकं गृहीत्वा स्वात्मानं स्वशिरश्च सम्प्रोक्षेत्—ॐ आपो हिष्ठा० ॥ अग्निरित्यः पवित्रो वा० ॥ पुनः स्वल्पोदकमादाय पूजासम्भारान्सम्प्रोक्ष्य तां च भूमिं सम्प्रोक्ष्य कलशमुद्रां प्रदर्शयेत् ॥ दीपपूजनम्—घृतदीपं प्रज्वाल्य निर्वातस्थले निधाय—ॐअग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा अग्निर्वर्चो मय्यस्तु वर्चस्त्वयि स्वाहा ॥ सुहुसुदाऽअसिसुहवायत्वा ॥ ६३ ॥ ॐभूर्भुवः स्वः दीपस्थदैवतायै नमः आवाहयामि । सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि नमस्करोमि ॥ गणपतिपूजनम्—ताम्रपात्रे सिद्धिबुद्धिसहितं महागणपतिं संस्थाप्य ध्यानम्—उच्चैर्ब्रह्माण्डखण्डद्वितयसहचरं कुम्भयुग्मं दधानं मेद्धं नागारिपक्षप्रतिभटविकट-श्रोत्रतालाभिरामम् ॥ देवं शम्भोरपत्यं भुजगपतितनुस्पर्धिवर्धिष्णुहस्तं ध्याये पूजार्थमीशं गणपतिममलं धीश्वरं कुञ्जरास्यम् ॥ ॐभूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः ध्यायामि ॥ आवाहनम्—ॐगणानान्त्वागणपतिꣳहवामहेप्रियाणान्त्वाप्रिय-पतिꣳहवामहेनिधीनान्त्वानिधिपतिꣳहवामहेवसोमम ॥ आहमजानिगर्भ्भ्यमात्वमजासिगर्भ्भ्यम् ॥६३॥ ॐभूर्भुवः स्वः सिद्धिबुद्धि-

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding by MoE-Grant-2

सहितमहागणपतये नमः गणपतिम् आवाहयामि॥ आसनम्–ॐवर्ष्मोऽस्मिसमानानामुद्यतामिवसूर्यः। इमन्तमभितिष्ठामियोमाकश्चाभिदासति॥ ॐभूर्भुवःस्वः सि० म० आसनं समर्पयामि॥ पाद्यम्–ॐएतावानस्यमहिमातोज्ज्यायाँश्चपूरुषः॥ पादोस्यविश्वाभूतानित्रिपादस्यामृतन्दिवि॥३/१२॥ ॐभूर्भुवः स्वः सि० म० पाद्यं समर्पयामि॥ अर्घम्–ॐधामन्तेविश्वम्भुवनमधिश्रितमुन्त?समुद्रेहृद्यन्तरायुषि॥ अपामनीकेसमिथेयऽआभृतुस्तमश्यामधुमन्तन्तऽऊर्मिम्॥३/३॥ ॐभू० सि० म० अर्घं स०॥ आचमनीयम्–ॐइमम्मेवरुणश्रुधीहवमुद्याचमृडय॥त्वामवस्युराचके॥३/४॥ॐभू० सि० म० आचमनीयं स०॥पयःस्नानम्–ॐपयसोरूपंसद्यवाद्व्योरूपङ्कर्कन्धूनि॥सोमस्यरूपंवाजिनःसौम्यस्यरूपमुमामिक्षा॥३/३॥ ॐभूर्भुवःस्वः सि० म० पयःस्नानं स०। पयःस्नानान्ते शुद्धोदकस्नानं स०। शुद्धोदकस्नानान्ते आचमनीयं स० ॥ दधिस्नानम्–ॐदुधिक्राव्णोऽअकारिषञ्जिष्णोरश्वस्यवाजिनः॥ सुरभिनोमुखाकरत्प्रणऽआयूंऽषितारिषत्॥३/३॥ ॐ भू० सि० म० दधिस्नानं स०। दधिस्नानान्ते शुद्धोदकस्नानं स०। शुद्धोदकस्नानान्ते आचमनीयं स०। घृतस्नानम्–घृतेनाक्तन्तसम्पथोदेवयानान्प्रजानन्वाज्यप्येतुदेवान्॥ अनुत्वासप्तेप्रदिशः॥सचन्ताऽस्वधामुस्मैयजमानायधेहि॥३/४॥ ॐभू० सि०म० घृतस्नानं स०। घृतस्नानान्ते शुद्धोदकस्नानं स०। शुद्धोदकस्नानान्ते आचमनीयं स०॥ मधुस्नानम्–स्वाहामुरुद्धि?परिश्रीयस्वदिव?सुऽस्पृशस्पाहि॥ मधुमधुमधु॥३/३॥ ॐभूर्भुवः स्वः सिद्धिबुद्धिसहितमहागणपतये नमः मधुस्नानं स०। मधुस्नानान्ते शुद्धोदकस्नानं स०। शुद्धोदकस्नानान्ते आचमनीयं स०॥ शर्करास्नानम्–ॐअपाऽरसमुद्वयसूर्ऽसन्तःसमाहितम्॥ अपाऽरसस्ययोरसस्तंवोगृह्णाम्युत्तममुपयामगृहीतोसीन्द्रायत्वाजुष्टंगृह्णाम्येषतेयोनिरिन्द्रायत्वाजुष्टतमम्॥३/१॥ ॐभू० सि० म० शर्करास्नानं स०। शर्करास्नानान्ते शुद्धोदकस्नानं स०। शुद्धोदकस्नानान्ते आचमनीयं स०॥ गन्धोदकस्नानम्–ॐगन्धर्वस्त्वाविश्वावसुऽपरिदधातुविश्वस्यारिष्ट्यैयजमानस्यपरिधिरस्यग्निरिडऽईडित?॥३॥ ॐभू० सि० म० गन्धोदकस्नानं स०। गन्धोदकस्नानान्ते शुद्धोदकस्नानं स०। शुद्धोदकस्नानान्ते आचमनीयं स०॥ उद्वर्तनस्नानम्–ॐअुद्धूनातेऽअुद्धूनु?पृक्ष्यतामरुषापर्ष॥

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE Grant-2

गन्धस्तेसोममवतुमदायुरसोऽअच्युत८॥३॥ॐभू०सि०म० उद्वर्तनस्नानं स०।उद्वर्तनस्नानान्ते शुद्धोदकस्नानं स०। शुद्धोदकस्नानान्ते आचमनीयं स०॥सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्प्य निर्माल्यमुत्तरे विसृज्य अभिषेकः—ॐ नमस्ते गणपतये त्वमेव प्रत्यक्षं तत्त्वमसि त्वमेव केवलं कर्त्तासि त्वमेव केवलं धर्त्तासि त्वमेव केवलं हर्तासि त्वमेव सर्वं खल्विदं ब्रह्मासि त्वं साक्षादात्मासि नित्यम् ऋतं वच्मि सत्यं वच्मि अव त्वं माम् अव वक्तारम् अव श्रोतारम् अव दातारम् अव धातारम् अवानूचानमव शिष्यम् अव पश्चात्तात् अव पुरस्तात् अवोत्तरात्तात् अव दक्षिणात्तात् अव चोर्द्ध्वात्तात् अवाधरात्तात् सर्वतो मां पाहि पाहि समन्तात् त्वं वाङ्मयस्त्वं चिन्मयः त्वमानन्दमयस्त्वं ब्रह्ममयः त्वं सच्चिदानन्दाद्वितीयोसि त्वं प्रत्यक्षं ब्रह्मासि त्वं ज्ञानमयो विज्ञानमयोसि सर्वं जगदिदं त्वत्तो जायते सर्वं जगदिदं त्वत्तस्तिष्ठति सर्वं जगदिदं त्वयि लयमेष्यति सर्वं जगदिदं त्वयि प्रत्येति त्वं भूमिरापोऽनलोऽनिलो नभः त्वं चत्वारि वाक्पदानि त्वं गुणत्रयातीतः त्वम् अवस्थात्रयातीतः त्वं देहत्रयातीतः त्वं कालत्रयातीतः त्वं मूलाधारस्थितोसि नित्यं त्वं शक्तित्रयात्मकः त्वां योगिनो ध्यायन्ति नित्यं त्वं ब्रह्मा त्वं विष्णुस्त्वं रुद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रह्मभूर्भुवः स्वरोम् गणादीन्पूर्वमुच्चार्य वर्णादींस्तदनन्तरम् अनुस्वारः परतरः अर्धेन्दुलसितं तारेण बद्धम् एतत्तव मनुस्वरूपम् गकारः पूर्वरूपम् अकारो मध्यमरूपम् अनुस्वारश्चान्त्यरूपं विन्दुरुत्तररूपं नादः सन्धानं संहिता सन्धिः सैषा गणेशविद्या गणक ऋषिः निचृद्गायत्रीछन्दः गणपतिर्देवता ॐगं गणपतये नमः। एकदन्ताय विद्महे वक्रतुण्डाय धीमहि तन्नो दन्ती प्रचोदयात्॥एकदन्तं चतुर्हस्तं पाशमङ्कुशधारिणम्। रदं च वरदं हस्तैर्विभ्राणं मूषकध्वजम्॥ रक्तं लम्बोदरं शूर्पकर्णकं रक्तवाससम्। रक्तगन्धानुलिप्ताङ्गं रक्तपुष्पैः सुपूजितम्॥ भक्तानुकम्पिनं देवं जगत्कारणमच्युतम्। आविर्भूतं च सृष्ट्यादौ प्रकृतेः पुरुषात्परम्। एवं ध्यायति यो नित्यं स योगी योगिनां वरः॥ नमो व्रातपतये नमो गणपतये नमः प्रमथपतये नमस्ते अस्तु लम्बोदरायैकदन्ताय विघ्ननाशिने शिवसुताय श्रीवरदमूर्तये नमः॥ ॐ अमृताभिषेकोऽस्तु। ॐ भूर्भुवः स्वः सि० म० अभिषेकस्नानं समर्पयामि ॥ शुद्धोदकस्नानम्—ॐ शुद्धवाल८ सुवर्णशुद्धबालोमणिवालुस्तऽआश्विना?

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS:MoE-Grant-2

श्येतं÷श्येताक्षोरुणस्तेऽद्रायंपशुपतयेकुर्ण्णाग्रामाऽअवलिप्तारौद्रानभौरूपाऽपार्ज्जन्या? ॥३३॥ ॐभूर्भुवः स्वः सिद्धिबुद्धिसहितमहा॰ शुद्धोदकस्नानं समर्पयामि॥शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि॥ततो गणेशं वस्त्रेण प्रमृज्य रक्तवस्त्रप्रसारिते मृन्मये पीठे पट्टे वा अरुणाक्षतैर्गोधूमैर्वा कृतेऽष्टदले पद्मे गन्धानुलेपनपूर्वकं संस्थाप्य वस्त्रम्–ॐसुजातोज्ज्योतिषासुहशर्म्मवरूथमासदत्स्वः ÷ ॥ वासोऽ-ग्नेविश्वरूपꣳसंव्ययस्वविभावसो॥३३॥ॐभू॰सि॰म॰वस्त्रं स॰॥वस्त्रान्ते आ॰स॰॥उपवीतम्–यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् । आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः॥ॐभूर्भुवःस्वः सि॰म॰यज्ञो॰समर्पयामि॥यज्ञोपवीतान्ते आ॰स०॥ गन्धम्–ॐत्वाङ्गन्धर्वाऽअखनँस्त्वामिन्द्रस्त्वाम्बृहस्पतिं÷॥त्वामोषधेसोमोराजाबिद्वान्यक्ष्मादमुच्यत॥३३॥ॐभू॰सि॰म॰ गन्धं स०॥ अक्षताः–ॐअक्षन्नमीमदन्तह्यवप्रियाऽअधूषत॥अस्तोषतस्वभानवोविप्रानविष्ठयामतीयोजान्विन्द्रतेहरी॥३३॥ ॐभू॰ सि॰ म॰ अक्ष-तान्स०॥पुष्पाणि–ॐओषधीः प्रतिमोदध्वम्पुष्पवतीः प्रसूवरीः॥अश्वाऽइवसजित्वरीर्वृष्ण÷पारयिष्णव÷॥३३॥ ॐभूर्भुवःस्वः सि॰ म॰ पुष्पाणि स०॥ दूर्वाङ्कुराः–काण्डात्काण्डात्प्ररोहन्तीपरुषःपरुषस्परि॥एवानोदूर्वेप्रतनुसहस्रेणशतेनच॥३३॥ ॐभू॰सि॰म॰ दूर्वा-ङ्कुरान्स०॥सौभाग्यद्रव्याणि–ॐअहिंरिवभोगैः?पर्य्येतिबाहुञ्ज्यायाहेतिम्परिबाधमानः॥हस्तघ्नोविश्वाबयुनानिबिद्वान्पुमान्पुमाꣳसं सुम्परिपातुबिश्वतः÷॥३३॥ ॐ भू॰ सि॰ म॰ सौभाग्यद्रव्याणि स॰ ॥ धूपः–ॐअश्वंस्यत्वावृष्णं÷शुक्राधूपयामिदेवयजनेपृथिव्या?। मुखायत्वामुखस्यत्वाशीर्ष्णे॥अश्वंस्यत्वावृष्णं÷शुक्राधूपयामिदेवयजनेपृथिव्या? । मुखायत्वामुखस्यत्वाशीर्ष्णे॥ अश्वंस्यत्वावृष्णं÷ शुक्राधूपयामिदेवयजनेपृथिव्या?।मुखायत्वामुखस्यत्वाशीर्ष्णे॥मुखायत्वामुखस्यत्वाशीर्ष्णे॥मुखायत्वामुखस्यत्वाशीर्ष्णे॥मुखायत्वामुखस्यत्वाशीर्ष्णे॥३३॥ ॐभू॰सि॰म॰धूपमाघ्रापयामि॥ दीपः–ॐचन्द्रमाऽअप्स्वन्तरासुपर्णोधावतेदिवि॥रयिम्पिशङ्गम्बहुल-म्पुरुस्पृहꣳहरिरेतिकनिक्रदत्॥३३॥ ॐभू॰सि॰म॰दीपं दर्शयामि॥ नैवेद्यम्–अन्नपतेन्नस्यनोदेह्यनमीवस्यशुष्मिणः÷॥प्रप्रदातारन्तार-षिषऽऊर्ज्जन्नोधेहिद्विपदेचतुष्पदे ॥३३॥ गायत्रीमन्त्रेण सम्प्रोक्ष्य धेनुमुद्रां प्रदर्श्य ग्रासमुद्रया–ॐप्राणायस्वाहा ॐ अपानायस्वाहा

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2
Kirtikant Sharma Collection, Najafgarh

ॐव्यानायस्वाहा ॐउदानायस्वाहा ॐसमानायस्वाहा। ॐभूः०स्वः सि०म० नैवेद्यं निवेदयामि॥पूर्वापोशनं स०॥नैवेद्यमध्येपानीयम्—एलोशीरलवङ्गादिकर्पूरपरिवासितम्। प्राशनार्थं कृतं तोयं गृहाण परमेश्वर॥ ॐभूः० सि० म० मध्येपानीयं स०। उत्तरापोशनं स०।

१ नैवेद्यविचारः शारदातिलके—स्वादूपदंशं विमलं पायसं सहशर्करम्। कदलीफलसंयुक्तं साज्यं मंत्री निवेदयेत्॥ तत्र तत्र जलं दद्यादुपचारान्तरान्तरम्॥ नैवेद्यलक्षणम्—निवेदनीयं यद्द्रव्यं प्रशस्तं प्रयतं तथा॥तद्भक्ष्याद्यं पञ्चविधं नैवेद्यमिति कथ्यते॥भक्ष्यं भोज्यं च लेह्यं च पेयं चूष्यं च पंचमम्। सर्वत्र चैतन्नैवेद्यमाराध्यास्ये निवेदयेत्॥ नैवेद्यपात्राणि—तैजसेषु च पात्रेषु सौवर्णे राजते तथा। ताम्रे वा प्रस्तरे वापि पद्मपत्रेऽथवा पुनः॥ यज्ञदारुमये वापि नैवेद्यं स्थापयेद् बुधः। सर्वाभावे च माहेये स्वहस्तघटिते यदि॥ नैवेद्यकालः—अर्चाविसर्जनाद्द्रव्यं नैवेद्यं सर्वमुच्यते। विसर्जिते जगन्नाथे निर्माल्यं भवति क्षणात्॥नैवेद्यस्थापनक्रमो गौतमीये—नैवेद्यं दक्षिणे भागे पुरतो वा न पृष्ठतः।दक्षिणं तु परित्यज्य वामे चैव निधापयेत्॥अभोज्यं तद्भवेदन्नं पानीयं च सुरोपमम्॥ आह्निकतत्त्वे—तृषार्ताः पशवो रुद्राः कन्यका च रजस्वला। देवता च सनिर्माल्या हन्ति पुण्यं पुराकृतम्॥ देवलः—चाण्डालेन शुना वापि दृष्टं हविरयाज्ञिकम्। बिडालादिभिरुच्छिष्टं दुष्टमन्नं विवर्जयेत्॥ पद्मपुराणे—हविः शाल्योदनं दिव्यमाज्ययुक्तं सशर्करम्। नैवेद्यं देवदेवाय यावत्कं पायसं तथा॥ नैवेद्यवस्त्वलाभे तु फलानि च निवेदयेत्। फलानामप्यलाभे तु तोयान्यपि निवेदयेत्॥ नैवेद्यभक्षणाभक्षणविचारः कालिकापुराणे—यो यदेवार्चनरतः स तन्नैवेद्यभक्षकः। केवलं सौरशैवे तु वैष्णवो नैव भक्षयेत्॥ समानं त्वन्यनैवेद्यं भक्षयेदन्यदैवतः॥ शिवनैवेद्ये विशेषः भविष्ये—शालग्रामोद्भवे लिंगे बाणलिंगे स्वयंभुवि। रसलिंगे तथार्घे च सुप्रसिद्धप्रतिष्ठिते॥ हृदये चन्द्रकान्ते च स्वर्णसैन्धादिनिर्मिते। चान्द्रायणसमं ज्ञेयं शम्भोर्नैवेद्यभक्षणम्॥ लिंगे स्वयंभुवे बाणे रत्नजे रसनिर्मिते। सिद्धप्रतिष्ठिते चैव न चण्डाधिकृतिर्भवेत्॥ यत्र चण्डाधिकारोस्ति तद्भोक्तव्यं न मानवैः। चण्डाधिकारो नो यत्र भोक्तव्यं तत्र भक्तितः॥ हेमाद्रौ परिशिष्टे—अग्राह्यं शिवनैवेद्यं पत्रं पुष्पं फलं जलम्। शालग्रामशिलासङ्गात्सर्वं याति पवित्रताम्॥ पुरणश्चरणचन्द्रिकायाम्—सुषुम्नावर्त्मना पुष्पमाघ्रायोद्वासयेत्सुधीः। निर्माल्यं मस्तके धार्यं सर्वाङ्गेष्वनुलेपनम्॥ नैवेद्यं चोपभुंजीत दत्वा तद्भक्तिशालिने॥ (भक्तिशालिने विष्वक्सेनायेत्यर्थः) गौतमीये—गणेशे वक्रतुंडाय सूर्ये चण्डांशवेऽर्पयेत्। विष्णौ तु विष्वक्सेनाय शिवे चण्डेश्वराय च॥ शक्त्युच्छिष्टे शेसिकायै दद्यादर्चनसिद्धये। अन्यथा नैव सिद्धिः स्यादर्चको नरकं व्रजेत्॥ देवनिर्माल्यत्यागे दोषो रुद्रयामले—निवेदितं च यद्द्रव्यं भोक्तव्यं तद्विधानतः। तच्च चेद्भुज्यते मोहाद्भोक्तुमायान्ति देवताः॥

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

हस्तप्रक्षालनं स०।मुखप्रक्षालनं स०।आचमनीयं स०।करोद्वर्तनार्थे गन्धं समर्पयामि॥मुखवासार्थे ताम्बूलं–ॐयुतस्मात्स्युद्रवंतस्तुरण्युत? पुर्ण्णभवेरनुवातिप्रगर्द्दिनं÷॥श्येनस्येवुध्रजंतोऽअङ्कुसम्परिदधिक्राण्णं÷सुहोर्जातरिंत्रतु८स्वाहा॥५५॥ ॐभू० सि० म० ताम्बूलं स०॥ फलम्–ॐआ?फलिनीर्य्याऽअफुलाऽअपुष्पायाश्चपुष्पिणीं८॥बृहुस्पतिप्रसूतास्तानोमुञ्चन्त्वंहसं८ ॥६३॥ ॐभू०सि०म० फलं स०॥ दक्षिणा–ॐयदुत्तँय्यत्पुरादानुँय्यत्पूर्त्तायाश्च दक्षिणा८॥तदुग्निर्वैश्वकर्म्मण?स्वर्द्देवेषुनोदधत्॥५५॥ॐ भू०सि०म० सुवर्णपुष्पदक्षिणां स०॥ कर्पूरारार्तिक्यम्–ॐआगांत्रिपार्थिवुरजं÷पितुरंप्रायिधामभिं८ ॥ दिव?सदांऽसिबृहुतीविर्तिष्ठसुऽआत्वेषंवर्त्ततेतमं÷ ॥३३॥ भूर्भुवः स्वः सि०म०कर्पूरारार्तिक्यं दर्शयामि॥ मन्त्रपुष्पाञ्जलिः–अञ्जलौ पुष्पाण्यादाय तिष्ठन्–ॐनमोगुणेभ्योगुणपतिभ्यश्चवोनमोनमो-व्रातेभ्योव्रातपतिभ्यश्चवोनमोनमोगृत्सेभ्योगृत्सपतिभ्यश्चवोनमोनमोविरूपेभ्योविश्वरूपेभ्यश्चवोनमः÷ ॥ ॥ ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहित म० मन्त्रपुष्पाञ्जलिं समर्पयामि ॥ प्रदक्षिणा–सुप्तास्यांसन्परिवयुस्त्रि?सुप्तसुमिधं÷कृता? ॥ देवावद्यञ्जन्तंब्वानाऽ-अवंध्नन्पुरुषम्पशुम् ॥॥ ॐ भू० सि० म० प्रदक्षिणां समर्पयामि ॥ अर्घपात्रे जलं प्रपूर्य रक्तचन्दनपुष्पाक्षततसहितं नारिकेलं च धृत्वा विशेषार्घः–रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक। भक्तानामभयंकर्ता त्राता भव भवार्णवात्॥ द्वैमातुर कृपासिन्धो षाण्मातुराग्रज प्रभो। वरद त्वं वरं देहि वाञ्छितं वाञ्छितार्थद॥ अनेन सफलार्घेण फलदोऽस्तु सदा मम॥ ॐभूर्भुवःस्वः सि०म० विशेषार्घं स०॥ प्रार्थना–विघ्नेश्वराय वरदाय सुरप्रियाय लम्बोदराय सकलाय जगद्धिताय।नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ नमो नमस्ते॥ नमस्ते ब्रह्मरूपाय विष्णुरूपाय ते नमः। नमस्ते रुद्ररूपाय करिरूपाय ते नमः॥ विश्वरूपस्वरूपाय नमस्ते ब्रह्मचारिणे। भक्तप्रियाय देवाय नमस्तुभ्यं विनायक॥ लम्बोदर नमस्तुभ्यं सततं मोदकप्रिय। निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा॥ त्वां विघ्नशत्रु-दलनेति च सुन्दरेति भक्तप्रियेति सुखदेति वरप्रदेति।विद्याप्रदेत्यघहरेति च ये स्तुवन्ति तेभ्यो गणेश वरदो भव नित्यमेव॥ॐभू०सि० म०प्रार्थनापूर्वकं नमस्करोमि। अनया पूजया सिद्धिबुद्धिसहितः म० साङ्गः सपरिवारः प्रीयतां न मम॥ इति गणपतिपूजाप्रयोगः॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥ अथ पुण्याहवाचनप्रयोगः ॥

स्वपुरतः शुद्धायां भूमौ पञ्चवर्णैस्तन्दुलैर्वाऽष्टदलं कर्तव्यम् ॥ तत्र भूमिं स्पृष्ट्वा—ॐ मही द्यौः पृथिवी च न इमं यज्ञं मिमिक्षताम् ॥ पिपृता नो भरीमभिः ॥ ३२/८ ॥ तत्र यवप्रक्षेपः—ॐ ओषधयः समवदन्त सोमेन सह राज्ञा ॥ यस्मै कृणोति ब्राह्मणस्त ँ राजन्पारयामसि ॥ ६६/१२ ॥ अष्टदलोपरि कलशस्थापनम्—ॐ आजिघ्र कलशं मह्या त्वा विशन्त्विन्दवः ॥ पुनरूर्जा निवर्तस्व सह रय्या निवर्तस्व पुनर्मा विशताद्रयिः ॥ ४२/८ ॥ कलशे जलपूरणम्—ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्जनीस्थो वरुणस्य ऽऋतसदन्यसि वरुणस्य ऽऋतसद

---

१ पुण्याहवाचनसूत्रम्—अथ पुण्याहवाचनमृद्धिपूर्तेष्वृद्धिर्विवाहान्तापत्यसंस्काराः प्रतिष्ठोत्थापनादि पूर्तं तत्कर्मणश्चायान्तयोः कुर्याच्छुचिः स्वलङ्कृतो वाचयिता तथाभूते सद्मनि मङ्गलसम्भारान्समभ्यर्च्य ब्राह्मणान्प्रशस्तांल्लक्षणसंपन्नान्यान्यादिभिरभ्यर्च्य दक्षिणया तोषयेदथ ते प्राङ्मुखाः प्रसन्नादर्भपाणयस्तिष्ठेयुर्दक्षिणतोवाचयितोदङ्मुखाःसंस्कार्यो वाचयिदुर्दक्षिणेपार्श्वमभितिष्ठेयुरथ वाचयिता दर्भपाणिरपांपूर्णं कुम्भं स्वर्चितं सपल्लवमुत्क्षिप्य तिष्ठन्समाहितोमनःसमाधीयतामितिब्राह्मणान्ब्रूयात्समाहितमनसःस्मः इतिप्रतिब्रूयुः प्रसीदन्तुभवन्तइतिवाचयिता प्रसन्नाः स्मइतीतरे सर्वे संहत्य शांतिः पुष्टिस्तुष्टिर्वृद्धिरविघ्नमायुष्यमारोग्यं स्वस्ति शिवं कर्म कर्मसमृद्धिर्धर्मसमृद्धिः पुत्रसमृद्धिर्वेदसमृद्धिः शास्त्रसमृद्धिर्धनधान्यसमृद्धिरिष्टसंपदित्येतानि पंचदशास्त्वन्तानि वाक्यान्युक्त्वा तन्नाम्ना कर्मदेवताः प्रीयन्तामिति ब्रूयुरथ वाचयिता पूर्वंतत्तल्लिङ्गमंत्रान्पठित्वा त्रिर्नमेन्दमध्योच्चस्वरैरोंपुण्याहं भवन्तो ब्रुवन्त्वोङ्कल्याणं भवन्तोब्रुवन्त्वोंस्वस्तिभवन्तोब्रुवन्त्वोमृद्धिंभवन्तो ब्रुवन्त्वितिब्रूयात्तेपि तथा प्रत्येकं प्रतिब्रूयुरोमृद्धयतामित्यृद्धौब्रूयुरथ प्राङ्मुखमासीनं सामात्यंकर्तारंब्राह्मणाःसपल्लवदर्भपाणयःशान्तिपवित्राभिर्लिङ्गाभिर्मन्त्रैभिः सिञ्चेयुः पुरंध्रयो नीराजनादिमङ्गलानि कुर्वन्ति ॥ अन्यच्च—पुण्येऽहनि तु सम्प्राप्ते विवाहे चौलके तथा । व्रतबन्धे च यज्ञादौ तथा च दानकर्मणि ॥ गृहारम्भे धनप्राप्तौ तीर्थाभिगमने तथा । नवग्रहमखे शान्तावन्यत्रैतेषु तथैव च ॥ गृहप्रवेशने चैव ग्रामस्याभिनिवेशने । गजबन्धे तुरङ्गाणां दासादीनां च सङ्ग्रहे ॥ अन्यस्मिन्नपि सर्वस्मिञ्शुभे कर्मणि चोदिते । वाचनीया द्विजाः सर्वे वेदशास्त्रपरायणाः ॥ इति विधानरत्नमालायाम् ॥ अपरं च—सम्पूज्य गन्धमाल्याद्यैर्ब्राह्मणान्स्वस्ति वाचयेत् । धर्मकर्मणि माङ्गल्ये संग्रामाद्युतदर्शने ॥ इति व्यासः ॥ एतदेव निरोङ्कारं कुर्यात्क्षत्रियवैश्ययोरितिदानखण्डवचनाद्ब्राह्मणस्य ओंकारपूर्वकं क्षत्रियवैश्ययोर्निरोङ्कारं शूद्रस्य स्वस्तिमात्रम् ॥ २ ॥ कलशस्थापनं कार्यं कर्मलेऽष्टदलेऽमले ॥ इति परशुरामः ॥ ३ ॥ क्रमेण कलशं स्थाप्य पूर्णपात्रं च सर्वशः । वरणं तत्र सम्पूज्य गङ्गाद्यावाहनादिकम् ॥ स्वर्णं वा राजतं वापि ताम्रमृण्मयजं तु वा । अकालमव्रणं चैव सर्वलक्षणसंयुतम् ॥ पञ्चाशांगुलमैत्पुत्र्यमुत्सेधे षोडशाङ्गुलम् । द्वादशाङ्गुलकं मूलं मुखमष्टाङ्गुलं तथा ॥ इति ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नमसिद्यरुणस्यऽऋतसदनमासीद ॥ ३६/१ ॥ गन्धप्रक्षेपः—ॐत्वाङ्गन्धर्वाऽअखनँस्त्वामिन्द्रस्त्वाम्बृहस्पतिं ÷ ॥ त्वामोषधेसोमोराजाविद्वाक्यꣳमादमुच्यत ॥ ५८/१२ ॥ धान्यप्रक्षेपः—ॐधाक्ष्यमसिधिनुहिदेवान्प्राणायत्त्वोदानायत्त्वा व्यानायत्त्वा ॥ दीर्घामनुप्रसितिमायुषेधान्देवोवः सविताहिरण्यपाणिꣳप्रतिगृभ्णात्वच्छिद्रेणपाणिनाचक्षुषेत्वामहीनाम्पयोसि ॥ ३०/१ ॥ सर्वौषधीप्रक्षेपः—ॐषाऽओषधीꣳपूर्वाजातादेवेभ्यस्त्रियुगम्पुरा ॥ मनैनुबभ्रूणामहꣳशतन्धामानिसप्तचं ॥ ५५/१२ ॥ दूर्वाप्रक्षेपः—ॐकाण्डात्काण्डात्प्ररोहन्तीपरुषꣳपरुषस्परि ॥ एवानोदूर्वेप्रतनुसहस्रेणशतेनच ॥३०/१३॥ पञ्चपल्लवप्रक्षेपः—ॐअश्वत्थेवोनिषदनम्पर्णेवोवसतिष्कृता ॥ गोभाजऽइत्किलासथयत्सनवथपूरुषम् ॥५५/१२॥ सप्तमृद्प्रक्षेपः—ॐस्योनापृथिविनोभवानृक्षरानिवेशनी ॥ यच्छानꣳशर्म्मसप्रथाꣳ ॥ १३/३६ ॥ फलप्रक्षेपः—ॐया?फलिनीर्व्याऽअफलाऽअपुष्पायाश्चपुष्पिणीꣳ ॥ बृहस्पतिप्रसूतास्तानोमुञ्चन्त्वꣳहसꣳ ॥ ८५/१२ ॥ पञ्चरत्नप्रक्षेपः—ॐपरिवाजपतिꣳकविरग्निर्हव्यान्यक्रमीत् ॥ दधद्रत्नानिदाशुषे ॥ २५/११ ॥ हिरण्यप्रक्षेपः—ॐहिरण्यगर्भ?समवर्त्तताग्रेभूतस्यजात?पतिरेकऽआसीत् ॥ सदाधारपृथिवीन्द्यामुतेमाङ्कस्मैदेवायहविषाविधेम ॥ ४/१३ ॥ रक्तसूत्रेण वस्त्रेण च वेष्टयेत्—ॐयुवासुवासाः परिवीतआगात्सउश्रेयान्भवतिजायमानः ॥ तंधीरासःकवयउन्नयन्तिस्वाध्योमनसादेवयन्तः ॥ पा०गृ०का०२कं०२मं०९ ॥ पूर्णपात्रमुपरिन्यसेत्—ॐपूर्णादर्व्विपरापतसुपूर्णापुनरापत ॥ वस्नेववि क्रीणावहाइषमूर्ज्जꣳशतक्रतो ॥ ४५/३ ॥ वरुणमावाहयेत्—ॐतत्त्वायामीत्यस्य शुनःशेपऋषिः त्रिष्टुप्छन्दः वरुणोदेवता वरुणावाहने विनियोगः। ॐतत्त्वायामिब्रह्मणावन्दमानस्तदाशास्तेयजमानोहविर्भिः ÷ ॥ अहेडमानोवरुणेहबोध्युरुशꣳसमानऽआयुः प्रमोषीः ॥ ४५/१८ ॥ ॐभूर्भुवः स्वः अस्मिन्कलशे वरुणं साङ्गं सपरिवारं सायुधं सशक्तिकम् आवाहयामि स्थापयामि ॥ प्रतिष्ठापनम्—ॐमनोजूतिर्ज्जुषतामाज्ज्यस्यबृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टंय्यज्ञꣳस-

---

१ केचन सूत्रवेष्टने—ॐसुजातोज्ज्योतिषासहशर्म्मव्वरूथमासदत्स्व÷ ॥ व्वासोऽअग्नेविश्वरूपꣳसंव्ययस्वविभावसो ॥ ४/१३ ॥
इति मन्त्रं वा पठन्ति ॥ २ ॥ धातुजं मृण्मयं वापि कलशं यत्प्रतिष्ठितम्। तद्वत्प्रादेशदीर्घं च चतुरङ्गुलमुच्छ्रितम् ॥ सिततन्दुलपूर्णं च पूर्णपात्रं प्रकीर्तितम् ॥

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मिमन्दधातु ॥ विश्वेदेवासऽइहमादयन्तामोऽ३म्प्रतिष्ठ ॥ १३/२ ॥ ॐ वरुणाय नमः वरुण सुप्रतिष्ठितो वरदो भव ॥ ॐ भूर्भुवः स्वः वरुणाय नमः चन्दनं समर्पयामि ॥ इत्यादिपञ्चोपचारैः संपूज्य तत्त्वायामीति पुष्पाञ्जलिं समर्प्य अनेन पूजनेन वरुणः प्रीयताम् ॥ ततः अनामिकया कलशं स्पृष्ट्वा आमि-मन्त्रयेत्—कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः । मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥ कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा । ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः ॥ अङ्गैश्च सहिताः सर्वे कलशाम्बुसमाश्रिताः । अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा ॥ आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः ॥ ततः गायत्र्यादिभ्यो नमः इत्यनेन पञ्चोपचारैरभ्यर्च्य कलशं प्रार्थयेत्—देवदानवसंवादे मथ्यमाने महोदधौ । उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम् ॥ त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः । त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥ शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः । आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ॥ त्वयि तिष्ठन्ति भूतानि यतः कामफलप्रदाः । त्वत्प्रसादादिदं कर्म कर्तुमीहे जलोद्भव ॥ सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा ॥ नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमङ्गलाय । सुपा-शहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते ॥ पाशपाणे नमस्तुभ्यं पद्मिनीजीवनायक । पुण्याहवाचनं यावत्तावत्त्वं सन्निधो भव ॥ ततः स्वस्तिवाचनार्थं युग्मविप्रान्संपूज्य ॥ अवनिकृतजानुमण्डलः कमलमुकुलसदृशमञ्जलिं शिरस्याधाय दक्षिणेन पाणिना स्वर्णपूर्णकलशं धारयित्वा वदेत्—ॐ त्रीणि पदा वि चक्रमे विष्णुर्गोपाऽअदाभ्यः । अतो धर्माणि धारयन् ॥ १३/३ ॥ दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि च ॥ तेनायुः-प्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्त्विति भवन्तो ब्रुवन्तु ॥ विप्रा वदेयुः-तेनायुःप्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्तु ॥ पुनः-ॐ त्रीणि तऽआहुर्दिवि बन्धनानि त्रीण्यप्सु त्रीण्यन्तः समुद्रे ॥ उतेव मे वरुणश्छन्त्स्यर्व्वन्यत्रातऽआहुः परमञ्जनानम् ॥ १५/२१ ॥ दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि च ॥ तेनायुःप्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्त्विति भवन्तो ब्रुवन्तु ॥ तेनायुःप्रमाणेन पुण्यं पुण्याहं दीर्घमायु-

१ स्पृशन्त्वनामिकाग्रेण क्वचिदालोकयन्नपि । अनुमन्त्रणं सर्वत्र सदैवमभिमन्त्रयेत् ॥

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

CC-0. JNU Delhi. Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रस्तु ॥ पुनः-ॐत्र्यायुदेवाऽएकादशत्र्यविꣳशाः सुराधसꣳ ॥ बृहस्पतिपुरोहितादेवस्यसवितुः सवे ॥ देवादेवैरवन्तुमा ॥ ११/२० ॥ तेनायुः-प्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्त्विति भवन्तो ब्रुवन्तु ॥ तेनायुःप्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्तु ॥ अपां मध्ये स्थिता देवाः सर्वमप्सु प्रतिष्ठितम् । ब्राह्मणानां करे न्यस्ताः शिवा आपो भवन्तु ताः ॥ ब्राह्मणानां हस्ते सुमोक्षितमस्तु ॥ शिवा आपः सन्तु सन्तु शिवा आपः ॥ सौमनस्यमस्तु । अस्तु सौमनस्यम् ॥ अक्षतं चारिष्टं चास्तु । अस्त्वक्षतमरिष्टं च ॥ गन्धाः पान्तु सौमङ्गल्यं चास्त्विति भवन्तो ब्रुवन्तु । ॐ गन्धाः पान्तु सौमङ्गल्यं चास्तु ॥ अक्षताः पान्तु आयुष्यमस्त्विति भवन्तो ब्रुवन्तु । ॐअक्षताः पान्तु आयुष्यमस्तु ॥ पुष्पाणि पान्तु सौश्रियमस्त्विति भवन्तो ब्रुवन्तु । ॐपुष्पाणि पान्तु सौश्रियमस्तु ॥ ताम्बूलानि पान्तु ऐश्वर्यमस्त्विति भवन्तो ब्रुवन्तु । ॐताम्बूलानि पान्तु ऐश्वर्यमस्तु ॥ पूगीफलानि पान्तु बहुफलमस्त्विति भवन्तो ब्रुवन्तु । ॐपूगीफलानि पान्तु बहुफलमस्तु ॥ दक्षिणाः पान्तु बहुदेयं चास्त्विति भवन्तो ब्रुवन्तु । ॐदक्षिणाः पान्तु बहुदेयं चास्तु ॥ ॐदीर्घमायुः श्रेयः शान्तिः पुष्टिस्तुष्टिः श्रीर्यशो विद्या विनयो वित्तं बहुपुत्रश्चास्त्विति भवन्तो ब्रुवन्तु । ब्राह्मणा वदेयुः-ॐदीर्घमायुःश्रेयःशान्तिःपुष्टिस्तुष्टिःश्रीर्यशोविद्याविनयोवित्तंबहुपुत्रंचास्तु ॥ यजमानो वदेत्—यज्ञकर्त्वा सर्ववेदयज्ञक्रियाकरण-कर्मारम्भाः शुभाः शोभनाः भवर्तन्ते तमहमोङ्कारमादिं कृत्वा ऋग्यजुःसामाथर्वणाशीर्वचनं बहुऋषिमतं समनुज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये । ॐवाच्यताम् ॥ अथाशीर्वादः ॥ ब्राह्मणानां हस्तेष्वक्षतान्दद्यात् ॥ यजुः—ॐभद्रङ्कर्णेभिः शृणुयामदेवाभद्रम्पश्येमाक्षभिर्यजत्राः ॥ स्थिरैरङ्गैस्तुष्टुवाꣳसस्तनूभिर्व्यशेमहिदेवहितꣳयदायु ÷ ॥ २१/२५ ॥ ॐदेवानाम्भद्रासुमतिऋजूयतान्देवानाꣳरातिरभिनोनिवर्त्तताम् ॥ देवानाꣳसख्यमुपसेदिमाव्रयन्देवानऽआयुः प्रतिरन्तुजीवसे ॥ १५/२५ ॥ ॐदीर्घायुस्तऽओषधेखनितायस्म्मैचत्वाखनाम्यहम् ॥ अयोत्वन्दीर्घायुर्ब्भुत्त्वाशतवल्शाविरोहतात् ॥ १००/१२ ॥ ॐऋक्—द्रविणोदाद्रविणसस्तुरस्यद्रविणोदाःसनरस्युभयंसत् ॥ द्रविणोदावीरवतीमिषंनोद्रविणोदारासतेदीर्घमायुः ॥ अष्टक १-४ ॥ यजुः ॐद्रविणोदाःपिपीषतिजुहोतुप्रचेतिष्ठत ॥

Kirtikant Sharma Collection, Najafgarh

नेष्ट्राद्तुभिरिष्यत ॥ ३३/२६ ॥ साम—ॐदेवो३वो३द्रविणोदाः । पूर्णांविवष्ट्रासिचं । उद्वा१सिंचा३ । ध्वमुपवापृणध्वं । आदिद्वोदे३ । वओहते । इदा२३भा३४३ । ओ२३४५ई । डा ॥ वेयगानस्य द्वितीयप्रपाठकस्य प्रथमार्द्धे साम २४ ॥ अथर्वणः—ॐधाताराातिःसवितेदंजुषंताम्प्रजापतिर्निधिपतिर्नोअग्निः ॥ त्वष्टाविष्णुःप्रजयासंरराणोयजमानायद्रविणंदधातु ॥ का०७अ०२सू०१७मं०४ऋक्—ॐसवितापश्चात्तात्सवितापुरस्तात्सवितोत्तरात्तात्सविताधरात्तात् ॥ सवितानःसुवतुसर्वतातिंसवितानोरासतांदीर्घमायुः ॥ ७११/८ ॥ यजुः—सवितास्त्वासवानाोसुवतामग्निर्गृहपतीनाोसोमोवनस्पतीनाम् ॥ बृहस्पतिर्वाचऽइन्द्रोज्यैष्ठ्यायरुद्रः?पशुभ्योमित्रः?सत्र्योवरुणोधर्म्मपतीनाम् ॥ ३१/९ ॥ साम—ॐऊर्द्धऊषुणा३ऊता२३४याई । तिष्ठादेवोनसविता । ऊर्द्धोवा२३जा ॥ स्यासनिता । यादंजिभी३ः । वाघाद्भी३ः । वीवी३ । द्वेयामा२३हा ३४३ई । उ२३४५ई । डाँ ॥ वेयगानस्य द्वितीयप्रपाठकस्य प्रथमार्द्धे साम २६ ॥ अथर्वणः—ॐअभयंद्यावापृथिवीइहास्तुनोभयंसोमःसवितानःकृणोतु ॥ अभयन्नोस्तुवा ऽन्तरिक्षंसप्तऋषीणांचहुविषाभयन्नोऽस्तु ॥ का०६अ०४सू०४०मं०१ ॥ ६१/१० ॥ ऋक्—ॐनवोनवोभवतिजायमानोह्नांकेतुरुषसामेत्यग्रम् । भागंदेवेभ्योविदधात्यायन्नचंद्रमास्तिरतेदीर्घमायुः ॥ ८२३/३ ॥ यजुः—ॐनतद्रक्षाोसिनपिशाचास्तरन्तिदेवानामोजऽप्रथमजर्ष्टिह्येतत् ॥ योबिभर्त्तिदाक्षायणंहिरण्यंसदेवेषुकृणुतेदीर्घमायुः समन्नुष्येषुकृणुतेदीर्घमायुः ॥ ५१/३१ ॥ साम—चंद्रमाआउवा । ध्रुवान्ताराउवा । सुपर्णो धाउवा । वतेदिवि । न वोहिराउवा । व्यनाइमायाउवा । पदंविंदाउवा । तिविद्युताः । वित्तंमाआउवा । स्यरोदा २३ सा ३४३ ई । ओ २३४५ई । डा ॥ वेयगानस्य एकादशप्रपाठकस्य प्रथमार्द्धे साम ३१ ॥ अथर्वणः—नैनंरक्षांसिनपिशाचाःसहंतेदेवानामोजःप्रथमजंह्येतत् ॥ योबिभर्त्तिदाक्षायणंहिरण्यं

१ अत्र-ॐअन्नोरात्राभ्यांनक्षत्रेभ्यःसूर्याचन्द्रमसाभ्याम् ॥ मन्द्राहमस्मभ्यंराजंशकधूमत्वंकृधि ॥ काण्ड ६ अनुवाक १३ सूक्त १२८ मन्त्र ३ इत्यपिपठंति ॥

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2
Kirtikant Sharma Collection, Najafgarh

सर्ज़ीवेषुकृणुतेर्दीर्घमायुः ॥ १$\frac{2}{3\mu}$ ॥ ऋक्—ॐउच्चादिविदक्षिणावंतोऽअस्युर्येऽअश्वदाःसहतेसूर्येण ॥ हिरण्यदाऽअमृतत्वंभजंतेवासो दाःसोमप्रतिरंतऽआयुः ॥ ८$\frac{3}{6}$ ॥ यजुः—ॐउच्चात्तेजातमन्धसोदिविसदद्भूम्यादंदे ॥ उग्रंशर्म्ममहिश्रवः ॥ $\frac{16}{26}$ ॥

साम—उच्चाता ३ ईजातमंधसाः । दिवाई । सा२ऽदू२। मिया२३ ददाई । उग्राꣳशर्म्मा महा२३ईश्रवाऽ । वा३ । स्तोषे२३४५ ॥ वेयगानस्य द्वादशमपाठकस्य द्वितीयार्द्धे साम १३ ॥ अथर्वणः—ॐउच्चापतंन्तमरुणंसुपर्णंमध्येदिवस्तरणिंभ्राजमानम् ॥ पश्यामत्वासवितारंयमा-हुरजस्रंज्योतिर्यदविन्दुदत्रिः ॥ का० १३ अ०२मं० ३६ इत्याशीर्वादः ॥ + व्रतजपनियमतपःस्वाध्यायक्रतुदयादमदानविशिष्टानां सर्वेषां ब्राह्मणानां मनः समाधीयताम् ॥ * समाहितमनसः स्मः ॥ + प्रसीदन्तु भवन्तः ॥ प्रसन्नाः स्मः ॥ + ॐशान्तिरस्तु ॥ अस्तु ! ॥ ॐपुष्टिरस्तु ॥ ॐतुष्टिरस्तु । ॐवृद्धिरस्तु । ॐअविघ्नमस्तु । ॐआयुष्यमस्तु । ॐआरोग्यमस्तु । ॐशिवं कर्मास्तु । ॐकर्मसमृद्धिरस्तु । ॐवेदसमृद्धिरस्तु । ॐशास्त्रसमृद्धिरस्तु । ॐधनधान्यसमृद्धिरस्तु । ॐपुत्रपौत्रसमृद्धिरस्तु । ॐइष्टसंपदस्तु । ॐअरिष्ट-निरसनमस्तु । ॐयत्पापं रोगमशुभमकल्याणं तद्दूरे प्रतिहतमस्तु ॥ ॐयच्छ्रेयस्तदस्तु ॥ ॐउत्तरे कर्मणि निर्विघ्नमस्तु ॥ ॐउत्तरोत्तर-महरहरभिवृद्धिरस्तु ॥ ॐउत्तरोत्तराः क्रियाः शुभाः शोभनाः संपद्यन्ताम् ॥ ॐतिथिकरणमुहूर्तनक्षत्रग्रहलग्नसंपदस्तु ॥ पात्रे उदकसेकः ॥ ॐतिथिकरणमुहूर्तनक्षत्रग्रहलग्नाधिदेवताः प्रीयन्ताम् ॥ ॐतिथिकरणे समुहूर्ते सनक्षत्रे सग्रहे साधिदेवते प्रीयेताम् ॥ ॐदुर्गापाञ्चाल्यौ प्रीयेताम् ॥ ॐअग्निपुरोगा विश्वेदेवाः प्रीयन्ताम् ॥ ॐइन्द्रपुरोगा मरुद्गणाः प्रीयन्ताम् ॥ ॐमाहेश्वरीपुरोगा उमामातरः प्रीयन्ताम् ॥ ॐअरुन्धतीपुरोगा एक पत्न्यः प्रीयन्ताम् ॥ ॐविष्णुपुरोगाः सर्वेदेवाः प्रीयन्ताम् ॥ ॐब्रह्मपुरोगाः सर्वेवेदाः प्रीयन्ताम् ॥ ॐब्रह्म च ब्राह्मणाश्च प्रीयन्ताम् ॥ ॐश्रीसर-

१ अत्र—ॐउच्चैर्घोषोदुंदुभिः सत्वनायन्वानस्पत्यःसंभृतउत्क्रियाभिः ॥ वाचंक्षुण्वानोवदमर्यन्त्सपत्नान्निसहध्वंजेष्यन्तमितंस्तनीहि ॥ का० ५ अ० ४ सू० २० मं० १ इत्यपि मन्त्रं पठन्ति ॥ + यजमानो ववेत् ॥ * ब्राह्मणा ववेयुः ॥ २ अस्तु इति द्विजाः सर्वत्र प्रतिवचनं ववेयुः ॥

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2
Kirtikant Sharma Collection, Najafgarh

स्वत्यौ प्रीयेताम् ॥ ॐश्रद्धामेधे प्रीयेताम् ॥ ॐभगवती कात्यायनी प्रीयताम् ॥ ॐभगवती महेश्वरी प्रीयताम् ॥ ॐभगवती ऋद्धिकरी प्रीयताम् ॥ ॐभगवती सिद्धिकरी प्रीयताम् ॥ ॐभगवती पुष्टिकरी प्रीयताम् ॥ ॐभगवती तुष्टिकरी प्रीयताम् ॥ ॐभगवन्तौ विघ्नविनायकौ प्रीयेताम् ॥ ॐसर्वाः कुलदेवताः प्रीयन्ताम् ॥ ॐसर्वा ग्रामदेवताः प्रीयन्ताम् ॥ वहिः—ॐहताश्च ब्रह्मद्विषः॥ॐहताश्च परिपन्थिनः ॥ ॐहताश्च विघ्नकर्तारः ॥ ॐशत्रवः पराभवं यान्तु ॥ॐशाम्यन्तु घोराणि ॥ ॐशाम्यन्तु पापानि ॥ ॐशाम्यन्त्वीतयः॥ पुनःपात्रे—ॐशुभानि वर्द्धन्ताम् ॥ ॐशिवा आपः सन्तु ॥ ॐशिवा ऋतवः सन्तु ॥ ॐशिवा ओषधयः सन्तु॥ॐशिवा नद्यः सन्तु॥ॐशिवा गिरयः सन्तु॥ॐशिवा अतिथयः सन्तु॥ॐशिवा अग्नयः सन्तु ॥ ॐशिवा आहुतयः सन्तु ॥ ॐअहोरात्रे शिवे स्याताम् ॥ ऋक्—शन्नः कनिक्रदद्देवः पर्ज्जन्योऽभिवर्षतु ॥ शन्नोधावापृथिवीशं प्रजाभ्यः शन्नऽओषधिर्द्विपदेशंचतुष्पदे ॥ ऋ० ब्र० शान्तिपाठे परिशिष्टमन्त्र ८ ॥ यजुः—ॐनिकामेनिकामेनऽपर्ज्जन्यो वर्षतु फलवत्यो न ओषधयऽपच्यन्ताँ योगक्षेमो नऽकल्पताम् ॥ ॥ यजु० ब्रा० ॥ ब्राह्मणम्—ॐनिकामेनिकामेनऽपर्ज्जन्यो वर्षतु इतिनिकामेनिकामेवैतत्रपर्ज्जन्यो वर्षतिस्तत्रैतेनयज्ञेनयजन्तेफलवत्योनऽओषधयऽपच्यन्तामितिफलवत्योवैतत्रौषधयऽपच्यन्तेयत्रैतेनयज्ञेनयजन्तेयोगक्षेमोनऽकल्पतामितियोगक्षेमोवैतत्रकल्पतेयत्रैतेनयज्ञेनयजन्तेतस्माद्यत्रैतेनयज्ञेनयजन्तेकल्पतऽप्रजानायोगक्षेमोभवति ॥ साम—ॐत्वष्टा ३४ । नो दैव्यं वचाः । पर्जन्योब्रह्मणस्पा २३ तीः । पुत्रैर्भ्रातृभिरदितिर्नुपातु २३ नाः । दुष्टारा २३ न्त्रा । मणवा २३ चा ३४३ । ओ २३४५ ई । डो ॥ वेयगानस्य अष्टमप्रपाठकस्य प्रथमार्द्धस्य साम २० ॥ अथर्वणः—गुणास्त्वोपगायन्तुमारुताःपर्ज्जन्यघोषिणः पृथक् ॥ सर्गाबर्षस्यवर्षतोवर्षन्तुपृथिवीमनु॥ का० ४ अ० १ सू० १५ मं० ४ ॥ ॐशुक्राङ्गारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहिता आदित्यपुरोगाः सर्वे ग्रहाः प्रीयन्ताम् ॥ ॐभगवान्नारायणः प्रीयताम् ॥ ॐभगवान्पर्जन्यः प्रीयताम् ॥ ॐभगवान्स्वामी महासेनः प्रीयताम् ॥ ॐपुरोनुवा-

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कयया यत्पुण्यं तदस्तु ॥ ॐ आज्यया यत्पुण्यं तदस्तु ॥ ॐ वषट्कारेण यत्पुण्यं तदस्तु ॥ ॐ प्रातःसूर्योदये यत्पुण्यं तदस्तु ॥ ॐ पुण्याहकालान्वाचयिष्ये । ॐ वाच्यताम् ॥ ब्राह्म्यं पुण्यं महद्यच्च सृष्ट्युत्पादनकारकम् । वेददृक्षोद्भवं नित्यं तत्पुण्याहं ब्रुवन्तु नः ॥ भो ब्राह्मणाः मह्यं सकुटुम्बिने महाजनान्नमस्कुर्वाणाय आशीर्वचनमपेक्षमाणाय मया क्रियमाणस्य ग्रहशान्त्याख्यस्य कर्मणः पुण्याहं भवन्तो ब्रुवन्तु ॥ ॐ अस्तु पुण्याहम् ॥ एवं त्रिः ॥ ऋक्–ॐ उद्व्रातेवशकुनेसामगायसिब्रह्मपुत्रऽइवसवनेषुशंससि ॥ वृषेववाजीशिशुमतीरपीत्यासर्वतोनःशकुनेभद्रमावदविश्वतोनःशकुनेपुण्यमावद ॥ २$\frac{12}{2}$ ॥ यजुः–ॐ पुनन्तुमादेवजना?पुनन्तुमनसाधियः ÷ ॥ पुनन्तुविश्वाभूतानिजातवेद६ पुनीहिमा ॥ $\frac{35}{12}$ ॥ ब्राह्मणम्–ॐ सवः॒कामयेतमहत्प्राप्नुयामित्युदगयनऽआपूर्यमाणपक्षेपुण्याहेद्वादशाहमुपसद्व्रतीभूत्वोदुंबरेकऽसेचमसेवासर्वौषधम्फलानीतिसम्भृत्यपरिसमुह्यपरिलिप्याभिमुपसमाधायावृताज्यꣳसंस्कृत्यपुꣳसानक्षत्रेणमन्थꣳसन्नीयजुहोति ॥ साम–ॐ पुमानःसोमाऽधारा २३४ या । आपोवसानोअर्षस्यारत्नधायोनिमृतस्यसा २ ईद साई । ओहाऽउवा । उत्सोदेवोहिरा २३ हाई । ओहा ३ उवा । ण्यया । ओ । ३ होवा । हो ५ ई । डा ॥ वेयगानस्य चतुर्दशप्रपाठकस्य प्रथमार्द्धे साम ३५ ॥ अथर्वणः–ॐ पुनन्तुमादेवजनाःपुनन्तुमनवोधिया॥ पुनन्तुविश्वाभूतानिपवमानःपुनातुमा ॥ काण्ड ६ अ० २ सू० १९ मं० १॥ पृथिव्यामुद्भूतायां तु यत्कल्याणं पुरा कृतम् । ऋषिभिः सिद्धगन्धर्वैस्तत्कल्याणं ब्रुवन्तु नः॥ भोब्राह्मणाः मह्यं सकुटुम्बिने महाजनान्नमस्कुर्वाणाय आशीर्वचनमर्पक्षमाणाय मया क्रियमाणस्य ग्रहशान्त्याख्यस्य कर्मणः कल्याणं भवन्तो ब्रुवन्तु ॥ ॐ अस्तु कल्याणम् ॥ एवं त्रिः ॥ ऋक्—ॐ अपाःसोममस्तमिन्द्रप्रयाहिकल्याणीर्जायासुरणंगृहेतें ॥ यत्राराथस्यबृहतोनिधानंविमोचनंवाजिनोदक्षिणावत् ॥ ३$\frac{20}{3}$ ॥ यजुः—ॐ वयेमांवाचंकल्याणीमावदानिजनेभ्य६ ॥ ब्रह्मराजन्याभ्याꣳशूद्रायचार्य्यायचस्वायचारणायच ॥ प्रियोदेवानान्दक्षिणायैदातुरिहभूयासमयम्मेकाम६ समृद्धयतामुपमादोनमतु ॥ $\frac{2}{26}$ ॥

CC-0. Prof. V. Narain. Digitization by eGangotri/Sarayu Trust. Funding by MoE-IKS-Grant-2

©Kirtikant Sharma Collection, Najafgarh

ब्राह्मणम्—ॐ॒अ॒था॒ध्व॒र्यो॑ऽ॒तिग॑रो॒रात्सु॒रिमे॑ब॒जमा॑नाभद्र॒मे॑भ्यो॑ब॒जमा॑ने॒भ्यो॑भू॒दि॒तिक॑ल्या॒ण॒मे॒वैत॒न्मा॒नु॒ष्ये॒द्वा॒चो॒वदति ॥ साम—ॐ॒कौ॑ऽ५
या । नश्चा ३ इत्रा ३ आभूवात् । उ । ती स दा वृध स्स । खा । ओ३ हो हाइ । कया २३ शचा इ । प्रुयौ हो ३ । हुम्मा
१२ । वाऽ २ तों ३५ हाइ ॥ वेयगानस्य पञ्चमप्रपाठकस्य प्रथमार्द्धे साम २५ ॥ अथर्वणः—ॐविश्वंजित्क॑ल्या॒ण्यै॒मो॑परि॑दे॒हि ॥
क॑ल्याणि॒द्विपा॒च्च॒सर्वे॑भ्यो॑रक्ष॒चतु॑ष्पा॒द्य॒च्च॒नः॒स्व॒म् ॥ का०६अ०११ सू०१०७ मं०३ ॥ सागरस्य यथा वृद्धिर्महालक्ष्म्यादिभिः कृता । सम्पूर्णा
सुप्रभावा च तां च ऋद्धिं ब्रुवन्तु नः ॥ भो ब्राह्मणाः मह्यं सकुटुम्बिने महाजनान्नमस्कुर्वाणाय आशीर्वचनमपेक्षमाणाय मया क्रियमाणस्य
ग्रहशान्त्याख्यस्य कर्मणः ऋद्धिं भवन्तो ब्रुवन्तु ॥ ॐकर्म ऋद्ध्यताम् ॥ एवं त्रिः ॥ ऋक्—ॐ॒ऋ॒द्ध्या॒म॒स्तोमं॑स॒नु॒या॒म॒वा॒ज॒मा॒नो॒मं॒त्रं॑सु॒र॒थे-
हो॑प॒या॒तम् ॥ य॒ज्ञो॒न॒प॒कं॒म॒धु॒गो॒ष्वं॒त॒रा॒भू॒तां॒शो॑ऽअ॒श्वि॒नो॒ः कामंमप्राः ॥ ८२/६ ॥ यजुः—ॐ॒सं॒त्र॒स्य॒ऽऋ॒द्धि॒र॒स्य॒ग॒न्म॒ज्ज्यो॒ति॒र॒मृ॒ता॑ऽअभूम ॥
दिव॑म्पृथि॒व्याऽअ॒द्ध्या॒रु॒हा॒मा॒वि॒दा॒म॒दे॒वा॒न्त्स्व॒र्ज्यो॑तिं ÷ ॥ ५२/८ ॥ ब्राह्मणम्—ॐ॒तऽउ॒त्त॒र॒स्य॒हु॒वि॒र्धा॒न॒स्य॒ज॒घ॒न्या॒या॒ङ्कु॒र्वा॑ऽ॒सामा॒भि॒गा॒यन्ति
स॒त्र॒स्य॒ऽऋ॒द्धि॒रि॒ति॒रा॒द्धि॒मे॒वैत॒द॒भ्यु॒च्चि॒ष्ठं॒त्यु॒त्त॒र॒वे॒दे॒र्वो॒त्त॒रा॒या॑ऽश्रो॒णा॒वि॒त्त॒रं॒तु॒क्र॒तु॒त्त॒रम् ॥ साम—औ हो वा औ हो वा औ हो ३ वा । अगन्म ज्यो
तिः । अगन्म ज्योतिः । अगन्म ज्योतिः । अमृता अभूम । अमृता अभूम । अमृता अ भू मा । तरिक्षंपृथिव्याअध्यारु हा मा । तरिक्षंपृथिव्याअध्यारु
हा मा । तरिक्षंपृथिव्याअध्यारुहाम । दिवमन्तरिक्षा द्ध्या रुहा म । दिवमन्तरिक्षादध्यारु हाम । दिवमन्तरिक्षा द्ध्या रुहाम ।
अविदाम दे वा न् । अविदाम दे वा न् । अविदाम दे वान् । सम्मु दे वै रगन्महि । सम्मु दे वै रगन्महि । सम्मु दे वै रगन्महि । औ
हो वा । औ हो वा । औ हो ३ वा । सुवर्ज्यो ती २ ३ ४ ५ः ॥ आरण्यगानस्य चतुर्थप्रपाठकस्य प्रथमार्द्धे साम ४ ॥

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथर्वणः—ॐऋधङ्मंत्रोयोनिंयआबभूवायृतासुवर्द्धमानः सुजन्मा ॥ अदब्धासुभ्राजमानोहेवन्निंतोधर्त्तादाधारत्रीणि ॥ का० ५ अ० १ सू० १ मं० १ ॥ स्वस्तिस्तु याऽविनाशाख्या पुण्यकल्याणवृद्धिदा । विनायकप्रिया नित्यं तां च स्वस्तिं ब्रुवन्तु नः ॥ भोब्राह्मणाः मह्यं सकुटुम्बिने महाजनान्नमस्कुर्वाणाय आशीर्वचनमपेक्षमाणाय मया क्रियमाणस्य ग्रहशान्त्याख्यस्य कर्मणः स्वस्तिं भवन्तो ब्रुवन्तु ॥ ॐआयुष्मते स्वस्ति ॥ एवं त्रिः ॥ ऋक्—ॐस्वस्तिरिद्धिप्रपथेश्रेष्ठारेकणस्वत्यभियावाममेतिं ॥ सानोऽअमासोऽअरणेनिपातुस्वावेशाभवतुदेवगोपा ॥ ८२ ॥ यजुः—ॐस्वस्तिनऽइन्द्रोवृद्धश्रवा८स्वस्तिनः÷ पूषाविश्ववेदा८ ॥ स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमि८स्वस्तिनोबृहस्पतिर्दधातु ॥ ११/२५ ॥ ब्राह्मणम्—ॐगातुर्यज्ञायगातुर्यज्ञपतयऽइतिगातुर्देवेषुयज्ञायेच्छतिगातुर्यज्ञपतयेषोवयज्ञस्यसक्त्स्यान्दैवीस्वास्तिरस्तुनःस्वस्तिर्मानुष्येभ्यऽइतिस्वस्तिनोदेवत्रास्तुस्वस्तिर्मानुष्यत्रेत्येवैतदाहोर्ध्वंजिगातुभेषजमित्यूर्ध्वोनोयज्ञोदेवलोकंयजत्वित्येवैतदाहशन्नोऽअस्तुद्विपदेशञ्चतुष्पदऽइत्येतावद्वाऽइदꣳसर्वंयावद्द्विपाचवैचतुष्पाचतस्माऽएवैतद्यज्ञस्यसक्त्स्यांगत्वागुंकरोतितस्मादाहशुन्नोऽअस्तुद्विपदेशंचतुष्पदे ॥ साम—ॐत्रातारमिन्द्रमवितारमिन्द्रꣳहवेहवेसुहवꣳशूरमिन्द्रम् । हुवेनुशक्रंपुरुहूतमिन्द्रम् । इदꣳहवेग्नाःस्वस्तयेनोमघवाबृहद्दातुसत्पतिः ॥ ३४३ इ । तू ३ वा ५ इन्द्रा ६५६ः ॥ वेयगानस्य नवमप्रपाठकस्य प्रथमार्द्धे साम ३ ॥ अथर्वणः—ॐस्वस्तिमात्रउतपित्रेणोऽस्तु स्वस्तिगोभ्योजगतेपुरुषेभ्यः ॥ विश्वंसुभूतंसुविदत्रंनोऽस्तुज्योगेवदृशेमसूर्यम् ॥ का० १अ० ६सू० ३१मं० ४॥ समुद्रमथनाज्जाता जगदानन्दकारिका । हरिप्रिया च माङ्गल्या तां श्रियं च ब्रुवन्तु नः ॥ भोब्राह्मणाः मह्यं सकुटुम्बिने महाजनान्नमस्कुर्वाणाय आशीर्वचनमपेक्षमाणाय मया क्रियमाणस्य ग्रहशान्त्याख्यस्य कर्मणः

---

१ यत्र स्वस्तिशब्दः अव्ययः तत्र क्रियमाणायेति चतुर्थी ॥ यत्र स्वस्तिशब्दः अनव्ययः तत्र तु क्रियमाणस्येति षष्ठी स्यात् । कौमुदीतत्वबोधिनीटीकायां स्वस्तिशब्दो अनव्ययोऽपि ॥ यथा भविष्योत्तरपुराणे—प्रतिगृह्णामि ते धेनुं कुटुम्बार्थे विशेषतः । स्वस्तिर्भवतु मे नित्यं सुखं चानुत्तमं तथा ॥

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding by IKS-MoE-Grant-2
Kirtikant Sharma Collection, Najafgarh

श्रीरस्त्विति भवन्तो ब्रुवन्तु ॥ ॐ अस्तु श्रीः ॥ एवं त्रिः ॥ ऋक्-ॐश्रियेजातःश्रियआनिरियायश्रियंवयोजरितृभ्योदधाति ॥ श्रियंवसानाऽअमृतत्वमाय॒न्भवन्तिसत्यासमिथामितद्दौ ॥ ७/५ ॥ यजुः-ॐमनस॒ऽकाममाकूतिंवाच॒स्सत्यमशीय ॥ पशु॒नाऽरूपमन्नस्यरसोयश॒श्री? श्रयताम्मयिस्वाहा ॥३/५॥ ब्राह्मणम्-ॐतेनोहततऽईजेदक्षऽपावर्तिस्तऽइमेप्येतर्हिदाक्षायणाराज्य॒मिवैवमाप्तारा॒ज्य॒मिवहवैम्राप्नोतिय॒ऽएवंविद्वाने-तेनयज्ञेनय॒जतेतस्माद्वाऽएतेनयजेतस्माऽएकैकऽएवानूचिनाहुं पुरोडाशोभवत्येतेनोहास्यासपत्नानुपबाधाश्रीर्भवति॥साम-ॐश्रायन्तइवसू४रायां। विश्वा ५२ इदिन्द्रा ५२ । स्यभा ५२ क्षाता । वा सू नि जा तो ज निमा । नियोजा१ सा ५२ । प्रतिभा गं नदी २ धिमः । प्रा २३ ती । भागांना ३ दा । हुं । धिमा ३ः । ओ २३४वा । हे २ ३ ४ ५ ॥ वेयगानस्य सप्तममप्पाठकस्य द्वितीयार्द्धे साम ५॥ अथर्वणः-ॐपेहयांतुवरुणः सोमोऽअग्निर्बृहस्पतिर्वसुभिरेहयातु ॥ अस्यश्रियमुपसंयांतुसर्वऽउग्रस्यचेतुःसंमनसः सजाताः ॥ काण्ड ६ अनुवाक् ८ सूत्र ७३ मंत्र १ ॥ कृतेऽस्मिन्पुण्याहवाचने न्यूनातिरिक्तो यो विधिः स उपविष्टब्राह्मणानां वचनात् श्रीमहागणपतिप्रसादाच्च सर्वः परिपूर्णोऽस्तु ॥ अस्तु परिपूर्णः ॥ अथाभिषेकः ॥ कर्तुर्वामतः पत्नीम् उपवेश्य पात्रपातितकलशोदकेन अविधुराश्चत्वारो ब्राह्मणा दूर्वाम्रपल्लवैरुदङ्मुखास्तिष्ठन्तः सपत्नीकं यजमानमभिषिञ्चेयुः ॥ तत्रमंत्राः-ॐपर्य॑पृथिव्यांप्य॒ऽओषधीषु॒पयोदिव्य॒न्तरिक्षे॒पयोधाः ॥ पयस्वतीः॒प्रदिश॑सन्तु॒मह्यम् ॥ ३६/३८ ॥ ॐपञ्चनद्य॒ः सर॑स्वतीमपि॒यन्ति॒सस्रो॑तसः ॥ सर॑स्वतीतु॒पञ्च॒धासो॒देशे॑भवत्सरित् ॥ ११/१२ ॥ ॐव्वरुण॒स्योत्त॒म्भन॑मसि॒व॒रुण॑स्यस्कम्भ॒स॒ज्ज॑नी॒स्थो॒व॒रुण॑स्यऽऋत॒सद॑न्यसि॒व॒रुण॑स्यऽऋत॒सद॑नमसि॒व॒रुण॑स्यऽऋत॒सद॑नमासीद ॥ ३/५ ॥ ॐपुनन्तु॒मादेवजना?पुनन्तु॒मनसा॒धिय॑ः॒ ॥ पुनन्तु॒विश्वा॑भू॒तानि॒जात॑वेद॒ः॒पुनी॒हिमा ॥ ३९/१२ ॥ ॐदे॒वस्य॑त्वासवि॒तु?प्स॒वेऽश्वि॑नो॒र्बा॒हु॒भ्या॑म्पू॒ष्णो॒ह॒स्ता॑भ्याम् ॥ सर॑स्वत्यै॒वा॒चोय॒न्तु॒र्य॒न्त्रि॒येद॑धामि॒बृह॒स्पते॒ष्ट्वासाम्रा॑ज्ज्येना॒भिषि॑ञ्चाम्य॒सौ ॥ ३०/९ ॥ ॐदे॒वस्य॑त्वासवि॒तु?प्स॒वेऽश्वि॑नो॒र्बा॒हु॒भ्या॑म्पू॒ष्णो॒ह॒स्ता॑भ्याम् ॥ सर॑स्वत्यै॒वा॒चोय॒न्तु॒र्य॒न्त्रे॒णाग्ने?साम्रा॑ज्ज्येना॒भिषि॑ञ्चामि ॥ ३७/१८ ॥ ॐदे॒वस्य॑त्वासवि॒तु? प्स॒वेऽश्वि॑नो॒र्बा॒हु-

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding by MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ब्भ्यांम्पूष्णोहस्ताभ्याम् ॥ अश्विनोर्भैषज्येनतेजसेब्रह्मवर्च्चसायाभिषिञ्चामिसरस्वत्यैभैषज्येनवीर्य्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रि-येणबलायश्रियैयशसेभिषिञ्चामि ॥ ३/२० ॥ ॐविष्णोर्नुकंदेवसवितर्दुरितानिपरासुव ॥ यद्भद्रन्तन्नऽआसुव ॥ ३/३० ॥ ॐधामच्छद्मगिरिन्द्रोब्रह्मा-देवोबृहस्पतिः ॥ सचेतसोविष्णोवेदेवायज्ञस्यावन्तुन ऽशुभे ॥ ७/१८ ॥ ॐत्वँवर्ष्मविष्ठदाशुषेनॄँ?पाहिशृणुधीगिरः ॥ रक्षातोकमुतत्मना ॥ ५/१३ ॥ ॐअनमीवस्यशुष्मिणः ॥ प्रप्रदातारन्तारिषऽऊर्ज्जमोषेधिहिपदेचतुष्पदे ॥ ८/११ ॥ ॐद्यौ?शान्तिरन्तरिक्षऽशान्तिः पृथिवी-शान्तिरापऽशान्तिरोषधयऽशान्तिः ॥ वनस्पतयऽशान्तिर्विश्वेदेवा?शान्तिर्ब्रह्मशान्तिऽसर्वऽशान्तिऽशान्तिरेवशान्तिऽसामाशान्तिरेधि ॥ ॥ १५/३६ ॥ ॐवतोयतऽसमीहसेततोनोऽअभयंकुरु ॥ शर्म ॥ कुरुप्रजाभ्योभयन्नःपशुभ्यः ॥ २२/३६ ॥ ब्राह्मणम्—ॐपालाशंभवति।तेनब्राह्मणो-भिषिञ्चतिब्रह्मवैपलाशोब्रह्मणैवैनमेतदभिषिञ्चति ॥ औदुंबरंभवति॥ तेनस्वोभिषिञ्चत्यन्नंवाऽऊर्गुदुंबरऽऊर्जैवैस्वंयाबद्वैपुरुषस्यस्वंभवतिनैवतावद-शनायतितेनोर्कस्वंवैतस्मादौदुंबरेणस्वोभिषिञ्चति ॥ नैष्यग्रोधपादंभवतितेनमित्रोराजन्योभिषिञ्चतिपञ्चिवैन्यग्रोधऽप्रतिष्ठितोमित्रेणवैराजन्यः प्रतिष्ठितस्तस्मान्नैष्यग्रोधपादेनमित्रोराजन्योभिषिञ्चति ॥ आश्वत्थंभवति ॥ तेनवैश्योभिषिञ्चतिसयद्देवादोश्वत्थोतिष्ठतऽइन्द्रोमरुतऽउपामंत्रयते तस्मादाश्वत्थेनवैश्योभिषिञ्चति ॥ सुदेवकल्पाऽहोतिप्राणावैकल्पाऽअमृतमुवैप्राणाऽअमृतेनैवैनमेतदभिषिंचाति ॥ सर्वेषांवाऽएषहेदानाऽउ-सोयत्सामसर्वेषामेवैनमेतद्देदानाऽउसेनाभिषिञ्चति ॥ शान्तिः शान्तिः सुशान्तिर्भवतु ॥ स्वस्थाने उपविश्य हस्ते जलं गृहीत्वा—अभिषेककर्तृकेभ्यो ब्राह्मणेभ्यो यथोत्साहदक्षिणां दास्येतेनश्रीकर्माधीशःप्रीयताम् ॥ ततः पुत्रवतीभिर्वृद्धसुवासिनीभिर्नीराजनं कार्यम् ॥ तस्यमंत्रः—ॐअनाधृष्टा पुरस्तादन्वेराधिपत्त्यऽआयुर्म्मेदाऽपुत्रवतीदक्षिणतऽइन्द्रस्याधिपत्त्येप्रजाम्मेदाऽसुषदापश्चाद्वेवस्यसवितुराधिपत्त्येचक्षुर्म्मेदाऽआश्रुतिरुत्तरतो-धातुराधिपत्त्येरायस्पोषम्मेदाऽ ॥ ध्रुवाधृतिरुपरिष्टाद्बृहस्पतेराधिपत्त्यऽओजोमेदाविश्वान्भ्योमानाष्टाभ्यस्प्राद्दिमनोरश्वांसि ॥ १२/३७ ॥ अनेन पुण्याहवाचनेन कर्माङ्गदेवताः श्रीआदित्यादिनवग्रहाः प्रीयन्ताम् ॥ इति पुण्याहवाचनप्रयोगः ॥

॥ अथ मातृकापूजनप्रयोगः ॥

सीमन्तोन्नयनेचूडाकरणेऽपनयनेकेशान्तेविवाहेइतिपञ्चसुमण्डपसत्त्वात्तत्रषड्विनायकादिधृतमातृकान्तानांपूजनंकार्यं॥मण्डपाभावेतुसगणाधिपगौर्यादिचतुर्दशमातॄणांसप्तघृतमातॄणांचपूजनंकार्यम् ॥ तत्रादौवैश्वदेवंकुर्यात् ॥ तदकरणेसङ्कल्पः—इदंवैश्वदेवहवनीयद्रव्यंसदक्षिणाकमत्रावसरेवैश्वदेवाकरणजनितप्रत्यवायपरिहारार्थंकरणजनितफलप्राप्त्यर्थंअमुकशर्मणेब्राह्मणायविष्णुरूपायतुभ्यमहंसंप्रददे ॥अनेनवैश्वदेवकरणजनितफलसिद्धिरस्तु॥ततोगोधूमादिधान्यपूरितेहरिद्रादिरञ्जितेमृन्मयेअविघ्नाख्यकलशेमोदादिषड्विनायकानांप्रतिमाःकुंकुमादिनालिखित्वा। आवाहनम्-ॐमोदायनमःमोदंआवाहयामि ॥ ॐप्रमोदायनमःप्रमोदंआवाहयामि॥ ॐसुमुखाय नमःसुमुखंआवाहयामि॥ ॐदुर्मुखायनमःदुर्मुखंआवाहयामि॥ ॐअविघ्नायनमःअविघ्नंआवाहयामि ॥ ॐविघ्नकर्त्रेनमःविघ्नकर्तारंआवाहयामि॥प्रतिष्ठापनम्—ॐमनोजूति०ॐभूर्भुवःस्वःमोदादिषड्विनायकाःसुप्रतिष्ठितावरदाभवत ॐमोदादिषड्विनायकेभ्योनमइतिषोडशोपचारैःसंपूज्य अनयापूजयामोदादिषड्विनायकाः प्रीयन्ताम् इत्यविघ्नंपूजनम् ॥ अथमण्डपदेवतापूजनम् ॥ तत्रमण्डपस्तम्भनिवेशनार्थंगर्तखननंतद्यथा—वृषाद्राशित्रयेस्थितेसूर्येसतिआग्नेय्याम्॥ सिंहाद्राशित्रयेईशान्याम् ॥ वृश्चिकाद्राशित्रयेवायव्याम् ॥ कुंभाद्राशित्रयेनैर्ऋत्याम् ॥ एवंगर्तखननार्थंस्थाननिश्चयंकृत्वानिश्चितकोणसमीपेसभार्योयजमानः पूर्वाभिमुखउपविश्य हस्तेजलमादायअमुकशर्मणोममसुतस्यवासुतायाः करिष्यमाणअमुकसंस्काराङ्गभूतस्थंडिलादिकर्तुंभूमिकूर्मानन्तवराहाणांपूजनपूर्वकंमण्डपदेवता

---

१ बहिःशालागृहादहिर्मंडपइत्यर्थः। पा०गृ० सूत्रे—पञ्चसुबहिःशालायांविवाहेचूडोपनयनेकेशान्तेसीमन्तोन्नयने ॥२ अविघ्नोमंडपश्चैवमातॄणांपूजनंसकृत् । वैश्वदेववंसोर्द्धानान्दीश्राद्धमतःपरम् ॥ अविघ्नपूजनात्पूर्ववैश्वदेवंविधायच ॥३ संक्षेपतःकरणेषड्विनायकादिधृतमातृकान्तानांचतुःषष्टिमातॄणामेकतंत्रेणावाहनादिपूजनान्तंकार्यम्॥ वस्तुतस्तुपृथक्पृथक् पूजनमेवश्रेष्ठतरम् ॥४ मोदश्चैवप्रमोदश्चसुमुखोदुर्मुखस्तथा । अविघ्नोविघ्नकर्ताचषडेतेविघ्ननायकाः ॥५ वृषादित्रयेवह्निकोणेशुभंस्यात्तथासिंहकादित्रयेचेशकोणे ॥ मवेद्वृश्चिकादित्रयेवायुकोणेघटादित्रयेनिर्ऋतौसातमाहुः ॥ एवंकोणनिश्चयंकृत्वाचतुर्हस्तंषड्हस्तंअष्टहस्तंवासमचतुरस्रंमण्डपं कृत्वा निश्चितकोणे गर्तं खनेत् ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्थापनप्रतिष्ठापूजनंकरिष्ये ॥ भूरसीत्यस्यप्रस्तारपंक्तिरृषिः अनुष्टुप्छन्दः भूमिर्देवताभूमिपूजनेविनियोगः ॥ ॐ भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री ॥ पृथिवीं यच्छ पृथिवीन्दृंह पृथिवीमा हिꣳसीः ॥ १५/१३ ॥ ॐ भूम्यै नमः भूमिं आवाहयामि ॥ ॐ भूम्यै नमः इत्यनेनदीपसमर्पणान्तंपूजनंकृत्वाततःबलिदानम्—ॐ भूरसि० भूम्यैसाङ्गायैसपरिवारायैसायुधायैससशक्तिकायैनमः इदं यथोपनीतं पायसादिनानाविधबलिं समर्पयामि ॥ भोभूमेइमंबलिंभक्षभक्षसर्वदुष्टेभ्योमांसपरिवारंरक्षरक्षममगृहे आयुःकर्त्रीपुष्टिकर्त्रीतुष्टिकर्त्रीशान्तिकर्त्रीवरदाभव ॥ ततःनैवेद्यंआचमनं फलताम्बूलहिरण्यदक्षिणांचसमर्प्यअर्घ्यंदद्यात् ॥ताम्रपात्रेगन्धपुष्पाक्षतफलहिरण्यदूर्वादिसहितंजलंगृहीत्वाजानुभ्यामवनिंगत्वा—आगच्छसर्वकल्याणिवसुवेलोकधारिणि । पृथिवित्रह्मदत्तासिकाश्यपेनाभिवन्दिता ॥ उद्धृतासिवराहेणसशैलवनकानना । मण्डपंकारयाम्यद्यत्वदूर्ध्वंशुभलक्षणम् ॥ गृहाणार्घ्यमिमंदेविप्रसन्नावरदाभव ॥ भूम्यैसाङ्गायैसपरिवारायैसायुधायैससशक्तिकायैनमः इदं अर्घ्यंसमर्पयामि ॥ अघ्यान्तेआचमनंमदक्षिणांआरार्तिक्यंचकृत्वामंत्रपुष्पाञ्जलिः—नन्दनन्दयवासिष्ठेवसुधेपूजयाम्यहं । जयेभार्गवदायादेप्रजानां जयमावह ॥ पूर्णेगिरीशदायादेपूर्णकामं कुरुष्वमे । भद्रेकाश्यपदायादेकुरुभद्रांमतिंमम ॥ ब्रह्मणानिर्मितेदेविविष्णुनाशङ्करेणच । पार्वत्याचैवगायत्र्यास्कंदवैश्रवणेनच ॥ यमेन पूजितेदेविधर्मस्यविजिगीषया । सौभाग्यंदेहिपुत्रांश्चधनंरूपंचपूजिता ॥ भूम्यैनमः मंत्रपुष्पाञ्जलिंसमर्पयामि ॥ अनयापूजयाभूमिःप्रीयताम् ॥ यस्यकूर्मेत्यस्य प्रजापतिरृषिः अनुष्टुपछन्दः कूर्मोदेवताकूर्मपूजनेविनियोगः ॥ ॐ यस्यकूर्मोगृहेहविस्तमग्नेवर्द्धयात्वम् ॥ तस्मैदेवाऽअधिब्रुवन्नयञ्जुब्रह्मणस्पतिः ॥ १५२/१७ ॥ ॐ कूर्मायनमः कूर्मंआवाहयामि ॥ ॐ कूर्मायनमः इत्यनेनमंत्रेणषोडशोपचारैःसंपूज्य ॥ अनन्तपूजनम्—स्योनापृथिवीत्यस्यमेधातिथिरृषिः अनन्तोदेवतागायत्रीछन्दः अनन्तपूजनेविनियोगः—ॐ स्योनापृथिविनोभवानृक्षरानिवेशनी ॥ यच्छानः शर्म्मसप्रथाः ॥ १३/३६ ॥ ॐ अनन्तायनमः अनन्तंआवाहयामि ॥ ॐ अनन्तायनमः इत्यनेनमंत्रेणषोडशोपचारैःसंपूज्य ॥ ततःॐ वराहायनमः इत्यनेनमंत्रेणवराहंषोडशोपचारैःपूजयेत् ॥ ततः अभिग्रहणम्—देवस्यत्वेत्यस्यदधीचऋषिःनिच्यृदार्ष्युष्णिक्छन्दःअभिर्देवताअभिग्रहणे विनियोगः ॥ ॐ देवस्यत्वासवितुः प्रसवेश्विनोर्बा-

Shirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding by MoE-Grant-2

हुन्भ्यांम्पुष्णोहस्ताभ्याम् ॥ आददेनारिरसि ॥ ९/३७ ॥ इत्यनेनअभ्रिमादायततःखननम्—ॐमावोरिषत्खनितायस्मैचाहङ्कनामिवꣳ॥ द्विपाच्चतुष्पादस्माकꣳसर्वमस्त्वनातुरम् ॥ १५/१२ ॥ इत्यनेनगर्तेखनित्वातस्मिन्गर्तेजलसेचनम्—ॐसिञ्चन्तिपरिषिञ्चत्युत्सिञ्चन्तिपुनन्तिच ॥ सुरायैबब्भ्रवेमदेकिन्त्वोवदतिकिन्त्व? ॥ २८/२० ॥ इत्यनेनजलंनिक्षिप्य । यवनिक्षेपः-ॐयवोसियवयास्मद्वेषोयवयारातीꣳ ॥ ३६/८ ॥ इत्यनेनयवान्निक्षिप्यदर्भसिद्धार्थकाँस्तूष्णीन्निक्षिपेत् ॥ दूर्वाप्रक्षेपणम्—ॐकाण्डात्काण्डात्प्ररोहन्ती० ॥ ३०/१३ ॥ इत्यनेनदूर्वाङ्कुरान्क्षिप्त्वादधिप्रक्षेपः—ॐदधिक्राव्णो० ॥ ३२/२३ ॥ फलप्रक्षेपः—ॐयाꣳफलिनी० ॥ ८१/१२ ॥ हिरण्यप्रक्षेपः—ॐहिरण्यगर्भः? ० ॥ ४/१३ ॥ इत्यनेनहिरण्यंनिक्षिप्यस्तंभोच्छ्रयणम्—ॐउच्छ्रयस्ववनस्पतऽऊर्ध्वोमापाह्यꣳहसऽआस्यंयज्ञस्योदर्चं ÷ ॥ १०/३ ॥ इत्यनेनरक्तसूत्रमदनफलबद्धस्तम्भमुत्थाप्यरोपणम्—ॐऊर्ध्वऽऊषुणऽऊतयेतिष्ठादेवोनसविता ॥ ऊर्ध्वोवाजस्यसनितायदञ्जिभिर्वाघद्भिर्विह्वयामहे ॥ २३/२१ ॥ इत्यनेनगर्ते स्तम्भंनिधायस्थिरीकरणम्—ॐस्थिरोभववीड्वङ्गऽआशुर्भववाज्यर्वन् ॥ पृथुर्भवसुषदस्त्वमग्ने? पुरीषवाहणꣳ ॥ २२/२१ ॥ इत्यनेनसमंततोमृदास्थिरीकृत्यअन्यस्तंभानयथास्थानेरोपयेत् ॥ ततःमण्डपमातृकाःस्थापयेत् ॥ तत्रआचार्यहस्तेसुमोक्षितादिकंकार्ययथा—अत्राःपान्तुसुमोक्षितमस्त्वितिभवन्तोब्रुवन्तु ॥ ॐअत्राः पान्तुसुमोक्षितमस्तु ॥ गन्धाः पान्तुसौमङ्गल्यंचास्त्वितिभवन्तोब्रुवन्तु ॥ ॐगन्धाः पान्तुसौमङ्गल्यंचास्तु ॥ अक्षताः पान्तुआयुष्यमस्त्वितिभवन्तोब्रुवन्तु ॥ ॐअक्षताःपान्तुआयुष्यमस्तु ॥ पुष्पाणिपान्तुसौश्रियमस्त्वितिभवन्तोब्रुवन्तु ॥ ॐपुष्पाणिपान्तुसौश्रियमस्तु ॥ ताम्बूलानिपान्तुऐश्वर्यमस्त्वितिभवन्तोब्रुवन्तु ॥ ॐताम्बूलानिपान्तुऐश्वर्यमस्तु ॥ दक्षिणाःपान्तुबहुधनमस्त्वितिभवन्तोब्रुवन्तु ॥ ॐदक्षिणाःपान्तुबहुधनमस्तु ॥ अपूपाःपान्तुबह्वन्नंचास्त्वितिभवन्तोब्रुवन्तु ॥ ॐअपूपाःपान्तुबह्वन्नंचास्तु ॥ शाखादूर्वाःपान्तुशाखापल्लवानांवृद्धिरस्त्वितिभवन्तोब्रुवन्तु ॥ ॐशाखादूर्वाःपान्तुशाखापल्लवानांवृद्धिश्चास्तु ॥ तत आचार्येण दूर्वाशम्याम्रादिप्रशस्तवृक्षपत्राणांरक्तसूत्रेणपृथक्पृथक्पञ्चधावेष्टनंकार्यम् ॥ तासांमण्डपमातृसंज्ञा ॥ तासांमण्डपमातॄणांएकस्मिन्पात्रेस्थापनम् ॥ यजमानपत्न्याशाखासुतैलारोपणम् ॐवसोःपवित्रमसिशतधारंवसोःपवित्रमसिसहस्रधारम् ॥ देवस्त्वासवितापुनातुवसोःपवित्रेणशतधारे-

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

णसुप्त्वाकामंधुक्षं ॥ ३/१ ॥ शाखासुहरिद्राकुंकुमादिसुगन्धिद्रव्येणोद्वर्तनम्—ॐअहिरिवभोगै?पर्य्येतिबाहुञ्जयाहेतिम्परिबाधमानं ॥ हस्तग्नो-
विश्वाह्यनानिविद्वान्पुमान्पुमांꣳसम्परिपातुविश्वतं÷ ॥ ५/१/१ ॥ उष्णोदकेनशाखास्नपनम्—ॐनिकामेनिकामेन÷पर्ज्जन्योवर्षतुफलवत्योन꣡ओ-
षधय÷पच्यन्तांयोगक्षेमोन÷कल्पताम् ॥ २/२/२ ॥ शाखासुदध्यक्षतप्रक्षेपः—ॐदुधिक्राव्णोऽअकारिषञ्जिष्णोरश्वस्यवाजिनं÷॥ सुरभिनोमुखा-
करत्प्रणऽआयूꣳषितारिषत् ॥ ३/३/३ ॥ यजमानेनशाखैकग्रहणम्—ॐवाऽओषधी÷पूर्वाजाताद्देवेभ्यस्त्रियुगम्पुरा ॥ मनैनुवब्भ्रूणामहश्शतन्धामानि-
सप्तच ॥ ५/१/२ ॥ अनेनमंत्रेणसंगृह्यतस्याःशाखायाःमण्डपस्याग्नेयस्तम्भेस्थिरीकरणम्—ॐस्थिरोभववीड्वङ्गऽआशुर्भववाज्यर्वन् ॥ पृथुर्भवसुषदस्त्व-
मग्ने?पुरीषवाहण÷ ॥ ५/१/१ ॥ ततःद्वितीयशाखाग्रहणम्—ॐवाऽओषधी÷ ॥ अनेनमंत्रेणसंगृह्यतस्याःनैर्ऋत्यस्तम्भेस्थिरीकरणम्—ॐस्थिरोभव०॥
ततस्तृतीयशाखाग्रहणम्—ॐवाऽओषधी÷॥ अनेनमंत्रेणसंगृह्यतस्याःवायव्यस्तम्भेस्थिरीकरणम्—ॐस्थिरोभव०॥ ततःचतुर्थीशाखाग्रहणम्—
ॐवाऽओषधी÷॥ अनेनमंत्रेणसंगृह्यतस्याःईशानस्तम्भेस्थिरीकरणम्—ॐस्थिरोभव०॥ एवंमण्डपकोणस्तंभेषुचतस्रःस्थिरीकृत्य ॥ ततःयजमा-
नपत्न्यायद्वियद्दक्षसमिधोपेतापञ्चमीशाखाग्रहणम्—ॐवाऽओषधी÷॥ अनेनमंत्रेणसंगृह्यतस्याःकण्डनम्—ॐकाण्डात्काण्डात्प्ररोहन्तीपरुष÷
परुष्परिं ॥ एवानोदूर्व्वेप्रतनुसहस्रेणशतेनच ॥ ३/१/३ ॥ सकृन्मंत्रेणद्विस्तूष्णीम् ॥ एवंत्रिःकण्डनम् ॥ तस्याःमण्डपमध्येस्तंभोपरिस्थिरीकरणम्—
ॐस्थिरोभव०॥ ततःशाखास्तंभेनन्दिन्यादिपञ्चमातॄणांस्थापनंतत्रायंक्रमः॥ आग्नेयस्तंभे—ॐनन्दिन्यैनमःनन्दिनींआवाहयामि॥ नैर्ऋत्यस्तम्भे—
ॐनलिन्यैनमःनलिनींआवाहयामि ॥ वायव्यस्तम्भे—ॐमैत्रायैनमःमैत्रांआवाहयामि ॥ ईशानस्तम्भे—ॐउमायैनमःउमांआवाहयामि ॥ मण्डपम
ध्यस्तम्भे—ॐपशुवर्धिन्यै नमः पशुवर्धिनीं आवाहयामि ॥ प्रतिष्ठापनम्—ॐमनोजूति०॥ नन्दिन्यादिमातरः सुप्रतिष्ठिताः वरदाः भवत ॥ ॐभूर्भुवः
꣡ः नन्दिन्यादिमण्डपमातृभ्योनमः इत्यनेन षोडशोपचारैः पूजयेत् ॥ अनया पूजया नन्दिन्यादिमण्डपमातरः प्रीयन्ताम् ॥

१ नंदिनी नलिनी मैत्रा उमा च पशुवर्धिनी । आग्नेयादिक्रमेणैव शाखास्तम्भे प्रतिष्ठिताः ।

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding by MoE-Grant-2

Kanhaiya Nandlal Collection, Najafgarh

अथ गौर्यादिमातॄणां पूजनम्॥ वंशपात्रे वा पीठोपरि रक्तं पीतं वा वस्त्रं यथाचारं प्रसार्यतदुपरिगोधूमाक्षतपुञ्जेषुपूगीफलेषुवासगणाधिपगौर्यादि-चतुर्दशमातॄणांदीक्षणोपक्रमाणांउदगपवर्गाणांप्रत्यगुपक्रमाणांप्रागपवर्गाणांवास्थापनम्॥ ॐगणानान्त्वा० ॥$\frac{2}{5}\frac{3}{5}$॥ ॐगणेशायनमःगणेशंआवाह-यामिस्थापयामि। भोगणपतेइहागच्छइहतिष्ठ॥ ॐआयङ्गौ?पृश्निरक्रमीदसदन्क्रमातरम्पुर?॥ पितरञ्चप्रयंतस्त्व÷॥$\frac{6}{5}$॥ ॐभूर्भुवःस्वःगौर्यैनमःगौ-रींआवाहयामिस्था०॥ भोगौरिइहागच्छइहतिष्ठ॥१॥ ॐहिरण्यरूपाऽउषसोविरोकऽउभाविन्द्राऽउदिथ८सूर्य्यश्च॥ आरोहतंवरुणमित्रगर्तन्ततश्चक्षाथामदितिन्दितिंञ्चमित्रोसित्रवरुणोसि॥$\frac{16}{15}$॥ ॐभूर्भुवःस्वःपद्मायैनमःपद्मामावाहयामिस्था०॥ भोपद्मेइहागच्छइहतिष्ठ॥ २॥ ॐकुदाचनस्त-रारसिनेन्द्रसश्चसिदाशुषे॥ उपोषेन्नुमघवन्भूयऽइन्नुतेदानन्देवस्यपृच्यतऽआदित्येभ्यस्त्वा॥$\frac{3}{2}$॥ ॐभूर्भुवःस्वःशच्यैनमःशचीमावाहयामिस्था-प०॥ भोशचिइहागच्छइहतिष्ठ॥३॥ ॐमेधाम्मेवरुणोददातुमेधामग्निःप्रजापतिः॥ मेधामिन्द्रश्चवायुश्चमेधान्धाताददातुमेस्वाहा॥$\frac{15}{5}$॥ ॐभूर्भुवः स्वःमेधायैनमःमेधामावाहयामिस्था०॥ भोमेधेइहागच्छइहतिष्ठ॥४॥ ॐउपयामगृहीतोसिसावित्रोसिचनोधाश्चनोधाऽअसिचनोमयिधेहि॥ जि-ष्णवेत्वाजिष्णुवेत्वाजिष्णुपतिम्भगायदेवायंत्वासवित्रे॥$\frac{1}{2}$॥ ॐभूर्भुवःस्वःसावित्र्यैनमःसावित्रींआवाहयामिस्था०॥ भोसावित्रिइहागच्छइहतिष्ठ॥५॥ ॐविज्ज्यन्धनुःकपर्दिनोविशल्योबाणवाँ२उत॥ अनेशन्नस्यायाऽइषवऽआभुरस्यनिषङ्गधिः?॥$\frac{10}{15}$॥ ॐभूर्भुवःस्वःविजयायैनमःविजयांआवा-हयामिस्था०॥ भोविजयेइहागच्छइहतिष्ठ॥६॥ ॐवातेरुद्रशिवातनूरघोरापापकाशिनी॥ तयानस्तन्वाशन्तमयागिरिशन्ताभिचाकशीहि॥$\frac{3}{16}$॥ ॐभूर्भुवःस्वः जयायैनमः जयांआवाहयामिस्था०॥ भोजयेइहागच्छइहतिष्ठ॥७॥ ॐदेवानांम्भद्रासुमतिर्ऋजूयतान्देवानाँरातिरभिनोनिवर्त्त-

---

१ गौरी पद्मा शची मेधा सावित्री विजया जया। देवसेना स्वधा स्वाहा मातरो लोकमातरः॥ धृतिः पुष्टिस्तथा तुष्टिरात्मनःकुलदेवता। गणेशेनाधिकाह्येता वृद्धौ पूज्याश्चतुर्दश॥ अत्र चतुर्दशपदसमाहारान्मातरोलोकमातर इति सर्वासां विशेषणम्॥केचन मातृःलोकमातरपि आवाहयन्ति तदयुक्तं एवं करणे मण्डपे षड्विनायकादि-धृतमातृकान्तानांचतुःषष्टिमातणां स्थाने षट्षष्टिमातरः भवन्ति वस्तुतस्तु चतुःषष्टिरेव॥

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

ताम् ॥ देवानाꣳसक्त्व्यमुपसेदिमाव्वयन्देवान्नऽआयुꣳप्रतिरन्तुजीवसे ॥ १५/५ ॥ ॐभूर्भुवःस्वःदेवसेनायैनमःदेवसेनांआवाहयामिस्थापयामि ॥ भो देवसेनेइहागच्छइ०॥८॥ॐपितृभ्यः÷स्वधायिभ्यः÷स्वधानमः÷पितामहेभ्यः÷स्वधायिभ्यः÷स्वधानमꣳपपितामहेभ्यꣳस्वधायिभ्यः÷स्वधानमः÷॥ अक्षन्निपितरोमीमदन्तपितरोतीतृपन्तपितरःपितरꣳशुन्धध्वम् ॥ ३६/१९ ॥ ॐभूर्भुवःस्वःस्वधायैनमःस्वधांआवाहयामिस्थापयामि॥ भोस्वधेइ०इहतिष्ठ ॥९॥ ॐस्वाहायज्ञमनसꣳस्वाहाद्यारोरन्तरिक्षात्स्वाहाद्यावापृथिवीभ्याꣳस्वाहाद्यावातादारंभेस्वाहा ॥ ६/१ ॥ ॐभूर्भुवःस्वःस्वाहायैनमःस्वाहां आवाहयामिस्थापयामि ॥ भोस्वाहेइहागच्छइहतिष्ठ ॥१०॥ ॐधृष्टिरस्यपाग्नेऽअग्निमामादꣳह्यहिनिष्क्रव्यादꣳसेधादेवयजंवह ॥ ध्रुवमसिपृथिवीन्दꣳ हव्रह्मवनित्वाक्षत्रवनिंसजातवन्युपदधामिब्रह्मवर्त्तस्यवर्धाय ॥ १७/१ ॥ ॐभूर्भुवःस्वःधृत्यैनमःधृतिमावाहयामिस्थापयामि॥ भोधृतेइहागच्छइह-तिष्ठ ॥११॥ ॐत्वष्टुरीपोऽअद्भुतऽइन्द्राग्नीपुष्टिवर्द्धना ॥ द्विपदाच्छन्दऽइन्द्रियमुक्षागौर्न्नवयोदधुꣳ ॥ २०/२१ ॥ ॐभूर्भुवःस्वः पुष्टयैनमःपुष्टिमावाहया मिस्थापयामि ॥ भोपुष्टेइहागच्छइहतिष्ठ ॥१२॥ ॐवृहꣳस्पतेऽअतियदर्य्योऽअर्हाद्द्युमद्विभातिक्रतुमज्जनेषु॥ यद्दीदयच्छवसऽऋतप्रजातातदस्मा-सुद्रविणन्धेहिचित्रम् ॥ ३/१८ ॥ ॐभूर्भुवःस्वःतुष्टयैनमःतुष्टिमावाहयामिस्थापयामि॥ भोतुष्टेइहागच्छइहतिष्ठ ॥१३॥ॐअम्बेऽअम्बिकेऽम्बालिकेनमा नयतिकश्चन॥ससस्त्यश्वकꣳसुभद्रिकाङ्काम्पीलवासिनीम् ॥ १८/२३ ॥ ॐभूर्भुवःस्वःआत्मनःकुलदेवतायैनमःआत्मनःकुलदेवतामावाहयामिस्थापयामि भोआत्मनः कुलदेवतेइहागच्छइहतिष्ठ ॥१४॥ ॐमनोजूति०ॐभूर्भुवः स्वः सगणाधिपगौर्यादिमातरः सुप्रतिष्ठिताः वरदाः भवत ॥ ॐभूर्भुवःस्वः सगणाधिपगौर्यादिमातृभ्योनमः इत्यनेन षोडशोपचारैःसम्पूजयेत् ॥

अथमत्स्यादिसप्तजलमातॄणांपूजनम्–ताम्रपात्रेप्रभूतजलꣳसम्पूर्यतत्रस्थापनंवाप्रभूतजलपूरितमणिकपात्रेअक्षतपुञ्जेपुवास्थापनम्। १ॐमत्स्यै नमःमत्सींआवाहयामि।२ ॐकूर्म्यैनमःकूर्मीआवाहयामि।३ॐवाराह्यैनमःवाराहींआवाहयामि।४ॐमाण्डुक्यैनमःमाण्डुकींआवाहयामि॥५ॐमकर्यै

१ मत्सी कुर्मी च वाराही माण्डुकी मकरी तथा । ग्राहकी क्रौंचकी चैव सप्तैता जलमातरः ॥

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नमः मकरींआवाहयामि। ६ॐग्राह्यैनमःग्राहकींआवाहयामि। ७ॐक्रौञ्चक्यैनमःक्रौञ्चक्रींआवाहयामि ॥ ॐमनोजूति० ॐभूर्भुवःस्वःमत्स्यादि-सप्तजलमातरः सुप्रतिष्ठिताः वरदाः भवत॥ ॐभूर्भुवःस्वः मत्स्यादिसप्तजलमातृभ्योनमः इत्यनेन षोडशोपचारैः पूजयेत् ॥

अथब्राह्म्यादिसप्तस्थलमातृणांपूजनम् १ॐब्राह्म्यैनमः ब्राह्मीं आवाहयामि २ॐमाहेश्वर्यैनमः माहेश्वरीं आवाहयामि ३ॐकौमार्यैनमः कौमारींआवाहयामि ४ॐवैष्णव्यैनमः वैष्णवीं आवाहयामि ५ॐवाराह्यैनमः वाराहीं आवाहयामि ६ ॐइन्द्राण्यैनमः इन्द्राणीं आवाहयामि ७ॐचामुण्डायैनमः चामुण्डां आवाहयामि। ॐमनोजूति० ॐभूर्भुवः स्वः ब्राह्म्यादिसप्तस्थलमातरः सुप्रतिष्ठिताः वरदाः भवत ॐभूर्भुवःस्वः ब्राह्म्यादिसप्तस्थलमातृभ्यो नमः इत्यनेन षोडशोपचारैः सम्पूजयेत् ॥

अथजयन्त्यादिपञ्चद्वारमातृणांपूजनम्। द्वारदक्षिणभागे१ॐजयन्त्यैनमः जयन्तीं आवाहयामि २ॐमङ्गलायै नमः मङ्गलां आवाहयामि। ३ ॐपिङ्गलायै नमःपिङ्गलां आवाहयामि । ततःद्वारवामभागे—४ॐआनन्दवर्धिन्यै नमः आनन्दवर्धिनीं आवाहयामि ॥ ५ॐमहाकाल्यैनमः महाकालीं आवाहयामि ॥ ॐमनोजूति०ॐभूर्भुवःस्वः जयन्त्यादिपञ्चद्वारमातरः सुप्रतिष्ठिताः वरदाः भवत ॥ ॐभूर्भुवःस्वः जयन्त्यादिपञ्चद्वारमातृभ्योनमः इत्यनेन षोडशोपचारैःसम्पूजयेत् ॥

अथकीर्त्यादित्रयोदशगृहमातृणांपूजनम्। रक्तवस्त्रप्रसारितशूर्पेअक्षतपुञ्जेषु—१ॐकीर्त्यैनमःकीर्तिंआवाहयामि२ॐलक्ष्म्यैनमःलक्ष्मींआवाहयामि३ॐधृत्यैनमःधृतिंआवाहयामि४ॐमेधायैनमःमेधांआवाहयामि५ॐपुष्ट्यैनमःपुष्टिंआवाहयामि६ॐश्रद्धायैनमःश्रद्धांआवाहयामि ७ॐक्रियायैनमः क्रियांआवाहयामि ८ ॐमत्यैनमःमतिंआवाहयामि ९ ॐबुद्ध्यैनमःबुद्धिंआवाहयामि १० ॐलज्जावपुषेनमः लज्जावपुषंआवाहयामि

१ ब्राह्मामाहेश्वरीचैवकौमारीवैष्णवीतथा । वाराहीचतथेन्द्राणीचामुण्डासप्तमातरः ॥ २ जयन्तीमङ्गलाचैवपिङ्गलादक्षिणेगृहात् । आनन्दवर्द्धिनीवामेमहाकालीचनिर्गमे ॥ गृहस्यदक्षिणेभागेतिस्रोलेख्यास्तुमातरः । वामभागेतथाद्वेचजयन्त्यादिक्रमेणतु ॥ ३ कीर्तिर्लक्ष्मीर्धृतिर्मेधापुष्टिःश्रद्धाक्रियामतिः । बुद्धिर्लज्जावपुःशान्तिस्तुष्टिःकान्तिस्तुमातरः ॥

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

११ ॐ शान्त्यैनमः शान्तिमावाहयामि १२ ॐ तुष्ट्यैनमः तुष्टिमावाहयामि १३ ॐ कान्त्यैनमः कान्तिमावाहयामि॥ ॐ मनोजूति० ॐ भूर्भुवः स्वः कीर्त्यादित्रयोदशग्रहमातरः सुप्रतिष्ठिताः वरदाः भवत। ॐ भूर्भुवः स्वः कीर्त्यादित्रयोदशग्रहमातृभ्योनमः इत्यनेन षोडशोपचारैः सम्पूजयेत् ॥

अथऋर्यादिसप्तवसोर्द्धारापूजनम्--पात्रस्थेनविलीनेनसगुडेनघृतेनमातृणांसंनिहितकुड्यलग्नाः दक्षिणाद्युदगपवर्गाःपश्चिमादिप्रागपवर्गाःनातिनीचानचोच्छ्रिताः सप्तवसोर्द्धाराः कर्तव्याः-ॐ वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम्॥ देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा॥ ३/१॥ नमोस्तुवसुमातृभ्योघृतमातृभ्यएवच। स्वयङ्गकार्यसिद्धयर्थधारांदास्यामिमातरः॥ इत्यनेनसप्तधारांकृत्वातदःशिष्टाचारात्ऊर्ध्वभागेगुडेनैकीकरणम्-ॐ काम धुक्ष॥ ३/१॥ श्रीपूर्वसप्तमातृभ्योघृतमातृभ्यएवच। गुडेनमेलयिष्यामिताःसर्वार्थप्रसाधिकाः॥ इत्यनेनैकीकृत्यकुङ्कुमादिनाबिन्दुकरणेनालक्तकृत्यप्रतिधारायामेकैकदेवतामावाहयेत्-ॐ मनस काममाकूतिं वाचः सत्यमशीय॥ पशूनाꣳरूपमन्नस्यरसोयज्ञꣳश्रीः श्रयताम्मयि स्वाहा॥ ४/३२॥ ॐ भूः० श्रियैनमः श्रियंआवाहयामि १[1] श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम्॥ इष्णन्निषाणामुम्मऽइषाणसर्वलोकम्मऽइषाण॥ ३३/३१॥ ॐ भूः० लक्ष्म्यैनमः लक्ष्मींआवाहयामि २ ॐ हरितंहिरण्यरमद्भ्यंहिधृतिंहिस्वधृतिꣳस्वाहा॥ उपसुजन्धुरुणम्मात्रेधुरुणोमातरन्धयन्॥ रायस्पोषम्मस्मासुदीधरत्स्वाहा॥ ५१/८॥ ॐ भूः० धृत्यैनमः धृतिंआवाहयामि ३ ॐ मेधाम्मेवरुणोददातुमेधामग्निः पुजापतिꣳ॥ मेधामिन्द्रश्चवायुश्चमेधान्धाताददातुमेस्वाहा॥ १५/३२॥ ॐ मेधायैनमः मेधांआवाहयामि ४ ॐ देवीजोष्ट्रीसरस्वत्यश्विनेन्द्रमवर्द्धयन्॥ श्रोत्रेनकर्णेयार्ष्यशोजोष्ट्रींभ्यान्दधुरिन्द्रियंबसुवनेबसुधेयंस्यवयन्तुवजं॥ ५१/२१॥ ॐ भूः० पुष्ट्यैनमः पुष्टिमावाहयामि ५ ॐ व्रतेनदीक्षामाप्नोतिदीक्षयाप्नोतिदक्षिणाम्॥ दक्षिणाश्रद्धामाप्नोतिश्रद्धयासत्यमाप्यते॥ ३०/१२॥ ॐ भूः० श्रद्धायैनमः श्रद्धांआवाहयामि ६ ॐ देवीस्तिस्रस्तिस्रोदेवीः पतिमिन्द्रमवर्द्धयन्॥ अस्पृक्षद्वारंतीदिवꣳरुद्रैर्व्यङ्गसरस्वतीडाबसुमतीगुहाकंबसुवनेबसुधेयंस्यवयन्तुवजं॥ १८/२८॥ ॐ भूः० सरस्वत्यैनमः सरस्वतींआ-

१ श्रीश्च लक्ष्मीर्घृतिर्मेधा पुष्टिः श्रद्धा सरस्वती । मातृकल्येषु प्रपूज्यन्ते सप्तैता घृतमातरः ॥

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वाहयामि७॥ ॐमनोजुति०॥ॐभूर्भुवःस्वः॒यादिसप्तवसोर्द्धाराःसुप्रतिष्ठिताःवरदाःभवत॥ ॐभूर्भुवःस्वः॒यादिसप्तवसोर्द्धारादेवताभ्योनमःइत्यनेन षोडशोपचारैःपूजयेत्॥ प्रार्थना—यदङ्कृत्वेनभोदेव्यःपूजिताविधिमार्गतः। कुर्वन्तुकार्यमखिलंनिर्विघ्नेनक्रतूद्भवम्॥ततोयजमानःस्थापितमातृकांशूर्पस्वयंगृहीत्वापत्न्याचाविघ्नकलशंग्राहयित्वापत्न्यग्रतःसन्मण्डपतोगृहमध्येदेवस्याग्रेस्थापयेत्॥तद्वामपार्श्वेदीपंनिदध्यात्॥इतिमातृकापूजनप्रयोगः॥

अथायुष्यमन्त्रजपः—आयुष्यंवर्चस्यमितिऋचस्यदक्षऋषिःउष्णिक्छन्दांसिहिरण्यंदेवतंआयुष्याभिवृद्ध्यर्थंजपेविनियोगः—ॐआयुष्यंवर्चस्यꣳरायस्पोषमौद्भिदम्॥ इदꣳहिरण्यंवर्चस्वज्जैत्रायाविशतादुमाम्॥५०/३॥ नतद्रक्षाꣳसिनपिशाचास्तरन्तिदेवानामोजः÷प्रथमजꣳह्येतत्॥ योबिभर्त्तिदाक्षायणꣳहिरण्यꣳसदेवेषुकृणुतेदीर्घमायुꣳसमनुष्येषुकृणुतेदीर्घमायुः÷॥५१/३॥ यदाबध्नन्दाक्षायणाहिरण्यꣳशतानीकायसुमनस्यमानाः॥ तन्मऽआबध्नामिशतशारदायायुष्माञ्जरदष्टिर्यथासम्॥५२/३॥

अथ साङ्कल्पिकविधिना नान्दीश्राद्धप्रयोगः॥

अथयज्ञोपवीतीप्राङ्मुखोदक्षिणैजानुपातयित्वापात्रेउदङ्मुखान्प्राक्संस्थान्स्वयंउदङ्मुखश्चेत्प्राङ्मुखान्उदक्संस्थान्वैश्वदेवस्थानेद्वौ-

---

१ हेमाद्रौषड्विंशन्मते—अनग्निको यदा विप्र उच्छिन्नाग्निरथापि वा।तदा वृद्धेषु सर्वासु साङ्कल्पं श्राद्धमाचरेत्॥हेमाद्रौ संवर्तः—समग्रंयस्तु शक्नोति कर्तुं नैवेह पार्वणम्। अपि सङ्कल्पविधिना कालेतस्य विधीयते॥ स्मृतिरत्नावल्याम्- वृध्यनंतरभाविनिवृद्धावपिपिण्डदानस्यप्रतिषिद्धत्वात्तादृशस्थले।पिण्डनिषेधाऽन्यथानुपपत्त्याभियुक्तैः सङ्कल्पश्राद्धानुष्ठानस्यैवोचित्यस्वीकारः।इत्यादिप्रमाणादनग्निकोच्छिन्नाग्निकर्तृकासुसर्वासुवृद्धिषुसङ्कल्पश्राद्धस्यैवविहितत्वात्साङ्कल्पिकाभ्युदयिकश्राद्धप्रयोगोऽत्रास्माभिःप्रयोजितः। साङ्कल्पिकश्राद्धस्वरूपमाह हेमाद्रौसंवर्तः—पात्रभोज्यस्यचान्नस्यत्यागःसङ्कल्पउच्यते। तत्प्रयुक्तोविधिर्यस्तुयत्तेन व्यपदिश्यते॥ तावन्मात्रेण सम्बद्धंश्राद्धंसाङ्कल्पमुच्यते॥ पिण्डहीनःश्राद्धशब्दःसङ्कल्पश्राद्धपर्यायः॥ साङ्कल्पिके समंत्रकावाहनाग्नौकरणपिण्डदानविकिरोक्षण्यस्वधावाचनप्रश्नेत्येतत्सप्तकंवर्ज्यम्॥ २ गौर्यादिमातृकापूजननांनान्दीश्राद्धाङ्गं यत्रनान्दीश्राद्धंनक्रियतेतत्रमातृकापूजनमपिनकार्यम्॥ अस्य आभ्युदयिकश्राद्धमित्यपरः पर्यायः॥ अस्यार्थः—पुत्रजन्मविवाहादिरूपोऽभ्युदयस्तस्मिन्सातिक्रियमाणं श्राद्धं आभ्युदयिकशब्देनोच्यते॥ पूर्वह्णि आभ्युदयिकं विधेयम्॥ अत्र पूर्वाह्णस्त्रेधाविभक्तस्याह्नः प्रथमोभागः॥ पूर्वाण्होवैदेवानां मध्यन्दिनोमनुष्याणामपराह्णःपितृणाम्॥ पुत्र

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2
Kirtikant Sharma Collection, Najafgarh

सपत्नीकपितृपार्वणस्थानेद्वौसपत्नीकमातामहपार्वणस्थानेद्वौचएवंषट्कुशबटून्दूर्वाकाण्डानिवासंस्थाप्य क्षणंदानम्—यवान्गृहीत्वा—ॐसत्यवं-
सुसंज्ञकानांविश्वेषांदेवानांनान्दीमुखानांअद्यकर्तव्यप्रधानसङ्कल्पोक्तकर्माङ्गसाङ्कल्पिकनान्दीश्राद्धेभवद्भ्यां क्षणः क्रियताम् ॥ इतियवानि-

जन्मादौतुतत्कालएव न तत्रपूर्वाह्णनियमः ॥ यथा—नियतेषुनिमित्तेषुप्रातर्वृद्धिनिमित्तकम् । तेषामनियतत्वे तु तदानन्तर्यमिष्यते ॥ नान्दीश्राद्धंत्रिविधम्—विवाहादिनित्यं
नैमित्तिकंपुत्रजन्माद्यनियतनिमित्तंअग्न्याधानादिनिमित्तंचेति ॥ तत्रविवाहादिनिमित्तंप्रातःकार्यंतदाहशातातपः—प्रातर्वृद्धिनिमित्तकम् ॥ अत्रप्रातःशब्दःसार्द्धमहरात्मककालव-
चनः॥ तदाहगार्ग्यः—ललाटसम्मितेभानौप्रथमःप्रहरःस्मृतः । सएवसार्द्धसंयुक्तःप्रातरित्यभिधीयते ॥ अग्न्याधाननिमित्तंत्वपराह्णेकार्यंतदाहगालवः—पार्वणंचापराह्णेतुवृद्धिश्राद्धं
तथाग्निकम् ॥ पुत्रजन्मादौनिमित्तानन्तरमेवतत्कार्यम् ॥ ३ अत्रश्राद्धेनापसव्यम्—पितृणांरूपमास्थायदेवाअन्नंसमश्नुते । तस्मात्सव्येन दातव्यं वृद्धिश्राद्धे तु नित्यशः ॥ हेमाद्रौ
शातातपः—सव्येनचोपवीतेनऋजुदर्भैश्चधीमता । कर्तव्यंचाभ्युदयिकंश्राद्धमभ्युदयार्थिना॥ ४ यथैवोपचरेद्देवांस्तथावृद्धौपितॄनपि॥छंदोगपरिशिष्टेकात्यायनोऽपि—दक्षिणंपातये-
ज्जानुंदेवान्परिचरन्सदा । पातयेदितरत् जानुंपितॄन्परिचरन्नपि ॥ निपातोनह्यिसव्यस्य जानुनो विद्यतेकचित् । सदापरिचरेद्भक्त्या पितॄनन्यत्र देववत् ॥ ५ अत्र प्राङ्मुखेभ्य उद-
ङ्मुखोदयादित्युदङ्मुखता।नियमः ॥ उङ्मुखेभ्योवाप्राङ्मुखइत्यनेनप्राङ्मुखत्वोदङ्मुखत्वयोर्विकल्पउक्तः ॥ अतएवहेमाद्रौमार्कण्डेयपुराणे-उदङ्मुखः प्राङ्मुखोवायजमानः
समाहितः । वृद्धिश्राद्धं प्रकुर्वीत नान्यवक्त्रःकदाचन ॥ ६ अत्र देवधर्मत्वेन सर्वेषिप्राङ्मुखाविप्राः ॥ हेमाद्रौभविष्यपुराणे—सर्वानेवतुतान्विप्रान्प्राङ्मुखानुपवेशयेत् ॥ हेमाद्रौ-
छागलेयोकेदैवेपित्र्येचयेविप्रास्तेसर्वोपिप्राङ्मुखाउपवेशनीयाः ॥ ७ युग्मानाशयेदत्रइतिकात्यायनसूत्रादैश्वदेवार्थंपित्रार्थंमातामहार्थंचद्वौद्वौविप्रौइत्युक्तंरुद्रकल्पद्रुमे ॥
छन्दोगपरिशिष्टे—प्रातरामन्त्रितान्विप्रान्युग्मानुभयतस्तथा ॥ उभयतःदैवेपित्र्येच ॥ १ न हि कात्यायनसूत्रादौ कालत्रये मात्रादिश्राद्धत्रयविधिरस्ति॥ तस्माद्यजसनेयिभिरेक-
स्मिन्पूर्वाण्हेएवैकप्रयोगंपार्वणद्वयात्मकमाभ्युदयिकंश्राद्धमनुष्ठेयम् ॥ छन्दोगपरिशिष्टेकात्यायनः—न योषिद्भ्यःपृथग्दद्यादवसानादिनाहृते । स्वभर्तृपिण्डदानाच्च तृप्तिरासां यतः
स्मृता ॥ तत्रैव—आयुष्याणिचशान्त्यर्थंजप्त्वातत्रसमाहितः। षड्भ्यःपितृभ्यस्तदनुमक्त्याश्राद्धमुपक्रमेत् ॥ तस्मात्पित्रादीनांषण्णामेवेहदेवतात्वम्॥ मातृश्राद्धंतुपूर्वस्यात्पितॄणां
तदनन्तरम् । ततोमातामहानांचवृद्धौश्राद्धत्रयंस्मृतम् ॥ इत्यादीनिवचनानितानिशाखान्तरविषयाणि ॥२ कुशबटूनांदूर्वाकाण्डानांवामुखकल्पनाअग्नेणकार्याइतिश्राद्धखण्ड-
हेमाद्रौढौढूमिश्रपद्धतौच ॥ दर्भबटौनिर्माणेचनदर्भसंख्यानियमः॥ तदुक्तंछंदोगपरिशिष्टेकात्यायनेन—यज्ञवास्तुनिमुष्ट्यांचस्तम्बेदर्भबटौतथा। दर्भसंख्यानविहिताविष्टरास्त
रणेषुच॥ दर्भचटौइत्यपिपाठः॥ परिशिष्टेतुब्रह्मविष्टरादौदर्भसंख्याविहितास्ति॥ पंचाशतो भवेद्ब्रह्मा तदर्धेन तु विष्टरः॥ अतश्च दर्भसंख्यायाः संभवासंभवाभ्यां व्यवस्थितोविकल्प

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

क्षिप्य ॥ ॐतथा॥ प्राप्नुतां भवन्तौ ॥ प्राम्रवाव ॥ यवान्गृहीत्वा—गोत्राणांनान्दीमुखानांपितृपितामहप्रपितामहानांसपत्नीकानांअद्यकर्तव्यप्रधान-संकल्पोक्तकर्माङ्गसाङ्कल्पिकनान्दीश्राद्धेभवद्भ्यांक्षणः क्रियताम् ॥ इतियवान्निक्षिप्य ॥ ॐतथा ॥ प्राप्नुतां भवन्तौ ॥ प्राम्रवाव ॥ यवान्गृहीत्वा—द्वितीयगोत्राणां नान्दीमुखानां मातामहप्रमातामहवृद्धप्रमातामहानांसपत्नीकानां अद्यकर्तव्यप्रधानसङ्कल्पोक्तकर्माङ्गसाङ्कल्पिकनान्दीश्राद्धेभव-द्भ्यांक्षणःक्रियताम् । इतियवान्निक्षिप्य ॥ ॐतथा ॥ प्राप्नुतांभवन्तौ ॥ प्राम्रवाव ॥ पाद्यदानम्—सत्यवसुसंज्ञकाःविश्वेदेवाःनान्दीमुखाःइदंवःपाद्यं पादावनेजनंपादप्रक्षालनंवृद्धिः ॥ गोत्राःनान्दीमुखाःपितृपितामहप्रपितामहाःसपत्नीकाःइदंवःपाद्यंपादावनेजनंपादप्रक्षालनंवृद्धिः॥ द्वितीयगोत्राः नान्दीमुखाःमातामहप्रमातामहवृद्धप्रमातामहाःसपत्नीकाःइदंवःपाद्यंपादावनेजनंपादप्रक्षालनंवृद्धिः ॥ सङ्कल्पः—अद्यपूर्वोच्चरित० शुभपुण्यतिथौ साङ्कल्पिकविधिनानान्दीश्राद्धंकरिष्ये ॥ आसनदानम्—सत्यवसुसंज्ञकाःविश्वेदेवाःनान्दीमुखाःइदं वःआसनम् ॥ गोत्राःनान्दीमुखाः पितृपि-तामहप्रपितामहाःसपत्नीकाःइदंवःआसनम् ॥ द्वितीयगोत्राःनान्दीमुखाःमातामहप्रमातामहवृद्धप्रमातामहाःसपत्नीकाःइदं वःआसनम् ॥ गन्धादि-दानम्—सत्यवसुसंज्ञकाःविश्वेदेवाःनान्दीमुखाःइदंवोगन्धाद्यर्चनंयथाविभागंस्वाहानमः॥ गोत्राःनान्दीमुखाःपितृपितामहप्रपितामहाःसपत्नीकाः इदंवोगन्धाद्यर्चनंयथाविभागंस्वाहानमः ॥ द्वितीयगोत्राःनान्दीमुखाः मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः इदंवोगन्धाद्यर्चनंयथाविभागं स्वाहानमः ॥ भोजननिष्क्रयद्रव्यदानम्—सत्यवसुसंज्ञकाःविश्वेदेवाः नान्दीमुखाःयुग्मब्राह्मणभोजनपर्याप्तामनिष्क्रयीभूतंकिञ्चिद्धिरण्यंदत्तंअमृत-

---

इति नारायणवृत्तौ ॥ २ ब्रह्माण्डपुराणे—कुशस्थाने च दूर्वाःस्युर्मङ्गल्यानां च वृद्धये ॥ स्मृतिकौस्तुभे—मङ्गल्यात्मकविवाहायारम्भेक्रियमाणवृद्धिश्राद्धे कुशस्थानेदूर्वाविधिः ॥ यज्ञायारम्भे तु क्रियमाणेअमूलकजुदर्भविधिः ॥ इत्तिदूर्वायाकजुदर्भैर्विकल्पः ॥ ४ क्षणोनाम व्यापाररहितास्थितिः ॥ क्षणशब्दो निर्व्यापारास्थित्यर्थेस्ति ॥ क्षणइति प्रथमान्तं कर्म ॥ भवद्भ्यामिति तृतीयान्तः कर्ता ॥ क्रियताम्इतिकर्मणिप्रत्ययः॥५॥ हेमाद्रौ—इष्टिश्राद्धेकतूनक्षौ सत्यौनान्दीमुखेवसू ॥ अत्रसत्यवस्वोःसमुदितयोरेवअग्नीषोमवद्देवतात्वं नतुदेवयोःसमुच्चयः॥ अतः नत्राह्मणद्वये प्रत्येकमेकैकस्यप्रयोग इतिस्पष्टम् ॥१ निर्णयसिन्धौनान्दीश्राद्धप्रकरणे—दैवेक्षणः क्रियताम् इति द्वौ युगपन्निमन्त्र्य ॐतथेति विप्राभ्यां युगपदुक्ते प्राप्नुतां भवन्तौ प्राम्रवाम इति वैश्वदेववत् पित्र्ये च द्विवचनान्तेन विप्रद्वये प्रयोगं कुर्यात् ॥

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रूपेण वः स्वाहानमः ॥ गोत्राः नान्दीमुखाः पितृपितामहप्रपितामहाः सपत्नीकाः युग्मब्राह्मणभोजनपर्याप्तामनिष्क्रयीभूतंकिञ्चिद्धिरण्यंदत्तंअमृतरूपेणवः स्वाहानमः। द्वितीयगोत्राः नान्दीमुखाः मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः युग्मब्राह्मणभोजनपर्याप्तामनिष्क्रयीभूतंकिञ्चिद्धिरण्यंदत्तं अमृतरूपेणवः स्वाहानमः ॥ सक्षीरयवमुदकदानम्—सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः प्रीयन्ताम्॥ गोत्राः नान्दीमुखाः पितृपितामहप्रपितामहाः सपत्नीकाः प्रीयन्ताम् ॥ द्वितीयगोत्राः नान्दीमुखाः मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः प्रीयन्ताम्॥ आशीर्ग्रहणम्—अघोराः पितरः सन्तु॥ सन्त्वघोराः पितरः ॥ गोत्रंनोवर्धताम् ॥ वर्धतांवोगोत्रम् ॥ दातारोनोभिवर्द्धन्ताम् ॥ अभिवर्द्धन्तांवोदातारः ॥ वेदाश्चनोभिवर्द्धन्ताम् ॥ वर्द्धन्तांवो वेदाः ॥ सन्ततिर्नोभिवर्द्धताम् ॥ वर्द्धतांवःसन्ततिः ॥ श्रद्धाचनोमाव्यगमत् ॥ माव्यगमद्वःश्रद्धा॥ बहुदेयंचनोस्तु ॥ अस्तुवोबहुदेयम् ॥ अन्नंचनो बहुभवेत् ॥ भवतुवोबह्वन्नम्॥ अतिथींश्चलभेमहि ॥ अतिथींश्चलभध्वम् ॥ याचितारश्चनः सन्तु ॥ सन्तुवोयाचितारः॥ एताआशिषः सत्याः सन्तु ॥ सन्त्वेताःसत्याआशिषः ॥ दक्षिणादानम्—सत्यवसुसंज्ञकेभ्योविश्वेभ्योदेवेभ्योनान्दीमुखेभ्यःकृतस्यनान्दीश्राद्धस्यफलप्रतिष्ठासिद्ध्यर्थंद्राक्षामलकयवमूलनिष्क्रयीभूतांदक्षिणांदातुमहमुत्सृजे॥ गोत्रेभ्यः नान्दीमुखेभ्यः पितृपितामहप्रपितामहेभ्यः सपत्नीकेभ्यः कृतस्यनान्दीश्राद्धस्यफलप्रतिष्ठासिद्ध्यर्थंद्राक्षामलकयवमूलनिष्क्रयीभूतांदक्षिणां दातुमहमुत्सृजे ॥ द्वितीयगोत्रेभ्यः नान्दीमुखेभ्यः मातामहप्रमातामहवृद्धप्रमातामहेभ्यः सपत्नीकेभ्यः कृतस्यनान्दीश्राद्धस्यफलप्रतिष्ठासिद्ध्यर्थंद्राक्षामलकयवमूलनिष्क्रयीभूतांदक्षिणांदातुमहमुत्सृजे॥ नान्दीश्राद्धंसम्पन्नम्॥सुसम्पन्नम्॥ विसर्जनम्—ॐ वाजेवाजेवतवाजिनोनो धनेषुविप्राऽअमृताऽऋतज्ञाः ॥ अस्यमध्वः पिबतमादयध्वन्तृप्तायातपथिभिर्देवयानैः ॥ १९/९ ॥ अनुव्रजनम्—ॐ आमावाजस्यप्रसवोजगम्यादेमेद्यावापृथिवीविश्वरूपे । आमागन्ताम्पितरामातराचामासोमोऽअमृतत्वेनगम्यात् ॥ १९/९ ॥ हस्ते जलमादाय—मयाचरितेऽस्मिन्साङ्कल्पिकनान्दीश्राद्धे न्यूनातिरिक्तोयोविधिः स उपविष्टब्राह्मणानां वचनाच्छ्रीनान्दीमुखप्रसादाच्च सर्वः परिपूर्णोस्तु ॥ अस्तु परिपूर्णः ॥ अनेन साङ्कल्पिकविधिना नान्दीश्राद्धेन नान्दीमुखदेवताः प्रीयन्ताम् ॥ इति साङ्कल्पिकविधिना नान्दीश्राद्धप्रयोगः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आचार्यादिऋत्विग्वरणम् ॥ एकस्मिन्ताम्रपात्रे शरावे वा आपः क्षीरं कुशाग्राणि दधि चन्दनम् अक्षताः दूर्वाः सर्षपाश्चेत्यष्टद्रव्याणि निक्षिप्य आचारात्पूगीफलं च निक्षिप्य पात्रान्तरेण पिधाय रक्तसूत्रेण संवेष्टय साचार्यविभाःॐपुण्याहमिति त्रिवारंवदन्तः यजमानहस्ते दद्युः पत्नीहस्ते कलशं च दद्युः सपत्नीको यजमानः स्वासनादुत्थाय ब्राह्मणान्प्रार्थयेत् ॥

ब्राह्मणप्रार्थना—पावनाःसर्ववर्णानांब्राह्मणाब्रह्मरूपिणः। अनुगृह्णन्तुमामध्यग्रहशान्त्याख्यकर्मणि॥ स्वस्वकर्मरतानित्यंवेदशास्त्रार्थकोविदाः। श्रोत्रियाःसत्यवाचश्चग्रहध्यानरताःसदा॥यद्वाक्यामृतसंसिक्ताद्दृद्धिंयान्तिनरद्रुमाः।अङ्गीकुर्वन्तु मत्कर्म कल्पद्रुमसमाशिषः॥ यथोक्तनियमैर्युक्ता मन्त्रार्थे स्थिरबुद्धयः।यत्कृपालोकनात्सर्वा ऋद्धयो वृद्धिमाप्नुयुः॥आयुरारोग्यपुत्रादिसुखश्रीमाप्तये मम । आपद्विघ्नविनाशायशत्रुबुद्धिक्षयाय च॥आदित्याद्याग्रहाः सर्वे राहुकेतुपुरःसराः।ग्रहदेवाधिदेवैश्च नक्षत्राणां च दैवतैः॥ इन्द्रादिभिश्चदिक्पालैर्ब्रह्मविष्णुमहेश्वरैः। वास्तुदुर्गागणेशैश्च क्षेत्रपालेन संयुतैः॥ भौमान्तरिक्षदेवैश्च कुलदेव्या च मातृभिः। चतुर्भिश्चैव वेदैश्च रुद्रेणसहितास्तथा॥ स्वागतं वो द्विजश्रेष्ठा मदनुग्रहकारकाः।अयमर्घ इदं पाद्यं भवद्भिः प्रतिगृह्यताम्॥चरणक्षालनादेवास्तुष्यन्ति शुद्धमानसाः। तज्जलेन च संसिक्ताः पूर्णाः कामाभवन्तुमे॥इमंवोर्घमयच्छामि गृह्णन्तुप्रीतमानसाः।पावयन्तुचमांनित्यं पूरयन्तुमनोरथान्॥अन्यः कश्चिदू ब्राह्मणः वदति—अर्घोऽर्घोऽर्घः ॥ यजमानोवदेत्—प्रतिगृह्यन्ताम् । इत्युक्त्वाब्राह्मणहस्ते तदग्रेवा अर्घं स्थापयेत्॥ ब्राह्मणा वदेयुः—प्रतिगृह्णीमः॥

आचार्यवरणम्—यजमानःहस्तेपूगीफलंगृहीत्वाविप्रस्यदक्षिणजानुमालभ्यवदेत्—अमुकप्रवरान्वितामुकगोत्रःशुक्लयजुर्वेदान्नायवाजिमाध्यन्दिनीयशाखाध्यायीअमुकशर्माहंयजमानोहममुकप्रवरान्वितामुकगोत्रंशुक्लयजुर्वेदान्नायवाजिमाध्यन्दिनीयशाखाध्यायिनममुकशर्माणं ब्राह्मणमस्मिन्ग्रहशान्त्याख्ये कर्मणि आचार्यत्वेन त्वामहं वृणे इत्युक्त्वा पूगीफलं दद्यात् ॥ यजमानेन दत्तं पूगीफलं गृहीत्वा वदेत्—ॐवृतोऽस्मि॥ॐव्रतेनदीक्षामाप्नोतिदीक्षयाप्नोति दक्षिणाम्॥दक्षिणा श्रद्धामाप्नोति श्रद्धया सत्यमाप्यते ॥११॥

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2
Kirtikant Sharma Collection, Najafgarh

वृताय एतत्ते पाद्यं पादावनेजनं पादप्रक्षालनमेषतेऽर्घः॥गन्धाक्षतपुष्पमालादिभिःसम्पूज्यहस्तेरक्तसूत्ररूपंकङ्कणबन्धनम्–ॐयदावध्नन्दाक्षायुणा हिरण्यꣳशुतानीकायसुमनुस्यमानाः।तत्रमुऽआवध्नामिशुतशारदायायुष्माञ्जरदष्टिर्यथासम्॥ ॥ यथाशक्तिसुवर्णहस्तमुद्रालङ्कारवस्त्रोपवस्त्रादिवरणमाहित्यंदत्वावदेत्–आवाहयाम्यहंविप्रमाचार्यंयज्ञकारिणम्।पुराणन्यायमीमांसाधर्मशास्त्रार्थपारगम्॥आचार्यस्तुययास्वर्गे शक्रादीनांबृहस्पतिः॥ग्रहशान्त्याख्ययज्ञेऽस्मिन्आचार्यस्त्वंतथाभव॥ यावत्कर्मसमाप्येततावत्त्वमाचार्योभव॥ आचार्यो वदेत्–भवामि॥ॐबृहस्पतेऽअतियदर्य्योऽअर्हाद्द्युमद्विभातिक्रतुमज्जनेषु॥ यद्दीदयुच्छवसऽऋतप्रजातदस्मासुद्रविणन्धेहिचित्रम् ॥ ॥

ब्रह्मवरणम्–यजमानः पूगीफलं गृहीत्वा विप्रस्य दक्षिणजानुमालभ्य वदेत्–अमुकप्रवरान्वितामुकगोत्रः शुक्लयजुर्वेदाम्नायवाजिमाध्यन्दिनीयशाखाध्यायी अमुकशर्मा यजमानोऽहं अमुकप्रवरान्वितामुकगोत्रं शुक्लयजुर्वेदाम्नायवाजिमाध्यन्दिनीयशाखाध्यायिनममुकशर्माणं ब्राह्मणमस्मिन् ग्रहशान्त्याख्ये कर्मणि ब्रह्मत्वेन त्वामहं वृणे इत्युक्त्वा पूगीफलं दद्यात् ॥ पूगीफलं गृहीत्वा वदेत्–ॐवृतोऽस्मि॥ ॐब्रुतेनः० ॥ वृताय एतत्ते पाद्यं पादावनेजनं पादप्रक्षालनमेष तेऽर्घः गन्धाक्षतपुष्पमालादिभिः सम्पूज्य हस्ते कङ्कणबन्धनम्—ॐयदावध्नन्दाक्षायुणा० ॥ यथाशक्ति सुवर्णहस्तमुद्रालङ्कारवस्त्रोपवस्त्रासनोपवीतादिवरणसामग्रीं दत्वा वदेत्–यथा चतुर्मुखो ब्रह्मा सर्वलोकपितामहः॥ग्रहशान्त्याख्ययज्ञेऽस्मिन् ब्रह्मा भव द्विजोत्तम॥ यावत्कर्म समाप्येत तावत्त्वं ब्रह्मा भव ॥ भवामि॥ ॐब्रह्मं जज्ञानम्प्रथमम्पुरस्ताद्वि सीमतः सुरुचो वेनऽ आवः।सबुध्न्याऽ उपमाऽ अस्य विष्ठाः सतश्च योनिमसतश्च विवः॥ ॥

गाणपत्यवरणम्–यजमानः पूगीफलं गृहीत्वा विप्रस्य दक्षिणजानुमालभ्य वदेत्–अमुकप्रवरान्वितामुकगोत्रः शुक्लयजुर्वेदाम्नायवाजिमाध्यन्दिनीयशाखाध्यायी अमुकशर्मा यजमानोऽहं अमुकप्रवरान्वितामुकगोत्रं शुक्लयजुर्वेदाम्नायवाजिमाध्यन्दिनीयशाखाध्यायिनममुकशर्माणं ब्राह्मणमस्मिन् ग्रहशान्त्याख्ये कर्मणि गाणपत्यत्वेन त्वामहं वृणे इत्युक्त्वा पूगीफलं दद्यात् ॥ पूगीफलं

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding by MoE-Grant-2

गृहीत्वा वदेत्–ॐव्रतोऽस्मि ॥ ॐव्रतेनदीक्षा० ॥ व्रताय एतत्ते पाद्यं पादावनेजनं पादप्रक्षालनं एष तेऽर्घ्यः॥ गन्धाक्षतपुष्पमालादिभिः सम्पूज्य हस्ते कङ्कणबन्धनम्–ॐयदाबध्नन्दाक्षायणा०॥यथाशक्ति सुवर्णहस्तमुद्रालङ्कारवस्त्रोपवस्त्रासनोपवीतादिवरणसामग्रीं दत्वा वदेत्–वाञ्छितार्थफलावाप्त्यै पूजितोऽसि सुरासुरैः। निर्विघ्नं क्रतुसंसिद्ध्यै त्वामहं गणपं वृणे॥ॐगुणानान्त्वागुणपतिं०॥१।२३॥

सदस्यवरणम्–यजमानः पूगीफलं गृहीत्वा विप्रस्य दक्षिणजानुमालभ्य वदेत्–अमुकप्रवरान्वितामुकगोत्रः शुक्लयजुर्वेदाम्नायवाजिमाध्यन्दिनीयशाखाध्यायी अमुकशर्मायजमानोऽहं अमुकप्रवरान्वितामुकगोत्रं शुक्लयजुर्वेदाम्नायवाजिमाध्यन्दिनीयशाखाध्यायिनममुकशर्माणं ब्राह्मणमस्मिन् ग्रहशान्त्याख्ये कर्मणि सदस्यत्वेन त्वामहं वृणे इत्युक्त्वा पूगीफलं दद्यात् ॥ ॐव्रतोऽस्मि ॥ ॐव्रतेन०॥व्रताय एतत्ते पाद्यं पादावनेजनं पादप्रक्षालनं एष तेऽर्घः गन्धाक्षतपुष्पमालादिभिः सम्पूज्य हस्ते कङ्कणबन्धनम्–ॐयदा बध्नन्दाक्षायणा०॥ यथाशक्ति सुवर्णहस्तमुद्रालङ्कारवस्त्रोपवस्त्रासनोपवीतादिवरणसामग्रीं दत्वा वदेत्–कर्मणामुपदेष्टारं सर्वकर्मविदुत्तमम् । कर्मिणं वेदतत्त्वज्ञं सदस्यं त्वामहं वृणे ॥ ॐसदसस्पतिमद्भुतम्प्रियमिन्द्रस्य काम्यम् ॥ सुनिम्मेधामयासिषꣳस्वाहा॥१।२४॥

ऋत्विग्वरणम्–यजमानःपूगीफलंगृहीत्वाविप्रस्यदक्षिणजानुमालभ्यवदेत्–अमुकप्रवरान्वितामुकगोत्रःशुक्लयजुर्वेदाम्नायवाजिमाध्यन्दिनीयशाखाध्यायी अमुकशर्मायजमानोऽहममुकप्रवरान्वितामुकगोत्रं शुक्लयजुर्वेदाम्नायमाध्यन्दिनीयशाखाध्यायिनममुकशर्माणं ब्राह्मणमस्मिन्ग्रहशान्त्याख्येकर्मणिऋत्विक्त्वेनत्वामहं वृणे इत्युक्त्वा पूगीफलं दद्यात्॥ ॐव्रतोस्मि॥ॐव्रतेन० ॥ व्रताय एतत्ते पाद्यं पादावनेजनंपादप्रक्षालनंएषतेऽर्घ्यःगन्धाक्षतपुष्पमालादिभिःसम्पूज्यहस्तेकङ्कणबन्धनम्–ॐयदाबध्नन्दाक्षायणा०॥यथाशक्तिसुवर्णहस्तमुद्रालङ्कारवस्त्रोपवस्त्रासनोपवीतादिवरणसामग्रींदत्वावदेत्–भगवन्सर्वधर्मज्ञ सर्वधर्मभृतांवर । ग्रहशान्त्याख्ययज्ञेऽस्मिन् ऋत्विक्त्वं भवसुव्रत॥ ॐएतावद्रूपंयज्ञस्ययद्ब्रह्मणाकृतम्॥ तदेतत्सर्वमाप्नोतियज्ञेसौत्रामणीमुते ॥१।२५॥ एवं चतुरोऽष्टौ वा ऋत्विजो वृणुयात्॥

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ऋत्विक्प्रार्थना–ब्राह्मणाः सन्तु मे शस्ताः पापात्पान्तु समाहिताः। देवानां चैव दातारः पातारः सर्वदेहिनाम्॥जपयज्ञैस्तथा होमैर्दानैश्च विविधैः पुनः। देवानां च ऋषीणां च तृप्त्यर्थं याजकाः कृताः॥येषां देहे स्थिता वेदाः पावयन्ति जगत्त्रयम्।रक्षन्तुसततं ते मां ग्रहयज्ञे व्यवस्थिताः॥ब्राह्मणा जङ्गमं तीर्थं त्रिषु लोकेषु विश्रुतम्। येषां वाक्योदकेनैव शुद्ध्यन्ति मलिना जनाः॥ पावनाः सर्ववर्णानां ब्राह्मणा ब्रह्मरूपिणः।सर्वकर्मरता नित्यं वेदशास्त्रार्थकोविदाः॥श्रोत्रियाः सत्यवाचश्च ग्रहध्यानरताः सदा।यद्वाक्यामृतसंसिक्ता ऋद्धिं यान्ति नरद्रुमाः॥अङ्गीकुर्वन्तुकर्मैतत्कल्पद्रुमसमाशिषः। यथोक्तनियमैर्युक्ता मन्त्रार्थे स्थिरबुद्धयः॥ यत्कृपालोचनात्सर्वा ऋद्धयो वृद्धिमाप्नुयुः।ग्रहयज्ञे मया पूज्याः सन्तु मे नियमान्विताः॥अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः।ग्रहध्यानरता नित्यं प्रसन्नमनसः सदा॥अदुष्टभाषणाः सन्तु मा सन्तु परनिन्दकाः।ममापि नियमा ह्येते भवन्तु भवतामपि॥ऋत्विजश्च यथा पूर्वं शक्रादीनां मखेऽभवन्। यूयं तथा मे भवत ऋत्विजो द्विजसत्तमाः॥ग्रहयागस्य निष्पत्तौ भवन्तोऽभ्यर्थिता मया। शुभसत्त्वैः प्रकर्तव्यं शान्तिकं विधिपूर्वकम्।

यजमानहस्ते कङ्कणबन्धनम्–यदाबध्नन्दाक्षायणा हिरण्यꣳ शतानीकाय सुमनस्यमानाः। तन्मऽ आबध्नामि शतशारदायायुष्मान्जरदष्टिर्यथासम् ॥ ३४/५२ ॥ दाक्षायणा शतानीकमबध्नन्शुहिरण्यकम्। आबध्नामि तदेवाहं आयुष्यस्याभिवृद्धये ॥

यजमानपत्न्याःवामहस्तेकङ्कणबन्धनम्–ॐतत्पत्नीभिरनुगच्छेमदेवाः पुत्रैर्भ्रातृभिरुतवा हिरण्ययैः॥ नाकꣳ कृण्वाना सुकृतस्य लोके तृतीये पृष्ठेऽ अधिरोचने दिवः?॥ ३५/५॥ ग्रहयज्ञफलावाप्त्यै कङ्कणं सूत्रनिर्मितम्। हस्ते बध्नामि सुभगे त्वं जीव शरदां शतम् ॥

दिग्रक्षणम्–साचार्यः सपत्नीको यजमानःअभ्यायतनात्पश्चिमतःस्वासनेभाङ्खउपविश्यहस्तेजलमादाय–प्रारब्धस्यग्रहशान्तिकर्मणोऽङ्गत्वेन दिग्रक्षणं पञ्चगव्यकरणंभूमिप्रार्थनाभूमिकूर्मानन्तपूजनंचकरिष्ये–स्ववामहस्तेगौरसर्षपान्गृहीत्वादक्षिणहस्तेनाच्छाद्य–ॐ कृणुष्वपाजः प्रसितिन्नपृथ्वीं याहिराजेवामवाँ२ऽइभेन॥तृष्वीमनुप्रसितिन्द्रणानोस्तासिविद्वाँरुक्षसुस्तपिष्ठैः॥ ३६॥तवभ्रमासऽआशुया

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2
Kirtikant Sharma Collection, Najafgarh

पतुन्त्यनुस्पृशधृषुताशोशुचानꣳ ॥ तपूꣳष्यग्नेजुह्वापतङ्गानसन्दितोविसृजुविष्वगुल्काः ॥१०/३॥प्रतिस्पशोविसृजुतूर्णितमोभवापायुर्विशोऽअस्याऽअदब्धः॥वोनोदूरेऽअघशꣳसोवाऽअन्त्यग्नेपाकंत्वयाहोतारंवृणीमहे॥११/३॥ उदग्नेतिष्ठप्रत्यातनुष्वन्यामित्राँ२ऽओषतात्तिग्महेते।योनोऽअरातिꣳसमिधानचक्रेनीचातन्धक्ष्यतसन्नशुष्कम् ॥१२/३॥ कुर्द्धोभंत्रपतिर्विद्ध्यादधुस्म्दाविष्कृणुष्वदैव्यान्यग्ने॥ अवस्थिरातनुहियातुजूनांज्जामिमजामिम्मृणीहिशत्रून्॥ अग्नेद्युतेजसासादयामि॥१३/३॥अपसर्पन्तुतेभूतायेभूताभूमिसंस्थिताःयेभूताविघ्नकर्तारस्तेनश्यन्तुशिवाज्ञया॥अपक्रामन्तुभूतानिपिशाचाःसर्वतोदिशम्।सर्वेषामवरोधेनग्रहयागंसमारभे॥यदत्रसंस्थितंभूतंस्थानमाश्रित्यसर्वतः। स्थानंत्यक्त्वातुतत्सर्वं यत्रस्थंतत्रगच्छतु॥ भूतप्रेतपिशाचाद्या अपक्रामन्तुराक्षसाः । स्थानादस्माद्भजन्त्वन्यत्स्वीकरोमि भुवन्त्विमाम्॥ भूतानिराक्षसावापि येऽत्रतिष्ठन्तिकेचन।तेसर्वेप्यपगच्छन्तु ग्रहयागङ्करोम्यहम्॥इत्येतैर्मन्त्रैरीशानादिसर्वदिक्षु विकिरेत्॥ उदकस्पर्शः॥

पञ्चगव्यकरणम्–कांस्यपात्रे मन्त्रान्ते गोमूत्रं क्षिपेत्–ॐभूर्भुवꣳस्तृ÷॥ तत्सवितुर्व्वरेण्युम्गर्गोदेवस्यधीमहि॥ धियोयान÷प्रचोदयात्॥१४/३॥गोमयं मन्त्रान्ते क्षिपेत्–ॐमानस्तोकेतनयेमानुऽआयुषिमानोगोषुमानोऽअश्वेषुरीरिषꣳ ॥ मानोवीराꣳरुद्रभामिनोवधीर्हविष्मन्तꣳसदमित्त्वाहवामहे॥१५/३॥क्षीरं मन्त्रान्ते क्षिपेत्–ॐआप्यायस्व समेतु ते विश्वर्त÷ सोमु वृष्ण्यम्॥भवावाजस्यसङ्गथे॥१६/३॥ दधि मन्त्रान्ते क्षिपेत्–ॐदधिक्राव्णोऽ अकारिषञ्जिष्णोरश्वस्य वाजिन÷॥ सुरुभि नो मुखा करत्प्रणऽ आयूꣳषि तारिषत् ॥१७/३॥ आज्यं मन्त्रान्ते क्षिपेत्–ॐतेजोसि शुक्रमस्यमृतमसि धामु नामासि प्रियन्देवानामनाधृष्टन्देवयजनमसि॥१८/३॥ कुशोदकंमन्त्रान्तेक्षिपेत्–ॐदेवस्य त्वा सवितु? प्रसवेश्विनोर्ब्बाहुभ्यांम्पूष्णोहस्ताभ्याम्॥१९/३॥ ॐइति प्रणवेन यज्ञकाष्ठेनालोड्य प्रणवेनाभिमन्त्रयेत्॥

कर्मभूमिं यज्ञसम्भारांश्च कुशैः सम्प्रोक्षयेत् ॐआपो हि ष्ठा मयोभुवस्ता नऽ ऊर्जे दधातन।महे रणायचक्षसे॥२०/३॥योवः÷शिवतमो रसस्तस्य भाजयतेह नः÷॥उशतीरिव मातरः÷॥२१/३॥तस्माऽ अरङ्गमाम वो यस्य क्षयायु जिन्वथ॥आपो जनयथा च नꣳ॥२२/३॥

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2
Kirtikant Sharma Collection, Najafgarh

भूमिमार्थना—हस्तौ बद्धा भूमिं सम्प्रार्थयेत्—ॐस्यो नापृथिवि नो०॥ ॐघृही द्यौ?०॥ इत्येताभ्यां ऋग्भ्यां सम्प्रार्थ्यॐस्व-स्तिनऽ इन्द्रो वृद्धश्रवा८०॥ॐदेवा आयान्तु ॥ यातुधाना अपयान्तु ॥ विष्णो देवयजनं रक्ष इति पठित्वा भूमौ प्रादेशं कुर्यात् ॥

भूमिकूर्मानन्तपूजनम्—होममानतोयथार्हकृतचतुरस्रस्थण्डिलस्याग्रेअक्षतपुञ्जत्रयोपरिपूगीफलानिसंस्थाप्यभूमिकूर्मानन्ताना-वाह्यपूजयेत्—भूरसीत्यस्य प्रस्तारपङ्क्तिर्ऋषिः अनुष्टुप्छन्दः भूमिर्देवता भूम्यावाहने विनियोगः॥ ॐभूरसिभूमिरस्यदितिरसिविश्वधा-याविश्वस्यभुवनस्यधर्त्री॥पृथिवीं यच्छपृथिवीन्दृंहपृथिवीम्माहिंसीः८॥ भूम्यैनमःभूमिमावाहयामि॥यस्यकूर्मेइत्यस्यप्रजापतिर्ऋषिः अनुष्टुप्छन्दः कूर्मो देवताकूर्मावाहनेविनियोगः ॥ ॐयस्यकुर्म्मोगुहेहृत्स्तमग्रेवर्द्धयात्वम्॥तस्मदेवाऽअधिब्रुवन्नयस्रुब्रह्मणस्पते॥ॐकूर्माय नमः कूर्ममावाहयामि ॥ स्योनापृथिवीत्यस्य मेधातिथिर्ऋषिः अनन्तो देवता गायत्रीछन्दः अनन्तावाहने विनियोगः ॥ ॐस्योना पृथिवि नो भवानृक्षरा निवेशनी ॥ यच्छा नः शर्म्म सुप्रथा॥ ॐअनन्ताय नमः अनन्तमावाहयामि ॥

प्रतिष्ठापनम्—ॐमनोजूति०॥भूकूर्मानन्तदेवताः सुप्रतिष्ठिताः वरदाः भवत॥ॐभूकूर्मानन्तदेवताभ्यो नमः इत्यनेन पूजयेत् ॥

स्थण्डिलेपञ्चभूसंस्काराः—आचार्यः स्थण्डिलपश्चिमतः उपविशेत्॥यजमानंस्वदक्षिणेब्रह्मणःपश्चिमतःउपवेश्यआचम्यप्राणाना-यम्यदेशकालौसङ्कीर्त्यभारब्धग्रहशान्त्याख्येकर्मणि पञ्चभूसंस्कारपूर्वकमग्निप्रतिष्ठापनं करिष्ये ॥ १परिसमूहनम्—मूलघृतोक्षेमिर्दर्भाग्रैः पश्चिमतःआरभ्यप्रागन्तमुदक्संस्थंत्रिःपरिसमूह्यतान्कुशान् ईशान्यां पूर्वतोवापरित्यजेत्॥२॥उपलेपनम्—गोमयोदकेनत्रिरुपलिम्पयेत् ॥ ३ उल्लेखनम्—यज्ञकाष्ठेन स्रुवेणकुशैर्वा दक्षिणतउदक्संस्थं त्रिरुल्लेखयेत् ॥ ४ उद्धरणम्—अङ्गुष्ठात्अनामिकापर्यन्तंयथोल्लिखिताभ्योलेखाभ्यः पांसुं नीत्वा प्राच्यमुद्धरेत्॥५अभ्युक्षणम्—प्रतिरेखं न्युब्जमुष्टिना प्राजापत्यतीर्थेन उदकेनाभ्युक्षणम् ॥ इतिपञ्चभूसंस्काराः॥

अग्निस्थापनम्—सुवासिन्याश्रोत्रियागारात्स्वगृहाद्वासमृद्धंनिर्धूमं तैजसेनासम्भवेमृण्मयेनवापात्रयुग्मेनसम्पुटीकृतमाहृतमग्निं

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding by MoE-Grant-2

स्थण्डिलस्य आग्नेय्यां निदध्यात् ॥ तस्मादाचार्यः हुं फट् इति मन्त्रेण क्रव्यादांशं नैर्ऋत्यां क्षिप्त्वा आत्माभिमुखमग्निं स्थापयेत्—ॐअग्निन्दूतम्पुरो दधे हव्यवाहमुपब्रुवे ॥ देवाँ२ऽ आसादयादिह॥ ३३॥ॐवरदनामानमग्निमुपसमादधे ॥

आचारात् अभ्याहरणपात्रे साक्षतोदकं निषिच्य तत्र किञ्चिद्धिरण्यमाभूषणं वा निक्षिप्य तद्द्रव्यं मुवासिन्यै दापयेत् ॥

आवाहनम्—पुपोऽदेव? प्रदिशोनुसर्व्या८पूर्वीह जुत? सऽ उगमैऽअन्त?॥सऽ पुवज्जुत? स जनिष्यमाण८ मुत्यञ्जनास्तिष्ठति सुव्रतोमुख८ ॥ ३३॥ ॐवरदनामानमग्निमावाहयामि ॥ प्रतिष्ठापनम्—ॐमनोजूति० ॥ ॐवरदनामाग्ने सुप्रतिष्ठितो वरदो भव ॥

मुखंकृत्वाध्यायेत्-ॐचत्वारिशृङ्गात्रयोऽअस्युपादुद्वेशीर्षेसप्तहस्तासोऽअस्यत्रिधाबद्धोवृषभोरोरवीतिमुहोदेवोमर्त्याँ२ऽआविवेश ॥ सप्तहस्तःश्चतुःशृङ्गःसप्तजिह्वोद्विशीर्षकः।त्रिपात्प्रसन्नवदनःसुखासीनःशुचिस्मितः।स्वाहान्तुदक्षिणेपार्श्वेदेवींवामेस्वधांतथा।बिभ्रदक्षिणहस्तैस्तुशक्तिमन्नंघृतंचसुवम्।तोमरंव्यजनंवामेघृतपात्रंचधारयन्।आत्माभिमुखमासीनएवंरूपोहुताशनः॥ अग्नेवैश्वानरशाण्डिल्यगोत्रशाण्डिल्यासितदेवलेतित्रिप्रवरभूमिमातःवरुणपितःमेषध्वजप्राङ्मुखममसम्मुखोभव॥ततःस्थण्डिलस्यरुद्रदिग्भागेवेद्युपरिग्रहमण्डलदेवतावाहनम्।

१ आकृष्णेनेत्यस्यहिरण्यस्तूपआङ्गिरसऋषिःत्रिष्टुप्छन्दःसूर्योदेवतासूर्यावाहनेविनियोगः—ॐआकृष्णेनेुरजसाुवर्त्तमानोनिवेशयन्नमृतुम्मर्त्यञ्चाहिरुण्ययेन सविता रथेना देवो याति भुवनानिपश्यन्॥ ३३॥ प्राङ्मुखं सूर्य पीठमध्ये वर्तुले द्वादशाङ्गुले मण्डले—ॐभूर्भुवः स्वः कलिङ्गदेशोद्भव काश्यपसगोत्र रक्तवर्ण भो सूर्य इहागच्छ इह तिष्ठ॥ ३ॐसूर्याय नमः सूर्यमावाहयामि स्थापयामि।।

२ इमन्देवाइत्यस्यवरुणऋषिः अत्यष्टीछन्दःसोमोदेवतासोमावाहनेवि०॥ॐइमन्देवाऽअसपुत्नꣳसुवध्वम्महतेक्षत्रायमहतेज्यैष्ठ्यायमहतेजानराज्युायेन्द्रस्येन्द्रियाय । इषमूमूर्ष्यपुत्रमूमूर्ष्यैपुत्रमुस्यैविशऽएषवोमीराजासोमोस्माकम्ब्राह्मणानाꣳराजा॥ ४०॥ प्रत्यङ्मुखं सोममाग्नेय्यांचतुर्विंशत्यङ्गुलेमण्डले-ॐभूर्भुवःस्वःयमुनातीरोद्भवआत्रेयसगोत्रशुक्लवर्णभोसोमइ०इ०ॐसोमायनमःसोममावा०स्था० ॥

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2
Kirtikant Sharma Collection, Najafgarh

३ अग्निर्म्मूर्द्धेत्यस्य विरूपाक्षऋषिः गायत्रीछन्दः भौमो देवता भौमावाहने विनियोगः—ॐ अग्निर्म्मूर्द्धा दिव? ककुत्पतिः पृथिव्याऽअयम्॥ अपाꣳरेताꣳसिजिन्वति ॥ ११/५ ॥ दक्षिणाभिमुखं भौमं दक्षिणस्यां दिशि त्रिकोणे त्र्यङ्गुले मण्डले—ॐ भूर्भुवः स्वः अवन्तिदेशोद्भव भारद्वाजसगोत्र रक्तवर्ण भो भौम इहागच्छ इह तिष्ठ ॥ ॐ भौमाय नमः भौममावाहयामि स्थापयामि ॥

४ उद्बुद्ध्यस्वेत्यस्य परमेष्ठीऋषिः त्रिष्टुप्छन्दः बुधो देवता बुधावाहने विनियोगः—ॐ उद्बुद्ध्यस्वाग्नेप्रतिजागृहित्वमिष्टापूर्त्ते सꣳसृजेथामयञ्च॥ अस्मिन्त्सधस्थेऽअध्युत्तरस्मिन्विश्वेदेवायजमानश्चसीदत॥ ६१/२ ॥ उदक्प्रुखंबुधमैशान्यांदिशिबाणाकारेचतुरङ्गुलेमण्डले—ॐ भूर्भुवः स्वः मगधदेशोद्भव आत्रेयसगोत्र पीतवर्ण भो बुध इहागच्छ इह तिष्ठ॥ ॐ बुधाय नमः बुधमावाहयामि स्थापयामि ॥

५ बृहस्पत इत्यस्य गृत्समदऋषिः त्रिष्टुप्छन्दः बृहस्पतिर्देवता बृहस्पत्यावाहनेविनियोगः—ॐ बृहस्पतेऽअतियदर्य्योऽअर्हाद्द्युमद्विभातिक्रतुमज्जनेषु ॥ यद्दीदयच्छवसऽऋतप्रजाततदस्मासुद्रविणन्धेहिचित्रम्॥ ५/१ ॥ उदक्प्रुखंबृहस्पतिमुत्तरस्यांदिशिलम्बदीर्घचतुरस्रेपट्टाकारेषडङ्गुलेमण्डले—ॐ भूर्भुवः स्वः सिन्धुदेशोद्भवआङ्गिरसगोत्रपीतवर्णभोबृहस्पतेइहागच्छइहतिष्ठॐ बृहस्पतयेनमः बृहस्पतिमा०स्था०॥

६ अन्नात्परिस्रुतइत्यस्यअश्विसरस्वतीन्द्राऋषयःअतिजगतीछन्दःशुक्रोदेवताशुक्रावाहनेविनियोगः-ॐ अन्नात्परिस्रुतोरसम्ब्रह्मणाव्यपिबत्क्षत्रम्पयꣳसोमम्प्रजापतिꣳ ऋतेनसत्यमिन्द्रियंविपानꣳशुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु॥ ११/२ ॥ प्राक्प्रुखंशुक्रंपूर्वस्यां दिशिपञ्चकोणेनवाङ्गुलेमण्डले—ॐ भूर्भुवः स्वः भोजकटदेशोद्भवभार्गवसगोत्रशुक्लवर्णभोशुक्रइहागच्छइह०ॐ शुक्रायनमः शुक्रमा०स्था०॥

७ शन्नोदेवीरित्यस्य दध्यङ्ङाथर्वणऋषिः गायत्रीछन्दः शनैश्चरोदेवताशनैश्चरावाहनेविनियोगः—ॐ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये ॥ शंय्योरभिस्रवन्तु नः ॥ १३/३ ॥ प्रत्यक्प्रुखं शनिं पश्चिमायां दिशि धनुराकारे द्व्यङ्गुलेमण्डले—ॐ भूर्भुवः स्वः सौराष्ट्रदेशोद्भवकाश्यपसगोत्रकृष्णवर्ण भो शनैश्चर इहागच्छ इह तिष्ठ ॥ ॐ शनैश्चराय नमः शनैश्चरमावाहयामि स्थापयामि ॥

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding by MoE-Grant-2

८ कयान इत्यस्य वामदेवऋषिः गायत्रीछन्दः राहुर्देवता राहावाहने विनियोगः—ॐकया नश्चित्रऽ आभुवदूती सदावृधः सखा॥कया शचिष्ठयावृता ॥३५॥ दक्षिणाभिमुखं राहुं नैर्ऋत्यां दिशि शूर्पाकारे द्वादशाङ्गुले मण्डले—ॐभूर्भुवः स्वः राठिनांपुरोऽव पैठिनसगोत्र नीलवर्ण भो राहो इहागच्छ इह तिष्ठ ॥ ॐराहवेनमः राहुमावाहयामि स्थापयामि ॥

९ केतुङ्कृण्वन्नित्यस्य मधुच्छन्दाऋषिः अनिरुक्तागायत्रीछन्दः केतुर्देवता केत्वावाहने विनियोगः—ॐकेतुङ्कृण्वन्न केतवे पेशो मर्य्याऽ अपेशसे॥ समुषद्भिरजायथाः ॥३५॥ दक्षिणाभिमुखं केतुं वायव्यां दिशि ध्वजाकारे षडङ्गुले मण्डले—ॐभूर्भुवः स्वः अन्तर्वेदिसमुद्भव जैमिनिसगोत्र धूम्रवर्ण भो केतो इहागच्छ इह तिष्ठ ॥ ॐकेतवे नमः केतुमावाहयामि स्थापयामि ॥

अधिदेवतावाहनम्—१ त्र्यम्बकमित्यस्यवसिष्ठऋषिःअनुष्टुप्छन्दःईश्वरोदेवताईश्वरावाहनेवि०—ॐत्र्यम्बकंय्यजामहेसुगन्धिम्पुष्टि-वर्द्धनम्॥उर्व्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमामृतात्॥१०॥ॐभूर्भुवःस्वःभोईश्वरइ०इ०॥सूर्यदक्षिणपार्श्वेॐईश्वरायनमःईश्वरमा० स्था०॥

२ श्रीश्चतइत्यस्यउत्तरनारायणऋषिःत्रिष्टुप्छन्दःउमादेवताउमावाहनेवि०—ॐश्री श्चतेलक्ष्मी श्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपम्-श्विनौव्यात्तम्॥इष्णन्निषाणामुम्मऽइषाणसर्वलोकम्मऽइषाण॥ॐभूर्भुवःस्वःभोउमेइ०इ०सोमदक्षिणपार्श्वेॐउमायैनमःउमामा०स्था०॥

३ यदक्रन्दइत्यस्य भार्गवजमदग्निर्दीर्घतमाऋषयः त्रिष्टुप्छन्दः स्कन्दो देवता स्कन्दावाहनेविनियोगः—ॐयदक्रन्दः प्रथम ज्जायमानऽ उद्यन्त्समुद्रादुत वा पुरीषात् ॥ श्येनस्य पक्षा हरिणस्य बाहूऽ उपस्तुत्यम्महि जातन्तेऽ अर्वन् ॥३३॥ ॐभूर्भुवः स्वः भो स्कन्द इहागच्छ इह तिष्ठ भौमदक्षिणपार्श्वे—ॐस्कन्दाय नमः स्कन्दमावाहयामि स्थापयामि ॥

४ विष्णोरराटमित्यस्यप्रजापतिर्ऋषिःयजुश्छन्दःविष्णुर्देवताविष्णवावाहनेविनियोगःॐविष्णोरराटमसिविष्णोः श्नप्त्रेस्थोविष्णोः स्यूरसिविष्णोर्ध्रुवोसि॥वैष्णुवमसिविष्णवेत्वा॥५॥ ॐभूर्भुवः स्वः भो विष्णो इहा०इह०॥बुधदक्षिणपार्श्वेॐविष्णवे०विष्णुमा० स्था०॥

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

५ आब्रह्मन्नित्यस्य प्रजापतिर्ऋषिः यजुश्छन्दः ब्रह्मा देवता ब्रह्मावाहने विनियोगः ॥ ॐआ ब्रह्मन्ब्राह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूर इषव्योतिव्याधी महारथो जायतान्दोग्ध्री धेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठा? सभेयो युवास्य यजमानस्य वीरो जायतान्निकामे निकामे नः पर्जन्यो वर्षतु फलवत्यो नऽ ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥३३॥ ॐभूर्भुवः स्वः भो ब्रह्मन् इहागच्छ इहतिष्ठ गुरुदक्षिणपार्श्वे–ॐब्रह्मणे नमः ब्रह्माणमावाहयामि स्थापयामि ॥

६ सजोषाइन्द्रेत्यस्य विश्वामित्रऋषिः त्रिष्टुप्छन्दः इन्द्रो देवता इन्द्रावाहने विनियोगः–ॐसुजोषाऽ इन्दु सगणो मरुद्भि सोमम्पिब वृत्रहा शूर विद्वान्। जहिशत्रूँ१रप मृधो नुदस्वाथाभयङ्कृणुहि विश्वतो नः ॥१७॥ ॐभूर्भुवः स्वः भो इन्द्र इहागच्छ इह तिष्ठ शुक्रदक्षिणपार्श्वे–ॐइन्द्राय नमः इन्द्रमावाहयामि स्थापयामि ॥

७ यमायत्वेत्यस्य दध्यङ्ङाथर्वणऋषिः यजुश्छन्दः यमो देवता यमावाहने विनियोगः–ॐयमायत्वाङ्गिरस्वतोपित्रमनुस्वाहा ॥ स्वाहा घर्म्मायुस्वाहाघर्म्म? पित्रे॥३८॥ॐभूर्भुवःस्वःभोयमइहागच्छइहतिष्ठशनिदक्षिणपार्श्वे–ॐयमायनमः यमम०स्था० ॥

८ कार्षिरसीत्यस्यप्रजापतिर्ऋषिःअनुष्टुप्छन्दःकालोदेवताकालावाहनेविनियोगः–ॐकार्षिरसिसमुद्रस्यत्वाक्षित्याऽउन्नयामि ॥ समापोऽअद्भिरग्मतसमोषधीभिरोषधीः॥३९॥ॐभूर्भुवःस्वःभोकालइहागच्छइहतिष्ठराहुदक्षिणपार्श्वे–ॐकालायनमः कालमा०स्था० ॥

९ चित्रावसोइत्यस्य हिरण्यस्तूपऋषिः यजुर्गतीछन्दः चित्रगुप्तो देवता चित्रगुप्तावाहने विनियोगः–ॐचित्रावसो स्वस्ति तेपारमशीय॥४०॥ॐभूर्भुवः स्वः भो चित्रगुप्त इहागच्छ इह तिष्ठ केतुदक्षिणपार्श्वे–ॐचित्रगुप्तायनमः चित्रगुप्तमावाहयामि स्थापयामि॥

प्रत्यधिदेवतावाहनम्–१ अग्निन्दूतमित्यस्यविरूपाक्षऋषिः गायत्रीछन्दः अग्निर्देवताअन्यावाहनेविनियोगः–ॐअग्निन्दूतम्पुरोदधेहस्त्रवाहुमुपब्रुवे।देवाँ२आसादयादिह॥४१॥ॐभूर्भुवःस्वःभोअग्नेइहागच्छइहतिष्ठसूर्यवामपार्श्वे–ॐअग्नयेनमः अग्निमावाहयामिस्थापय०॥

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-BoE-Grant-2
Kirtikant Sharma Collection, Najafgarh

२ आपोहिष्ठेति सिन्धुद्वीपऋषिः गायत्रीछन्दः आपो देवता अपावाहने विनियोगः—ॐआपो हि ष्ठा मयोभुवस्ता नऽऊर्जे दधातन।।महेरणायचक्षसे॥१।।ॐभूर्भुवः स्वः भोआप इहागच्छतइहतिष्ठत॥सोमवामपार्श्वे—ॐअद्भ्योनमःअपआवाहयामि स्थापयामि॥

३ स्योनापृथिवीत्यस्यमेधातिथिर्ऋषिःगायत्रीछन्दःपृथ्वीदेवतापृथ्व्यावाहनेविनियोगः—ॐस्योनापृथिविनोभवानृक्षरानिवेशनी ॥ यच्छानः शर्म्मसुप्रथाः॥१॥ॐभूर्भुवःस्वःभोपृथिविइहागच्छइहतिष्ठ ॥ भौमवामपार्श्वे—ॐपृथिव्यैनमःपृथिवीमावाहयामिस्थापयामि॥

४ इदंविष्णुरित्यस्यमेधातिथिर्ऋषिःगायत्रीछन्दःविष्णुर्देवताविष्ण्वावाहनेविनियोगः—ॐइदंविष्णुर्विचक्रमेत्रेधानिदधेपदम् ॥ समूढमस्यपाꣳसुरेस्वाहा॥५॥ॐभूर्भुवःस्वःभोविष्णो इहागच्छ इहतिष्ठ ॥ बुधवामपार्श्वे—ॐविष्णवेनमःविष्णुमावाहयामिस्थापयामि॥

५ त्रातारमित्यस्य गर्गऋषिः त्रिष्टुप्छन्दःइन्द्रोदे०इन्द्रावाहनेवि०—ॐत्रातारमिन्द्रमवितारमिन्द्रꣳहवेहवेसुहवꣳशूरमिन्द्रम्॥ह्वयामिशक्रम्पुरुहूतमिन्द्रꣳस्वस्तिनोमघवाधात्विन्द्रः॥२॥ॐभूर्भुवःस्वःभोइन्द्रइहागच्छइहतिष्ठगुरुवामपार्श्वे-ॐइन्द्रायनमःइन्द्रमा०स्था०॥

६ अदित्यैरास्नेत्यस्यदध्यङ्ङाथर्वणऋषिः यजुश्छन्दः इन्द्राणीदेवता इन्द्राण्यावाहने विनियोगः—ॐअदित्यैरास्नासीन्द्राण्याऽउष्णीषः॥पूषासिशुर्म्मायदीष्व॥३॥ॐभूर्भुवःस्वःभोइन्द्राणि इहागच्छ इह तिष्ठ॥ शुक्रवामपार्श्वे ॐइन्द्राण्यैनमः इन्द्राणीमा०स्था०॥

७ प्रजापत इत्यस्य हिरण्यगर्भऋषिः त्रिष्टुप्छन्दः प्रजापतिर्देवता प्रजापत्यावाहने विनियोगः—ॐप्रजापतेनत्वदेतान्यन्योविश्वारूपाणिपरिताबभूव ॥ यत्कामास्तेजुहुमस्तन्नोऽअस्तुवयꣳस्यामपतयोरयीणाम् ॥६॥ॐभूर्भुवः स्वः भो प्रजापते इहागच्छ इह तिष्ठ ॥ शनिवामपार्श्वे—ॐप्रजापतये नमः प्रजापतिमावाहयामि स्थापयामि ॥

८ नमोस्तुसर्पेभ्यइत्यस्यप्रजापतिर्ऋषिः अनुष्टुप्छन्दः सर्पादेवताः सर्पावाहने विनियोगः—ॐनमोस्तुसर्पेभ्योयकेचपृथिवीमनु॥येऽअन्तरिक्षेयेदिवितेभ्यः सर्पेभ्योनमः॥४॥ॐभूर्भुवःस्वःभोसर्पाइहागच्छतइहतिष्ठतराहुवामपार्श्वेॐसर्पेभ्योनमःसर्पानावा०स्था०॥

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2
Kirtikant Sharma Collection, Najafgarh

९ ब्रह्मजज्ञानमित्यस्य प्रजापतिर्ऋषिः त्रिष्टुप्छन्दः ब्रह्मा देवता ब्रह्मावाहने विनियोगः—ॐब्रह्म जज्ञानम्प्रथमम्पुरस्ताद्वि सीमुतः सुरुचो वेनऽ आवः।स बुध्न्याऽ उपमाऽ अस्यविष्ठाः सतश्च योनिमसतश्च विवः॥ ॐभूर्भुवः स्वः भो ब्रह्मन् इहागच्छ इह तिष्ठ ॥ केतुवामपार्श्वे—ॐब्रह्मणे नमः ब्रह्माणमावाहयामि स्थापयामि ॥

पञ्चलोकपालदेवतावाहनम्—१ गणानान्त्वेत्यस्य प्रजापतिर्ऋषिः यजुश्छन्दः गणपतिर्देवतागणपत्यावाहने विनियोगः—ॐ गणानान्त्वा गणपतिꣳ हवामहे प्रियाणान्त्वा प्रियपतिꣳ हवामहे निधीनान्त्वा निधिपतिꣳ हवामहे वसो मम ॥ आहमजानि गर्भ्भ धमात्वमजासि गर्भ्भधम्॥ ॐभूर्भुवःस्वःभो गणपतेइहागच्छइहतिष्ठ॥राहोरुत्तरतः—ॐगणपतये नमः गणपतिमावाहयामिस्थापयामि॥

२ अम्बेअम्बिकइत्यस्यप्रजापतिर्ऋषिःअनुष्टुप्छन्दःदुर्गादेवतादुर्गावाहनेविनियोगः—ॐअम्बेऽअम्बिकेऽम्बालिकेनमानयतिकश्चन॥ससस्त्यश्वकःसुभद्रिकाङ्काम्पीलवासिनीम्॥ ॐभूर्भुवःस्वःभो दुर्गेइहागच्छइहतिष्ठ॥ शनेरुत्तरत—ॐदुर्गायैनमः दुर्गामा०स्था०॥

३ वायोयेतेइत्यस्य गृत्समदऋषिः गायत्रीछन्दः वायुर्देवता वाय्वावाहनेविनियोगः ॐवायो ये ते सहस्रिणो रथास्तेभिरा गहि॥नियुत्वान्त्सोमपीतये॥ ॐभूर्भुवः स्वः भो वायो इहागच्छइहतिष्ठ ॥ रवेरुत्तरत—ॐवायवेनमः वायुमाहयामिस्थापयामि ॥

४ घृतं घृतपावानइत्यस्य प्रजापतिर्ऋषिः ऋचांपङ्क्तिश्छन्दः आकाशो देवता आकाशावाहने विनियोगः—ॐघृतङ्घृतपावान पिबतुवसोवसापावान पिबतान्तरिक्षस्यहविरसिस्वाहा॥दिशः प्रदिशऽआदिशोविदिशऽउद्दिशोदिग्भ्यः स्वाहा ॥ ॐभूर्भुवः स्वः भो आकाश इहागच्छ इह तिष्ठ ॥ राहोर्दक्षिणे—ॐआकाशाय नमः आकाशमावाहयामि स्थापयामि ॥

५ शवाङ्कशेत्यस्यमेधातिथिर्ऋषिः गायत्रीछन्दः अश्विनौ देवते अश्विनावाहनेविनियोगः—ॐशवाङ्कशामधुमत्यश्विनासूनृतावतीं॥तयायज्ञमिमिक्षतम्॥ ॐभूर्भुवःस्वःभोअश्विनौइहागच्छतमिहतिष्ठतमकेतुदक्षिणे-ॐअश्विभ्यांनमःअश्विनावावाहयामिस्था०॥

CC-0. Panini Kanya Maha Vidyalaya Collection.
Kirtikant Sharma Collection, Najafgarh

अथ क्षेत्राधिपतेः वास्तोष्पतेश्चावाहनम् ।

१ महिष्पत्रमित्यस्य विश्वामित्रऋषिः त्रिष्टुप्छन्दः क्षेत्राधिपतिर्देवता क्षेत्राधिपत्यावाहने विनियोगः । ॐ नुहि स्पशमविदन्नुग्र्यम्-स्माद्वैश्वानरात्पुरऽएतारमुग्रे? ॥ एर्येनमद्वधन्नमृतास अमर्त्यं वैश्वानरङ्क्षत्रमिन्द्रायजिन्वथ देवा? ॥ १/३ ॥ गुरोरुत्तरे–ॐभूर्भुवः स्वः क्षेत्राधिपतयेनमः क्षेत्राधिपतिमावाहयामि स्थापयामि ॥ भो क्षेत्राधिपते इहागच्छ इह तिष्ठ ॥

१ वास्तोष्पत इत्यस्य वसिष्ठऋषिः वास्तोष्पतिर्देवता वास्तोष्पत्यावाहने विनियोगः ॥ ॐवास्तोष्पते प्रतिजानीह्यस्मान्त्स्वावेशोऽ अनमीवो भवानः । यत्त्वेमहे प्रतितन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे ॥ क्षेत्राधिपोत्तरे–ॐभूर्भुवः स्वः वास्तोष्पतये नमः वास्तोष्पतिमावाहयामि स्थापयामि ॥ भो वास्तोष्पते इहागच्छ इह तिष्ठ ॥

॥ अथ मण्डलाद्बहिः प्रागादितः पीठसमन्तात् इन्द्रादिदशदिक्पालानामावाहनम् ॥

१ त्रातारमित्यस्यगर्गऋषिःत्रिष्टुप्छन्दःइन्द्रोदेवताइन्द्रावाहनेविनियोगः॥ॐत्रातारमिन्द्रमवितारमिन्द्रꣳ हवेहवेसुहवꣳशूरमिन्द्रम्॥हयामि शक्रम्पुरुहूतमिन्द्रꣳस्वस्तिनोमघवाधात्विन्द्र÷॥१२/३८॥मण्डलाद्बहिःपूर्वे–ॐभूर्भुवःस्वःइन्द्रायनमःइन्द्रमा०स्था० ॥ भोइन्द्रइहा०इह०॥

२ त्वन्नोऽअग्नइत्यस्य हिरण्यस्तूप आङ्गिरसऋषिः जगतीछन्दः अग्निर्देवता अग्न्यावाहने विनियोगः॥ॐत्वन्नोऽ अग्ने तव देव पायु-भिर्म्मघोनो रक्ष तन्वश्च वन्द्य ॥ त्राता तोकस्य तनये गवामस्यनिमेषꣳ रक्षमाणस्तव व्रते ॥ १३/३५ ॥ मण्डलाद्बहिः आग्नेय्याम्–ॐभूर्भुवः स्वः अग्नये नमः अग्निमावाहयामि स्थापयामि ॥ भो अग्ने इहागच्छ इह तिष्ठ ॥

३ यमायेत्वस्य दधीचऋषिः आसुर्युष्णिक्छन्दः यमो देवता यमावाहने विनियोगः॥ॐयमाय त्वाङ्गिरस्वते पितृमते स्वाहा॥ स्वाहा घर्म्माꣳस्वाहाघर्म्म?ग्नित्रे॥३/८॥मण्डलाद्बहिः दक्षिणे–ॐभूर्भुवःस्वःयमायनमःयममावा०स्थापयामि॥ भो यम इहागच्छ इह तिष्ठ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

४ अमुन्वन्तामित्यस्य प्रजापतिर्ऋषिः त्रिष्टुप्छन्दः निर्ऋतिर्देवता निर्ऋत्यावाहने विनियोगः॥ ॐअमुक्वन्तुमर्यजमानमिच्छ स्तेनस्ये-त्यामध्विहु तस्करस्य ॥ अन्यमुस्मदिच्छ सा तऽइत्या नमो देवि निर्ऋते तुभ्यमस्तु ॥ ११/१५॥ मण्डलाद्बहिः नैर्ऋत्याम्- ॐभूर्भुवः स्वः निर्ऋतये नमः निर्ऋतिमावाहयामि स्थापयामि ॥ भो निर्ऋते इहागच्छ इह तिष्ठ ॥

५ तत्त्वायामीत्यस्य शुनःशेपऋषिः त्रिष्टुप्छन्दः वरुणो देवता वरुणावाहने विनियोगः॥ ॐतत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः॥ अहेडमानो वरुणेह बोद्ध्युरुशꣳस मा न आयुः प्रमोषीः ॥ १२/१॥ मण्डलाद्बहिः पश्चिमे-ॐभूर्भुवः स्वः वरुणाय नमः वरुणमावाहयामि स्थापयामि ॥ भो वरुण इहागच्छ इह तिष्ठ ॥

६ आनोनियुद्भिरित्यस्य वसिष्ठऋषिः त्रिष्टुप्छन्दः वायुर्देवता वाय्वावाहने विनियोगः ॥ ॐआ नो नियुद्भिः शतिनीभिरध्वरꣳ सहस्रिणीभिरुपयाहि यज्ञम्॥ वायोऽअस्मिन्त्सवने मादयस्व यूयम्पात स्वस्तिभिः सदा नः ॥ १२/५॥ मण्डलाद्बहिः वायव्याम्- ॐभूर्भुवः स्वः वायवे नमः वायुमावाहयामि स्थापयामि ॥ भो वायो इहागच्छ इह तिष्ठ ॥

७ वयꣳसोमेत्यस्य बन्धुर्ऋषिः गायत्रीछन्दः सोमोदेवता सोमावाहने विनियोगः ॥ ॐवयꣳ सोम व्रते तव मनस्तनूषु बिभ्रतः ॥ प्रजावन्तः सचेमहि॥ १२/९॥मण्डलाद्बहिः उत्तरे-ॐभूर्भुवः स्वः सोमायनमः सोममावाहयामि स्थापयामि भो सोमइहागच्छ इह तिष्ठ॥

८ तमीशानमित्यस्य गौतमऋषिः जगतीछन्दः ईशानो देवता ईशानावाहने विनियोगः ॥ ॐतमीशानञ्जगतस्तस्थुषस्पतिन्धिय-ञ्जिन्वमवसे हूमहे वयम् ॥ पूषा नो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥ १२/१ ॥ मण्डलाद्बहिः ईशान्याम्- ॐभूर्भुवः स्वः ईशानाय नमः ईशानमावाहयामि स्थापयामि ॥ भो ईशान इहागच्छ इह तिष्ठ ॥

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

९ अस्मेरुद्रामेहनेत्यस्य भगाथऋषिः त्रिष्टुप्छन्दः ब्रह्मा देवता ब्रह्मावाहने विनियोगः॥अस्मे रुद्रा मेहनु पर्वतासो वृत्रहत्ये भरहूतौ सजोषाः॥ य? शꣳसते स्तुवते धायि पज्रऽइन्द्रज्येष्ठाऽ अस्माँ२ऽ अवन्तु देवा? ॥१०॥ मण्डलाद्बहिः ईशानेन्द्रयोर्मध्ये–ॐभूर्भुवः स्वः ब्रह्मणे नमः ब्रह्माणमावाहयामि स्थापयामि ॥ भो ब्रह्मन् इहागच्छ इह तिष्ठ ॥

१० स्योनापृथिवीत्यस्य मेधातिथिर्ऋषिः गायत्रीछन्दः अनन्तो देवता अनन्तावाहने विनियोगः ॥ ॐस्योना पृथिवि नो भवानृक्षरा निवेशनी ॥ यच्छा नः शर्म्म सुप्रथाः॥१२॥ मण्डलाद्बहिः निर्ऋतिवरुणयोर्मध्ये–ॐभूर्भुवः स्वः अनन्ताय नमः अनन्तमावाहयामि स्थापयामि ॥ भो अनन्त इहागच्छ इह तिष्ठ ॥

प्रतिष्ठापनम्—ॐमनोजूतिर्ज्जुषतामाज्यस्य बृहस्पतिर्य्यज्ञ० ॥११॥ सूर्याद्यावाहितग्रहमण्डलदेवताः सुप्रतिष्ठिताः वरदाः भवत ।

पूजनम्–अग्न्युत्तारणप्राणप्रतिष्ठादिकृतग्रहमूर्तिं ताम्रपात्रे संस्थाप्य ध्यानादारभ्य स्नानान्तमुपचारान्कृत्वा ग्रहमण्डलोपरि स्थापयन्ति तत्र मूलं न पश्यामः ।

ध्यानम्–ॐ ग्रहाऽ ऊर्ज्जाहुतयो व्यन्तो विष्प्राय मतिम् ॥ तेषां विशिष्प्रियाणां वो हविषामूर्ज्जं समग्रभमुपयामगृहीतोसीन्द्राय त्वा जुष्टगृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ॥१॥ ॐभूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः ध्यायामि ॥

आसनम्–ॐपुरुषऽ एवेदꣳ सर्व्वं यद्भूतं यच्च भाव्यम्॥उता०॥२॥ॐभूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः आसनं समर्पयामि॥

पाद्यम्–ॐपुतावानस्य महिमातोज्यायाँश्च पूरुष॥ पादो० ॥३॥ॐभूर्भुवःस्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः पाद्यं समर्पयामि ॥

अर्घ्यम्–धामन्तेविश्वम्भुवनमधिश्रितमन्त?० ॥१३॥ ॐभूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः अर्घ्यं समर्पयामि ॥

आचमनीयम्–ॐत्रिपादूर्द्ध्वऽउदैत्पुरुषऽपादोस्येहा०॥४॥ॐभूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः आचमनीयं समर्पयामि॥

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पञ्चामृतस्नानम्–ॐघृतेनु सीतु मधुनो समज्यतां विश्वेदेवैरनुमतामरुद्भिः÷॥ऊर्जस्वती०॥१५॥ ॐभूर्भुवःस्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः पञ्चामृतस्नानं समर्पयामि॥ पञ्चामृतस्नानान्ते शुद्धोदकस्नानं समर्पयामि ॥ शुद्धोदकस्नानान्ते आचमनीयं समर्पयामि॥

गन्धोदकस्नानम्–गन्धर्वस्त्वाविश्वावसुः परिदधातुविश्वस्यारिष्ट्यैयजमानस्यपरिधिरस्यग्निरिडऽईडित?॥१॥ॐभूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्योनमः गन्धोदकस्नानंसम०॥ गन्धोदकस्नानान्ते शुद्धोदकस्नानंसम०॥ शुद्धोदकस्नानान्ते आचमनीयंसम०॥

उद्वर्तनस्नानम्–ॐअर्हन्धुनासेऽअर्हन्शु?पृक्ष्यत्याम्परुषुपर्क÷॥ गन्धस्तु०॥१६॥ॐभूर्भुवःस्वः सूर्यादिग्रहमण्डलदेवताभ्योनमः उद्वर्तनस्नानं स०॥उद्वर्तनस्नानान्ते उष्णोदकस्नानंसम०॥उष्णोदकस्नानान्ते शुद्धोदकस्नानंसमर्पयामि ॥ शुद्धोदकस्नानान्ते आचमनीयंसम०॥

अभिषेकः–ॐग्रहाऽऊर्ज्जाहुतयो व्यन्तोविप्राय०॥१७॥ ॐभूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः अभिषेकस्नानं समर्पयामि ॥

स्नानम्–ॐशुद्धवालः सर्वशुद्ध०॥१८॥ॐभूर्भुवःस्वःसूर्यादिग्रहमण्डलदेवताभ्योनमःस्नानंसमर्पयामि॥ स्नानान्ते आचमनीयंसमर्पयामि॥

वस्त्रम्–ॐसुजातोज्यो० ॥१९॥ ॐभूर्भुवःस्वःसूर्यादिग्रहमण्डलदेवताभ्योनमः वस्त्रोपवस्त्रेसमर्पयामि॥ वस्त्रान्ते आचमनीयं समर्पयामि॥

उपवीतम्–ॐयुन्नोदेवानां० ॥२०॥ ॐभूर्भुवःस्वःसूर्यादिग्रहमण्डलदेवताभ्योनमः उपवीतं समर्पयामि॥ उपवीतान्तेआचमनीयंसमर्पयामि॥

गन्धः–ॐस्वाङ्कृन्धुर्वाऽअसुनुंस्त्वामिन्द्रुस्त्वाम्बृहुस्पतिं÷॥ त्वामोषधे०॥२१॥ ॐभूर्भुवःस्वःसूर्यादिग्रहमण्डलदेवताभ्योनमःगन्धंसम०॥

अक्षताः–ॐअक्षन्नमीमदन्तुह्यवप्रियाऽअधूक्षत ॥ अस्तो०॥२२॥ ॐभूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्योनमः अक्षतान्समर्पयामि॥

पुष्पाणि–ॐओषधीः प्रतिमोदद्धम्पुष्पवतीः प्रसूवरीः।अश्वा०॥२३॥ ॐभूर्भुवःस्वःसूर्यादिग्रहमण्डलदेवताभ्यो नमः पुष्पाणिस०॥

सौभाग्यद्रव्याणि–ॐअहिरिवभोगैः पर्य्येतिबाहुञ्जयार्या० ॥२४॥ ॐभूर्भुवःस्वःसूर्यादिग्रहमण्डलदेवताभ्योनमःसौभाग्यद्रव्याणिसम०॥

आभूषणानि–ॐस्वर्ण घर्म्मः स्वाहा सुवर्णार्कः स्वाहा०॥२५॥ ॐभूर्भुवःस्वःसूर्यादिग्रहमण्डलदेवताभ्योनमःआभूषणानिसमर्पयामि ॥

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS by MoE-Grant-2

धूपः—ॐअश्वस्य त्वा वृष्ण्ण÷शुक्रा धूपयामि देवयजनेपृथिव्या? ॥ मुखाय त्वा मुखस्य त्वा शीर्ष्णे ॥ अश्वस्य त्वा वृष्ण्ण÷शुक्रा धूपयामि देवयजने पृथिव्या? ॥ मुखाय त्वा०॥ ३/३॥ॐभूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः धूपमाघ्रापयामि ॥

दीपः—ॐअग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहाग्निर्वर्चो मे सूर्यो वर्चो मे वर्चस्वान्भूयासमहमसौ स्वाहा॥सहस्रदाऽ० ४/४॥ ॐभूर्भुवःस्वःसूर्यादिग्रहमण्डलदेवताभ्योनमःदीपंदर्शयामि ॥

नैवेद्यम्-ॐअन्नपतेऽअस्यनोदेह्यनमीवस्यशुष्मिणः÷॥प्रप्रदातारंन्तारिषऽऊर्ज्जंनोधेहिद्विपदेचतुष्पदे ४/४॥ॐभूर्भुवःस्वःसूर्यादिग्रहमण्डलदेवताभ्योनमःनैवेद्यंनिवेदयामि॥देवाग्रेगोमयेनजलेन वा चतुष्कोणंमण्डलंकृत्वातदुपरिनैवेद्यपात्रंनिधायतत्रतुलसींपत्रं निक्षिप्य गायत्री-मन्त्रेण सम्प्रोक्ष्यधेनुमुद्रांप्रदर्श्यग्रासमुद्रयातर्जनीमध्यमाङ्गुष्ठैः—ॐप्राणायस्वाहा। मध्यमानामिकाङ्गुष्ठैः—ॐअपानायस्वाहा। कनिष्ठिका-नामिकाङ्गुष्ठैः-ॐव्यानायस्वाहा।कनिष्ठातर्जन्यङ्गुष्ठैः-ॐउदानायस्वाहा । साङ्गुष्ठाभिः-सर्वाङ्गुलिभिः-ॐसमानायस्वाहा।पूर्वापोशनंस०॥ नैवेद्यमध्ये पानीयम्—एलोशीरलवङ्गादिकर्पूरपरिवासितम्।पाशनार्थं कृतं तोयंगृहाणपरमेश्वर॥ॐभूर्भुवःस्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः नैवेद्यमध्येपानीयंस०॥उत्तरापोशनंसम०॥हस्तप्रक्षालनंसम०॥मुखप्रक्षालनंस०॥आचमनीयंस०॥ करोद्वर्तनार्थेचन्दनंसमर्पयामि ॥

फलम्—ॐया?फलिनीर्य्याऽअफलाऽअपुष्पायाश्चपुष्पिणीः०॥ ५/५॥ ॐभूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः फलं समर्पयामि॥

मुखवासार्थेताम्बूलम्-ॐउतस्माःसुद्रवंतस्तुरण्युत?०॥ ६/६॥ॐभूर्भुवःस्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः मुखवासार्थे ताम्बूलं सम०॥

दक्षिणा—ॐयद्वृत्तंव्यत्पर्यासादानुव्यत्पूर्तंयाश्रुदक्षिणा? ॥ ७/७॥ॐभूर्भुवःस्वः सूर्यादिग्रहमण्डलदेवताभ्योनमःसुवर्णंपुष्पदक्षिणांसमर्पयामि ॥

कर्पूरारार्तिक्यम्—ॐवे देवासो दिव्येकादशस्थ पृथिव्यामध्येकादशस्थाऽअप्सुक्षितो महिनैकादशस्थ ते देवासो यज्ञमिमञ्जुषध्वम्॥ ८/८॥

ॐभूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः कर्पूरार्तिक्यं दर्शयामि ॥ जलेन प्रदक्षिणावर्तनम् । पुष्पैर्देववन्दनम् । अभिवन्दनम् । आत्मवन्दनम् । हस्तप्रक्षालनम् ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रपुष्पाञ्जलिः—ॐ यज्ञेनयज्ञमयजन्तदेवास्तानि० ॥ १६/३१ ॥ ॐभूर्भुवःस्वःसूर्यादिग्रहमण्डलदेवताभ्योनमःमन्त्रपुष्पाञ्जलिंसमर्पयामि ॥
प्रदक्षिणा—ॐसुपर्णस्यासंख्यपरिधयस्त्रिसप्तसमिधः० ॥ १५/१९ ॥ ॐभूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः प्रदक्षिणां समर्पयामि ॥
विशेषार्घ्यम्—अर्घ्यपात्रे जलं सम्पूर्य चन्दनपुष्पाक्षतसहितं नारिकेलं च धृत्वा—आदित्याद्या ग्रहाः सर्वे पीठे चात्र प्रतिष्ठिताः । ते गृह्णन्तु मया दत्तमिदमर्घ्यं नमोऽस्तु वः ॥ ॐभूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः विशेषार्घ्यं समर्पयामि ॥
प्रार्थनापूर्वकनमस्कारः—आयुर्विद्यां धनं सौख्यं यशः शौर्यं च पुष्कलम् । ददातु धनपुत्रान्मे सर्वान्कामांश्च वै सदा ॥ ॐभूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः प्रार्थनापूर्वकं नमस्करोमि ॥
राजोपचाराः—छत्रं च चामरं चैव व्यजनं दर्पणं तथा । पादुकादि च सर्वं वै गृह्यतां परमेश्वर ॥ ॐभूर्भुवः स्वः सूर्यादिग्रहमण्डलदेवताभ्यो नमः राजोपचारान्समर्पयामि ॥ (अभावे कल्पयामि) ॥
अर्पणम्—अनेन यथाज्ञानेन यथामिलितोपचारद्रव्यैः ध्यानावाहनासनपाद्यार्घ्याचमनीयस्नानवस्त्रोपवीतगन्धाक्षतपुष्पधूपदीपनैवेद्य ताम्बूलदक्षिणाप्रदक्षिणामन्त्रपुष्पैः षोडशोपचारैः अन्योपचारैश्च कृतपूजनेन सूर्यादिग्रहमण्डलदेवताः प्रीयन्ताम् ॥
कलशस्थापनम्—वेदीशानदिग्भागे गोमयोपलिप्ते सितैस्तन्दुलैः चतुर्विंशतिदलम् अष्टदलं वा कमलं सकर्णिकं विलिख्य तस्यां कर्णिकायाम् अग्रवणं कलशं कलशस्थापनविधिना स्थापयेत् ॥
भूमिं स्पृष्ट्वा—ॐमही द्यौः पृथिवी च नऽ इमं यज्ञम्मिमिक्षताम् ॥ पिपृतान्नो भरीमभिः ॥ ११/६ ॥
पद्मोपरि यवप्रक्षेपः—ॐओषधयः सम्वदन्त सोमेन सह राज्ञा ॥ यस्मै कृणोति ब्राह्मणस्तꣳ राजन्पारयामसि ॥ १५/१६ ॥
पद्मोपरिकलशंस्थापयेत्—ॐआजिघ्रकलशम्मह्यात्त्वामिशुन्त्विन्दवः।पुनरूर्जानिवर्त्तस्वसानः सहस्रन्धुक्ष्वोरुधारापयस्वती० ॥ १२/८ ॥

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-IGNCA-Grant-2
Kirtikant Sharma Collection, Najafgarh.

कलशेजलपूरणम्–ॐवरुणस्योत्तम्भनमसिवरुणस्यस्कम्भसर्ज्जनीस्थोवरुणस्यऽऋतुसदन्यसिवरुणस्यऽऋतुसदनमसिवरुणस्य०॥ ३६/१॥
गन्धमक्षेपः–ॐत्वाङ्गन्धर्वाऽ अखनँस्त्वामिन्द्रस्त्वाम्बृहुस्पतिः ॥ त्वामोषधे सोमो राजा विद्वान्यक्ष्मादमुच्यत ॥ २/१२ ॥
धान्यमक्षेपः–ॐधान्यमसि धिनुहि देवान्प्राणायत्वोदानायत्वा व्यानायत्वा॥दीर्घामनु प्रसितिमायुषे धान्देवो वः+ सविता०॥ ६/१॥
सर्वौषधिमक्षेपः–ॐयाऽ ओषधीः पूर्वा जाता देवेब्भ्यस्त्रियुगम्पुरा ॥ मनै नु बभ्रूणामुहः शुतन्धामानि सप्त च ॥ ४/३ ॥
दूर्वामक्षेपः–ॐकाण्डात्काण्डात्प्ररोहन्ती परुषःपरुषस्परि ॥ एवा नो दूर्वे प्रतनु सहस्रेण शतेन च ॥ ३०/३३ ॥
पञ्चपल्लवमक्षेपः–ॐअश्वत्थे वो निषदनम्पर्णे वो वसतिष्कृता ॥ गोभाजऽ इत्किलासथ यत्सनवथ पूरुषम् ॥ ५/३ ॥
सप्तमृदमक्षेपः–ॐस्योना पृथिवि नो भवानृक्षरा निवेशनी ॥ यच्छा नः शर्म्मं सुप्रथाः ॥ १०/३१ ॥
फलमक्षेपः–ॐया? फलिनीर्याऽ अफलाऽ अपुष्पा याश्च पुष्पिणीः ॥ बृहुस्पतिप्रसूतास्ता नो मुञ्चन्त्वꣳहसः ॥ ९/१२ ॥
पञ्चरत्नमक्षेपः–ॐपरि वाजपतिः कविरग्निर्हव्यान्यक्रमीत् ॥ दधद्रत्नानि दाशुषे ॥ ३/१५ ॥
हिरण्यमक्षेपः–ॐहिरण्यगुर्भ?समवर्त्तताग्रेभूतस्यजात?पतिरेकऽआसीत्॥सदाधार पृथिवीन्द्यामुतेमाङ्कस्मै देवायहविषाविधेम॥ ४/१॥
रक्तसूत्रेण वस्त्रेण च कलशं वेष्टयेत्–ॐयुवासुवासाः परिवीतऽआगात्सऽउश्रेयान्भवति जायमानः ॥ तं धीरासः कवयऽ उन्नयन्ति स्वाध्यो मनसा देवयन्तः ॥ पारस्करगृह्यसूत्रकाण्डम् २। कण्डिका २। मन्त्रः ९ ॥
पूर्णपात्रमुपरिन्यसेत्–ॐपूर्णा दर्व्वि परा पत सुपूर्णा पुनरापत ॥ वस्नेव विक्रीणावहाऽ इषमूर्ज्जꣳ शतक्रतो ॥ ४/१ ॥
वरुणमावाहयेत्–तत्त्वेत्यस्यशुनःशेपऋषिःत्रिष्टुप्छन्दःवरुणोदेवताव०वि०।ॐतत्त्वायामि०४/१८ॐभू०अस्मिन्कलशेवरुणंसा०आ०स्था०।
प्रतिष्ठापनम्–ॐमनोजूतिर्ज्जुषतामाज्यस्य०॥१३/१॥ॐवरुणसुप्रतिष्ठितो वरदो भव॥ॐभूर्भुवःस्वःवरुणायनमःइत्यनेनसम्पूजयेत् ॥

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पुष्पाक्षतैः-वरुणं शुक्रबिन्दुयं वर्णेन सहितां श्रियम् । सुप्राणु यशसं वर्कुं दधाना पुष्करस्रजम्॥१॥ वरुणमावाह्य पूजयेत्॥

कलशाग्निमन्त्रणपूर्वकदेवतावाहनम् ॥ अनामिकया कलशं स्पृष्ट्वा—सर्वे समुद्राः० । आयान्तु मम०॥ कलशस्य मुखे० । मूले तत्र०॥ कुक्षौ तु०।ऋग्वेदोऽथ०॥अङ्गैश्च सहिताः०।अत्रगायत्री०॥आयान्तुमम०॥वरुणाद्यावाहितकलशाधिष्ठातृदेवताभ्योनमःइत्यनेन पूजयेत्॥

कलशं प्रार्थयेत्—देवदानवसंवादे मथ्यमाने महोदधौ । उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम् ॥ त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः । त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥ शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः । आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ॥ त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः । त्वत्प्रसादादिदं कर्म कर्तुमीहे जलोद्भव । सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा॥ इति प्रार्थयित्वा कलशं स्पृष्ट्वा साङ्गरुद्रजपः कार्यः॥ इति ग्रहस्थापनप्रयोगः ॥

---

१. अत्र केचन अर्वाचीनाः ग्रन्थकाराः कलशेऽम्भसि असङ्ख्यातेति मन्त्रेण रुद्रमावाह्य पूजयन्ति। केचन कलशोपरि पूर्णपात्रे रौप्यमयीं रुद्रमूर्तिं संस्थाप्य पूजयन्ति परं च रुद्रकल्पद्रुमप्रयोगाग्निदेवभट्टकृतप्रतिष्ठाप्रयोगशान्तिरत्नाकरकाशीदीक्षितकृतमहा।रुद्रप्रयोगखण्डदीक्षितकृतमहारुद्रप्रयोगस्मार्तगङ्गाधर्यादिप्राचीनग्रन्थेषु वरुणमावाह्य साङ्गरुद्रजपः कार्यः इत्युक्तत्वात् अस्माभिः प्रयोगे तथैवादृतमस्ति। केचन असङ्ख्यातेतिमन्त्रेण होममपि कुर्वन्ति परं न तत्र मूलवचनं पश्यामः।केचन मरुदेशीयग्रन्थकारास्तु—असङ्ख्यातेति सम्पूज्यो रुद्रो रुद्रघटाम्भसि । प्रजापतेरमागे शनिमण्डलके शुभे ॥ पूज्यो विष्णुः स्वसूक्तेन षोडशर्चेन तत्र वै । रुद्रकुम्भाग्रतः पूज्या चामुण्डा जातवेदसे ॥ यावः शिवेति गौर्यादिमातरश्चैव पूजयेत् ॥ सूर्याच पूर्वदिग्भागे अग्निमीळेऋचा ततः । इषेत्वेति यजुर्वेदं सूर्यादक्षिणतो न्यसेत् ॥ सूर्याच पश्चिमे साम अग्नआयाहि मन्त्रतः । रवेरुत्तरदिग्भागे शन्नोदेवीत्यथर्वणम्। इत्यादिप्रमाणपुरःसरं रुद्रं विष्णुं चामुण्डां गौर्यादिमातरः ऋगादिवेदांश्च ग्रहमण्डले स्थापयन्ति तद्विषये प्राचीनग्रन्थेषु मूलं न पश्यामः ॥ अविरुद्धमतं स्वीकृत्य संस्कारभास्करकारणापि तस्मिन्कलशे असङ्ख्यातेति मन्त्रेण रुद्रस्थापनमुक्तं परं च मत्स्यपुराणादिमन्थेषु मूलं न पश्यामः ॥ गौडानामयमाचारो दरीदृश्यते ॥

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-IGNCA-E-Grant-2

अथ अग्न्युत्तारणम्—यदि ग्रहाणां मूर्तयः स्युः हस्तेजलमादाय देशकालौ स्मृत्वा आसाम् अमुकामुकमूर्तीनाम् अभिसंप्रयोगाऽनवधानादिदोषपरिहारार्थम् अग्न्युत्तारणं करिष्ये ॥ मूर्तीर्घृतेनाभ्यज्य पात्रे निधाय तदुपरि दुग्धमिश्रितजलधारां पातयेत् ॥ समुद्रस्त्वा हिमस्त्वा इति द्वयोः मेधातिथिर्ऋषिः गायत्री छन्दः अग्निर्देवता । उपजमन्निति मेधातिथिर्ऋषिः निचृत्छन्दः अग्निर्देवता । अपाग्निदमित्यस्य मेधातिथिर्ऋषिः बृहतीछन्दः अग्निर्देवता । अग्नेपावकेति यज्ञयुर्ऋषिः गायत्रीछन्दः अग्निर्देवता । सनःपावकेति मेधातिथिर्ऋषिः निचृद्गायत्रीछन्दः अग्निर्देवता । पावकयेति भरद्वाजऋषिः जगती छन्दः अग्निर्देवता । नमस्तइत्यस्य लोपामुद्राऋषिः बृहतीछन्दः अग्निर्देवता । नृषदेवेति लोपामुद्राऋषिः दैवीबृहतीछन्दः अग्निर्देवता वेदेवेति द्वयोः लोपामुद्राऋषिः जगतीछन्दः अग्निर्देवता । प्राणदाइत्यस्य प्रजापतिर्ऋषिः बृहती वा पङ्क्तिश्छन्दः अग्निर्देवता सर्वेषामग्न्युत्तारणे विनियोगः ॥

ॐसमुद्रस्त्वाव्वक्रुयाम्प्रेपरिष्टयामसि॥पुवुकोऽअुस्मव्यंऽशिवोभव॥१॥ हिमस्त्वाज्जरायुणाग्नेपरिष्टयामसि॥पुवुकोऽअुस्मव्यंऽशिवोभव॥२॥ उपजम्मन्नुपवेतुसेवंतरनुदीष्वा॥अग्नेंग्रिसमुपारमसिमण्डूकिताभिरागंहिसेमनोयुज्ञम्पावुकवर्णंऽशिवङ्कृधि॥३॥ अपाग्निदमृत्यंऽसमुद्रस्यनिवेशनम्॥अुक्ष्याँस्तेऽअुस्मत्तपन्तुहेतयंऽपावुकोऽअुस्मव्यंऽशिवोभव॥४॥ अग्नेपावकरोचिषामुन्द्रयदेवजिह्वया॥आदेवान्व्वक्षियक्षिच॥५॥सनंऽपावकदीदिवोग्नेंहुवाँऽऽहावह॥उपयज्ञंहविश्चनंऽ॥६॥पावुकवाश्चितयंन्त्याकृपाःसमंन्नुकुमऽशुवसुनंशानुना॥ तूर्षुयामन्नेतंशस्यनूनमुऽआयोधृणेनतंतृषाणोऽअुजरंऽ॥७॥ नमस्तेहरसेशोचिषेनमस्तेऽअस्त्वर्चिषे॥अुक्ष्याँस्तेऽअुस्मत्तपन्तुहेतयंऽपावुकोऽअुस्मव्यंऽशिवोभव॥८॥ नृषदेवेहंऽप्सुषदेवेहंऽद्वर्हिषदेवेहंऽद्वर्वनुसदेवेहंऽद्स्युर्विदेव॥९॥ वेदेवाद्वेवानाँऽयुक्षियाँषधियानाऽसंवत्सरीणमृषंभागमासते॥ अुहुतादोहविषोयज्ञेऽअस्मिन्तस्युर्याम्पेवन्नुमधुनोघृतस्वः॥१०॥ वेदेवाद्वेवेष्वधिदेवुत्वमायुक्ष्येब्रह्मणंऽपुरऽएतारोंऽअस्य॥वेब्र्योनऽऋतेपर्वतेधामु किंशुनंन तेदिवो न पृथिव्याऽअधिस्नुषु॥११॥ प्राणदाऽअपानुदा व्यानुदा वर्चोदा वरिवोदाः॥ अुक्ष्याँस्तेऽअुस्मत्तपन्तु हेतयंऽपावुकोऽअुस्मव्यंऽशिवो भव॥१२॥ इत्यग्न्युत्तारणम् ॥

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ प्राणप्रतिष्ठाप्रयोगः—अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुरुद्राऋषयः । ऋग्यजुःसामानि छन्दांसि । पराप्राणशक्तिर्देवता । आं बीजं । ह्रीं शक्तिः । क्रों कीलकम् । आसु अमुकामुकप्रतिमासु प्राणप्रतिष्ठापने विनियोगः ॥ ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हों ॐ सं सं हं सः ह्रीं ॐ आं ह्रीं क्रों आसां मूर्तीनां प्राणा इह प्राणाः॥ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हों ॐ सं सं हं सः ह्रीं ॐ आं ह्रीं क्रों आसां मूर्तीनां जीवा इह स्थिताः॥ॐ आं ह्रीं क्रों यं रं लं वं शं षं सं हों ॐ सं सं हं सः ह्रीं ॐ आं ह्रीं क्रों आसाम् अमुकामुकमूर्तीनां सर्वेन्द्रियाणि वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राणपाणिपादपायूपस्थानि इहैवागत्य सुखंचिरंतिष्ठन्तुस्वाहा॥प्रणवस्य पञ्चदशावृत्तीः कुर्यात्॥

प्रतिष्ठापनम्—ॐमनो जूतिर्ज्जुषतामाज्यस्य बृहस्पतिर्य्ययुज्ञमिमन्तनोत्वरिष्टँयज्ञः समिमन्दधातु ॥ विश्वे देवासऽइह मादयन्तु-ॐ३प्रतिष्ठ ॥[१३]॥ ब्राह्मणम्—ॐमनोजूतिर्जुषतामाज्यस्येति । मनसावाऽइदꣳसर्वमाप्नुनसैवैतत्सर्वमाप्नोति बृहस्पतिर्यज्ञमिमंतनोत्वरिष्टंयज्ञꣳसमिमंदधात्वितियद्विद्वदंतत्संदधातिविश्वेदेवासऽइहमादयन्तामितिसर्व्वैवैविश्वेदेवाःसर्व्वꣳवैतत्सन्दधातिसयुदिकामयेतब्रूयात्मजाविष्ठेतियद्युकामयेताप्नुयान्नाद्रियेत ॥ शतपथब्राह्मणकाण्ड १ अध्याय ७ प्रपाठक ६ ब्राह्मण २ कण्डिका २२ ॥ ॐएषवैप्रतिष्ठान्नामयज्ञो यत्रैतेनयज्ञेनयजन्तेसर्वमेवप्रतिष्ठितम्भवति ॥ अमुकामुकदेवताः सुप्रतिष्ठिता वरदा भवत ॥

नेत्रोन्मीलनम्—ॐ ध्रुवस्यासिकुनीनंकश्चक्षुर्दाऽअसिचक्षुर्म्मेदेहि॥३॥गन्धादिपञ्चोपचारान्दत्वाषोडशसंस्कारसिद्ध्येषोडशमणवावृत्तीः ॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐॐ कृत्वा आसाम् अमुकामुकमूर्तीनांषोडशसंस्काराःसम्पद्यन्ताम् ॥ इतिप्राणप्रतिष्ठाप्रयोगः॥

वैकल्पिकपदार्थावधारणंदेवताभिध्यानञ्च—आचार्यःअग्नेः पश्चिमतउपविशेत्॥यजमानस्तुदक्षिणतोऽग्नेर्ब्रह्मणःपश्चिमतउपविष्टएवास्ते॥ आचार्यः आचम्यमाणानायम्यदेशकालौसङ्कीर्त्यकरिष्यमाणग्रहशान्त्याख्येकर्मणिवैकल्पिकपदार्थावधारणंदेवताभिध्यानंचकरिष्ये ॥

१ संकल्पः स्वस्तिवाग्विप्रवरणं भूतनिःसृतिः। पञ्चगव्यैर्भूमिशुद्धिर्मुख्यदेवतपूजनम्। अग्निप्रतिष्ठासूर्यादिग्रहस्थापनपूजनम्। देवतान्वाहितिः पात्रासादनं हविषांकृतिः॥ यथाक्रमं त्यागहोमाविति पौर्वाङ्गकक्रमः।पूजा स्विष्टं नवाहुत्यो बलिः पूर्णाहुतिस्तथा।पूर्णपात्रविमोकावभृत्यर्चनान्तेऽभिषेचनम्। मानस्तोकेति भूतिश्च देवपूजाविसर्जने।भेर्यो-

वैकल्पिकपदार्थावधारणम्—पूर्वेणब्रह्मणोगमनमपरेणवा॥ अग्नेःपश्चिमतःपात्रासादनमुत्तरतोवा॥त्रीणिपवित्राणि॥पवित्रेद्वे॥मोक्षणी-पात्रम्॥आज्यस्थालीचरुस्थालीचतैजसीमृन्मयीवा॥ पालाश्यःसमिधोयज्ञीयवृक्षोद्भवाअन्यावा॥प्राच्यावाधारौविदिशौवा॥सभिद्धतमेऽग्नौ आज्यभागौ आग्नेयमुत्तरपूर्वार्द्धे सौम्यं दक्षिणपूर्वार्द्धे ॥ पूर्णपात्रं दक्षिणावरो वा । एतान्वैकल्पिकपदार्थानहमस्मिन्कर्मणि करिष्ये॥

देवताभिध्यानम्(अन्वाधानम्)समिद्वयंगृहीत्वा—प्रजापतिमिन्द्रमग्निंसोममप्येकैकयाज्याहुत्या॥आदित्यंसोमंभौमंबुधंबृहस्पतिंशुक्रं शनैश्चरंराहुंकेतुमितिनवग्रहान्मधुसर्पिर्दध्याक्ताभिःअर्कादियथालाभसमिच्चरुतिलाज्यद्रव्यैःप्रत्येकंपतिद्रव्येणअष्टाष्टसंख्याकाभिराहुतिभिः॥ ईश्वरमुमांस्कन्दंविष्णुंब्रह्माणमिन्द्रंयमंकालंचित्रगुप्तमित्यधिदेवताःअग्निमप्यपःधरांविष्णुमिन्द्रमिन्द्राणींब्रजापतिंसर्पान्ब्रह्माण-मेताः प्रत्यधिदेवताश्चतैरेवद्रव्यैःप्रतिद्रव्येणचतुश्चतुःसंख्याकाभिराहुतिभिः॥ विनायकंदुर्गांवायुमाकाशमश्विनावितिपञ्चलोकपालान् क्षेत्राधिपतिंवास्तोष्पतिमिन्द्रमग्नियमंनिर्ऋतिंवरुणंवायुंकुबेरमीशानंब्रह्माणम् अनन्तंतैरेवद्रव्यैःप्रतिद्रव्येणद्वाभ्यांद्वाभ्याम्आहुतिभ्यां न्यूनातिरिक्तदोषपरिहारार्थं घृताक्ततिलद्रव्येण व्यस्तसमस्तव्याहृत्या अष्टोत्तरसहस्रैः अष्टोत्तरशतैःअष्टाविंशतिराहुतिभिर्वाशेषेणस्विष्ट-कृतम्॥अग्निंवायुं सूर्यम् अग्नीवरुणौ अग्नीवरुणौ अग्निं वरुणं सवितारं विष्णुं विश्वान्देवान्मरुतःस्वर्कान्वरुणम्आदित्यम्अदितिंप्रजापतिम् एता अङ्गप्रधानार्थदेवताः एकैकयाज्याहुत्या अस्मिन्ग्रहशान्त्याख्ये कर्मण्यहं यक्ष्ये इति समिद्वयं अग्नावादध्यात्॥इति अन्यन्वाधानम्॥

ग्रहो दक्षिणादिदानं कर्मेश्वरार्पणम्॥क्रमोऽयमुत्तराङ्गानां प्रायः स्मार्तेष्विति स्थितिः॥ अत्र श्लोकेऽपि स्मार्तहोमे अन्वाधानम् उक्तम्॥ यद्यपि यजुषां गोभिलहरिहरगदाधरादिभिः अन्वाधानं नोक्तं तथापि प्रयोगरत्नस्मार्तोल्लासस्मार्तगङ्गाधर्यादौ अन्वाधानोक्तेः प्रचुरतरशिष्टाचारप्राप्तत्वाच्चास्माभिः अत्र प्रयोगे अन्वाधानमादृतम्॥रेणुकारिकायाम्—देव-तानामभिध्यानं न करोति विमूढधीः॥वृथा तस्य भवेत्कर्म पूर्वाचार्या वदन्ति हि॥ उल्लेखितमिदं कैश्चिन्नोक्तं कात्यायनादिभिः ॥ वषट्करिष्यन्ध्यायेच्च यास्काचार्योऽब्रवीत्क्र-टम्॥ देवताभिध्यानस्य अकरणे प्रत्यवायः पारिजाते बृहन्मनुः—देवताभिध्यानरूपं ह्यन्वाधानं समिद्धृतम्॥यो मूढधीर्न कुरुते हवनस्यास्यकं फलम् ॥ परशुरामहारुद्रपद्धतौ—देवतानामभिध्यानं न करोत्यत्र मूढधीः।तस्य कर्म वृथैव स्यादिति वेदविदो विदुः॥१वसिष्ठः—यदि ग्रहाणामष्टौ स्यादधिप्रत्यधिकेषु च।चतुश्चतुर्हुनेद्वेरुग्वादीनां द्विद्विसंख्यया॥

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

अथ कुशकण्डिका—अग्नेर्दक्षिणतोब्रह्मासनास्तरणम्॥ तत्रयद्यग्नावस्कुशमयंसंभवतिसाऽग्नयेकुशमयंवाब्रह्मण्यायवेहयअस्मिन्कर्मण्यस्यब्रह्मा भव॥भवामीति प्रतिवचनम्॥तत्र पूर्वेण ब्रह्मणो गमनम्॥—ब्रह्मन् अग्नः प्रणेष्यामि ॥ ॐप्रणयप्रदेवतावर्द्धयत्तमनाकस्यपृष्ठेयजमानोऽमृतु॥सप्तऋषीणाऽमुकृतां मत्र लोकस्तत्रेमं यजमानंधत्तेहि॥ॐप्रणयइतिब्रह्मानुज्ञातःअग्नेरुत्तरतःप्राग्ग्रैःकुशैःआसनत्रयमकल्पनम्॥ तत्र एकम् अग्नेरुत्तरतः।द्वितीयं तदुत्तरतः। तृतीयं तत्पश्चिमे(वायव्यामित्यर्थः)वायव्याश्रितं वारणं चमसं दक्षिणहस्तेनादाय। वामपाणौ प्रागग्रं निधायादक्षिणहस्तोद्धृतपात्रोदकेन आत्माभिमुखं सम्पूर्य। पश्चिमासने निधाय। दक्षिणानामिकया जलमालभ्य ब्रह्मणोमुखमवलोकयन्—अग्नेरुत्तरतः प्राक्कल्पिते प्रणीतासने निदध्यात् ॥ ईशान्यादिपूर्वाग्रैस्त्रिभिस्त्रिभिर्दर्भैः अग्नेः परिस्तरणं तत्र प्रागुदग्ग्रैः दक्षिणतः प्रागग्रैः प्रत्यगुदग्ग्रैः उत्तरतः प्रागग्रैः ॥ अग्नेरुत्तरतः पश्चाद्द्वाप्रयोजनवतांपात्राणांप्राक्संस्थमुदक्संस्थंवाप्रागग्रमुदग्ग्रंवा आसादनम्॥ पवित्रच्छेदनादर्भास्त्रयः॥ साग्रेऽनन्तर्गर्भे पवित्रे द्वे॥ मोक्षणीपात्रम् ॥ आज्यस्थाली॥ चरुस्थाली॥ सम्मार्गकुशाः पञ्च॥ उपयमनकुशाः सप्त ॥ समिधस्तिस्रः ॥ स्रुवः॥ स्रुक्॥ आज्यम् ॥ त्रिःप्रक्षालितास्तण्डुलाः ॥ पूर्णपात्रम्॥ दक्षिणावरोवा यथाशक्ति हिरण्यादिद्रव्यम् ॥ अन्यान्युपकल्पनीयानि अर्कादिसमिधः तिलादिहवनीयद्रव्याणि ॥ इतिपात्रासादनम् ॥

---

१ ब्रह्मा कौशः कार्यः तन्मूलंछन्दोगब्राह्मेऽस्ति ॥ पञ्चाशद्भिः कुशैर्ब्रह्मा इत्युक्तत्वात् पञ्चाशत्सङ्ख्याककुशमयं यथासंभवकुशमयं वटुं स्थापयित्वेत्यर्थः न तु साक्षाद्ब्रह्मण उपवेशनम्॥दक्षिणतो ब्रह्माणमुपवेश्येति चतुर्थीकर्मणि सूत्रणात्॥कारिकाकारोऽपि—अचेतने ब्रह्मशब्दः कुशमुष्टौ च वेदवत्। कुशानां सन्निवेशुक्तः समास्तीर्येति लिङ्गतः ॥ हेमाद्रौ ढौंढुभिश्रपद्धतौ च न दर्भसंख्यानियमः—यज्ञवास्तूनि मुष्टयां च स्तम्बे दर्भवटौ तथा। दर्भसंख्या न विहिता विष्टरास्तरणेषु च ॥ अतश्चदर्भसंख्यायाः संभवासंभवाभ्यां व्यवस्थितो विकल्प इति नारायणवृत्तौ ॥ कर्काचार्यास्तु सर्वत्र साक्षादेव ब्रह्मण उपवेशनं न च दक्षिणतो ब्रह्माणमुपवेश्येत्यनेन पौनरुक्त्यं, तस्मात्तत्र-ज्ञापनार्थत्वादित्याहुः। तदपरे दूषयन्ति—स्थालीपाकश्रपणपूर्वकालतालाभवसरः, स चोत्तरत उदपात्रं प्रतिष्ठाप्य स्थालीपाकं श्रपयित्वेत्यनेनैव लभ्यते, पूर्वकालतायाः समानकर्तृकयोः क्त्वावाच्यत्वात्। क्त्वाप्रत्ययार्थो ह्युत्तरकालता। तथा च उदपात्रं प्रतिष्ठाप्य स्थालीपाकं श्रपयित्वेत्यनेन स्थालीपाकश्रपणस्योदपात्रस्थापनोत्तरकालता बोध्यते। तेन स्थालीपाककरणप्राकालतायाः क्त्वाप्रत्ययादेव लाभाद्यर्थं तदर्थं दक्षिणतो ब्रह्माणमुपवेश्येत्येतत्सूत्रं स्यादत एवं ज्ञायते—चतुर्थीकर्मादौ यत्र साक्षाद्ब्रह्मोपवेशनमुक्तं तत्रैव प्रत्यक्षब्रह्मोपवेशनं नान्यत्रेति॥ परिशिष्टे—ऊर्ध्वकेशो भवेद् ब्रह्मा लम्बकेशस्तु विष्टरः ॥ दक्षिणावर्तो ब्रह्मा च वामावर्तस्तु विष्टरः।

CC-0. Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

पवित्रे कृत्वा—प्रागग्रयोर्द्वयोः पवित्रयोरुपरि उदगग्राणि त्रीणि पवित्राणि निधाय उपरि प्रादेशमात्रमवशेषयित्वा अधोभागे द्वयोर्मूलेन द्वौ कुशौ प्रदक्षिणीकृत्य त्रयाणां मूलाग्राणि एकीकृत्य नखैरस्पृशन् अनामिकाङ्गुष्ठेन द्वयोरग्रं छेदयेत् द्वे ग्राह्ये द्वयोर्मूले त्रीण्युत्तरतः क्षिपेत्॥प्रणीतोत्तरतः प्रोक्षणीपात्रं निधाय तत्र चुलूकेन प्रणीतोदकं त्रिः प्रपूर्य पवित्राभ्यामुत्पूय पवित्रे प्रोक्षणीषु निधाय दक्षिणेन हस्तेन प्रोक्षणीपात्रमुत्थाप्य सव्ये पाणौ कृत्वा दक्षिणहस्तमुत्तानं कृत्वा मध्यमानामिकाङ्गुल्योः मध्यमपर्वाभ्यामपामुद्बिन्दनम्॥ ताभिस्त्रासाम्प्रोक्षणम् ॥ आज्यस्थाल्याः प्रोक्षणम् ॥ चरुस्थाल्याः प्रोक्षणम् ॥ सम्मार्गकुशानां प्रोक्षणम् ॥ उपयमनकुशानां प्रोक्षणम्॥ समिधां प्रोक्षणम् ॥ स्रुवस्य प्रोक्षणम्॥ स्रुचः प्रोक्षणम् ॥ आज्यस्य प्रोक्षणम् ॥ तण्डुलानां प्रोक्षणम् ॥ पूर्णपात्रस्य प्रोक्षणम् ॥ अन्येषामुपकल्पनीयहवनीयद्रव्याणां प्रोक्षणम् ॥ असँञ्चरे प्रोक्षणीपात्रं निधाय ॥ आज्यस्थाल्याम् आज्यनिर्वापो ब्रह्मणः ॥ चरुस्थाल्यां पवित्रे निधाय यजमान आचार्यो वा त्रिःप्रक्षालितांस्तण्डुलान् प्रक्षिप्य तत्र प्रणीतोदकमासिच्य अन्यदपि जलं निषिच्य चरुस्थालीस्थितपवित्रे प्रोक्षणीषु निधाय दक्षिणतः ब्रह्मणः आज्याधिश्रयणम् मध्ये यजमानेन चरोरधिश्रैयणं युगपत् ॥ आज्योत्तरतः

देवताभिध्यानस्य अकरणे प्रत्यवायः ॥ पारिजाते बृहन्मनुः—देवताभिध्यानरूपं ज्ञात्वाधानं समिद्धुतम् । यो मूढधीर्नकुरुते हवनस्याल्पकं फलम् ॥ परशुरामप्रताप्रदपद्धतौ—देवतानामभिध्यानं न करोत्यत्र मूढधीः । तस्य कर्म वृथैव स्यादिति वेदविदो विदुः॥ १ भविष्ये मध्यमपर्वणि—प्रणीताभाजनाद्गृह्य प्रोक्षणीं पूयेत्त्रिभिः । कायतीर्थेन तत्कुर्याद्देवतीर्थेनवेत्यपि ॥ त्रिभिः—त्रिवारमित्यर्थः ॥ २ केचन 'वामकरे पवित्राग्रं दक्षिणे पवित्रयोर्मूलं धृत्वा मध्यतः पवित्राभ्यामुत्पूय' इति वदन्ति तत्र मूलं न पश्यामः ॥ ३ ताभिः प्रणीतापात्रस्थाभिरद्भिः ताभां प्रोक्षणीपात्रस्थापानां प्रोक्षणमित्यर्थः॥विकल्पे प्रोक्षणीपात्रस्थाभिरद्भिः प्रोक्षणीस्थानामपां प्रोक्षणम् ॥ ४ असञ्चरः प्रणीताग्न्योरन्तरालः ॥ परशुरामकारिकायाम्—प्रणीतानैर्ऋतेभागे कुण्डवायव्यगोचरे । असञ्चरं हि विज्ञेयं प्रोक्षणीस्थानमुत्तमम् ॥ इति केचित् ॥ सर्वसम्मतन्तु—प्रणीताग्न्योरन्तराले प्रोक्षणीस्थानमुत्तमम्। अन्यत्र स्थापिता चैव यज्ञकर्ता च ब्रह्महा ॥ ५ शतपथब्राह्मणे—पवित्रवति संवपति पात्र्यां पवित्रेअवधाय ॥ ६ प्रणीतमुदकं कृत्वा स्थाल्यां त्रिः क्षालितान्क्षिपेत् ॥ दैवे त्रिः प्रक्षालिता ज्ञेयाः सकृत्सिक्ते तु तण्डुलाः ॥ ७ अवरोक्तमुत्तरतश्चाहविषि ॥

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

गृहीतेन ज्वलदुल्मुकेन उभयोः ऐशानीमारभ्य ऐशानीपर्यन्तं पर्यग्निकरणम् । इतरथावृत्तिः । अर्धशृते चरौ स्रुवस्य प्रतपनम् । दक्षिणेन हस्तेन स्रुवमादाय प्राञ्चमधोमुखमग्नौ तापयित्वा सव्ये पाणौ कृत्वा दक्षिणेन सम्मार्गाग्रैर्मूलतोऽग्रपर्यन्तं सम्मृज्य मूलैरग्रमारभ्य अधस्तान्मूलपर्यन्तं सम्मृज्य प्रणीतोदकेनाभ्युक्ष्य पुनः पूर्ववत्प्रतप्य दक्षिणतो निदध्यात्॥सम्मार्गकुशानग्नौ प्रास्य आज्योद्वासनम्—अग्नेः सकाशादाज्यं गृहीत्वा चरोः पूर्वेणोत्तरतो नीत्वा अग्नेरुत्तरतः प्रोक्षण्याः पश्चिमे निधाय चरुमुत्थाप्य पूर्वेणाग्नेरुत्तरतः आनीय आज्यस्य पश्चिमतो नीत्वा आज्यस्योत्तरतः निधाय आज्यमग्नेः पश्चादानीय स्थापयेत्। चरुं च आज्यस्य पूर्वेण प्रदक्षिणमानीय आज्यस्योत्तरत आसादयेत् । पवित्राभ्याम् आज्योत्पवनम् । अवेक्षणम् । अपद्रव्यनिरसनम् । ताभ्यामेवाज्यलिप्ताभ्यां पवित्राभ्यां प्रोक्षण्याः प्रत्युत्पवनम् । पवित्रे प्रोक्षण्यां निधाय दक्षिणहस्तेन उपयमनकुशानादाय सव्ये गृहीत्वा दक्षिणेन पाणिना घृताक्तास्तिस्रः समिधः तिष्ठन्नभावाधाय दक्षिणचुलूकगृहीतेन सपवित्रेण प्रोक्षण्युदकेन अग्नेः ईशानकोणादारभ्य ईशानपर्यन्तं प्रदक्षिणवत्पर्युक्षणम् इतरथावृत्तिः। पवित्रयोः प्रणीतासु निधानम् । अग्नेः प्रदीप्तिकरणम् ।

---

१ काश्यायनश्रौतसूत्रे—सम्मार्जनान्यपास्यत्याहवनीये प्राशनमेके ॥ २ अधिश्रुतानां पूर्वेण उद्वासितानां तु पृष्ठतः ॥ * भविष्ये—आज्यपात्रं पुरस्कृत्य पवित्रं च समाक्षेत् । अङ्गुष्ठे द्वे अनामे तु गृह्णीयात्तत्पवित्रकम् ॥ अष्टाङ्गुलं मध्यकृत्वो घृतं त्रिः पवनं चरेत् ॥ पातालेऽस्तथाकाशे अवेक्ष्याज्यं ततस्त्रिभिः ॥ प्रोक्षण्यां च तथा कुर्यादधः संप्रोक्ष्य देशिकः ॥ ३ समिल्लक्षणं स्मृत्यर्थसारे—पलाशखदिराश्वत्थशम्युदुम्बरजा समित् । अपामार्गार्कदूर्वाश्च कुशाश्चेति विदुर्बुधाः ॥ अन्यच्च—अर्कः पलाशः खदिरो ह्यपामार्गोऽथ पिप्पलः । उदुम्बरः शमी दूर्वा कुशाश्च समिधः क्रमात् ॥ सत्वचः समिधः कार्या ऋजुश्लक्ष्णाः समास्तथा । शस्ता दशाङ्गुलास्तास्तु द्वादशाङ्गुलिकास्तु वा । आर्द्राः पक्वाः समच्छेदास्तर्जन्यङ्गुलिवर्तुलाः । अपाटिताश्च द्विशाखाः कृमिदोषविवर्जिताः ॥ ईदृशा होमयेत्प्राज्ञः प्राप्नोति विपुलां श्रियम् ॥ यद्वा—समित्पवित्रं वेदश्च त्रयः प्रादेशसम्मिताः । इध्मस्तु द्विगुणो ज्ञेयः परिधिस्त्रिगुणः स्मृतः ॥ ४ सपवित्राम्बुहस्तेन वह्निं कुर्यात्प्रदक्षिणम् । हव्यवाट् सलिलं दृष्ट्वा विभीतः सम्मुखो भवेत् ॥

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Naiafgarh

॥ अथ आधारहोमः ॥

स्थानोपविष्टः दक्षिणं जान्वाच्य कुशैर्ब्रह्मणान्वारब्धः उपयमनकुशसहितं प्रसारिताङ्गुलिहस्तं हृदि निधाय समिद्धतमेऽग्नौ मनसा प्रजापतिं ध्यायन् प्रणवपूर्वकं तूष्णीं स्रुवेण प्राञ्चमूर्ध्वमृजुं सन्ततमाज्येन अग्नेरुत्तरप्रदेशे पूर्वाधारमाघारयति ॥

१ मनसा ॐ प्रजापतये (अत्र न स्वाहाकारः) प्रोक्षण्यां संस्रवप्रक्षेपः ॥ यजमानः—इदं प्रजापतये न मम ॥

२ अग्नेर्दक्षिणप्रदेशे उत्तराधारमाघारयेत्—ॐइन्द्राय स्वाहा—प्रोक्षण्यां संस्रवप्रक्षेपः—इदमिन्द्राय न मम॥ इत्येतौ पूर्वोत्तरावाघारौ॥

॥ अथ आज्यभागहोमः ॥

३ अग्नेरुत्तरार्धपूर्वार्द्धे—ॐ अग्नये स्वाहा ॥ प्रोक्षण्यां संस्रवप्रक्षेपः ॥ इदमग्नये न मम ॥

४ अग्नेर्दक्षिणार्द्धपूर्वार्द्धे—ॐ सोमाय स्वाहा ॥ प्रोक्षण्यां संस्रवप्रक्षेपः ॥ इदं सोमाय न मम ॥

॥ अथ द्रव्यत्यागसङ्कल्पः ॥

यजमानः हस्ते जलमादाय—इदमुपकल्पितं समिच्चरुतिलाज्यादिहवनीयद्रव्यं या या यक्ष्यमाणदेवतास्ताभ्यस्ताभ्यो मया परित्यक्तं न मम यथादैवतमस्तु ॥

---

१ अन्वारब्ध आधारावाज्यभागौ महाव्याहृतयः सर्वप्रायश्चित्तं प्राजापत्यꣳ स्विष्टकृच्चैतदित्यꣳ सर्वत्र ॥ २ द्रवद्रव्यं स्रुवेणैव पाणिना कठिनं हविः । जुहुयादग्नये स्वाहा सुसमिद्धहुताशने॥ ३ अत्र न स्वाहाकारपठनमिति रुद्रकल्पद्रुमकारसम्मतम् । अन्ये तु ॐ प्रजापतये स्वाहा—इति मनसा ध्यायन्—आहुतिर्देयेति सम्मन्वते॥ अन्ये तु प्रजापतिर्देवतापदमात्रमुपांशु॥होत्रसूत्रे—यस्मिन्मन्त्रादयो न विशायन्ते न स्वरो न व्यञ्जनं केवलमेवौष्ठचाल्नं श्वासो वातदुपाꣳशु॥तथा मनसा संस्मरेत्स्वाहायुक्तं चैव प्रजापतिम् । नैर्ऋतिं दिशमाश्रित्य ऐशानीं पूर्ववद्धरेत् ॥ तत्रेन्द्रायपदं स्वाहा युक्तं चोपांशुकं भवेत् । स्वाहेत्याधारयेदेतावाघाराविति भाषितौ ॥ प्राच्यौ वा जुहुयादेतावृजूसन्ततमेव च । जुहुयादग्नये स्वाहा सोमायेति तथा पराम् ॥ प्रथमेशानकोणाग्रे द्वितीयाग्नेयकोणगा ॥ सुसमिद्धेऽथवा वह्नौ होतव्ये चोत्तराहुती ॥ ४ प्रधानꣳ स्वामी फलयोगात् । बहुकर्तृके होमे यथाकालं प्रत्याहुतित्यागस्य कर्तुमशक्यत्वात् सर्वे होमद्रव्यजातं देवताश्च मनसा ध्यात्वा इदं यथा दैवतमस्तु न ममेत्येवं रूपो द्रव्यत्यागः कार्यः ॥

Kirtikant Sharma Collection, Najafgarh

अग्निपूजनम्—अग्ने नय सुपथा रायेऽअस्मान्विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते नमऽउक्तिं विधेम ॥ ३६ ॥ शान्तिके वरदनामाग्नये नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि । सप्तजिह्वाख्यमुद्रां प्रदर्श्य प्रार्थना—अग्ने त्वमेश्वरं तेजः पावनं परमं हि तत् । तस्माच्चदीयहृत्पद्मे सूर्यादीन्तर्पयाम्यहम् ॥ आचार्यादयः सावधानाः यजमानाभीष्टसिद्धिप्राप्त्यर्थं मधुसर्पिर्दध्याक्तार्कादिसमिदाज्यचरुतिलद्रव्यं चाभिघार्य होमं कुर्युः ॥

घृतस्य वराहुतिः—ॐ गणानान्त्वा गणपतिꣳ हवामहे प्रियाणान्त्वा प्रियपतिꣳ हवामहे निधीनान्त्वा निधिपतिꣳ हवामहे वसो मम ॥ आहमजानि गर्भ्यमा त्वमजासि गर्भ्यम् स्वाहा ॥ १५/२३ ॥ एकाहुतिः आज्यस्य ॥

॥ सूर्यादिनवग्रहाणां प्रत्येकं प्रतिद्रव्यम् अष्टाष्टसंख्यया होमः ॥

१ मधुसर्पिर्दध्याक्तार्कसमिदाज्यचरुतिलाइति द्रव्यचतुष्टयं यथाविभागं गृहीत्वा—आकृष्णेनेत्यस्य हिरण्यस्तूपआङ्गिरसऋषिः त्रिष्टुप्छन्दः सूर्यो देवता सूर्यप्रीतये कपिलौग्नावर्कसमिच्चरुतिलाज्यहोमे विनियोगः—ॐ आ कृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतम्मर्त्यञ्च ॥ हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् स्वाहा ॥ ४३/३३ ॥

---

१ वराहुतिः—कमलाकरः—गणाधिपतये देयात्प्रथमां तु वराहुतिम्। अन्यथा विफलं विप्र भवतीह न संशयः ॥ २ संग्रहे—कोटावधिप्रत्य धेश्वशतमष्टाधिकाहुतिः । विनायकादिदिक्पालान्ताश्चाविंशतिसंख्यया ॥ लक्षे अष्टाविंशतिश्च अधिप्रत्यधिकेषु च । विनायकादिदिक्पालान्ताश्चाष्टसंख्यया हुतिः ॥ अयुतेऽष्टाष्टसंख्याकैरधिप्रत्यधिकेषु च । विनायकादिदिक्पालान्तानां हुत्वा चतुश्चतुः॥ केवले ह्यधिप्रत्यधि हुत्वा चैव चतुश्चतुः। विनायकादिदिक्पाला द्वे द्वे संख्याहुतिर्हुनेत् ॥ हुनेदित्यार्थः प्रयोगः—शुह्वयादित्यर्थः॥ प्रतिग्रहमष्टोत्तरसहस्राष्टोत्तरशताश्चाविंशत्यष्टसङ्ख्यान्यतमसंख्यैर्वा प्रणवादिकैः स्वाहान्तैराकृष्णेनेत्यादिमन्त्रैर्होमः कार्यः॥ वसिष्ठः—यदि ग्रहाणामष्टौ स्यादधिप्रत्यधिकेषु च । चतुश्चतुर्हुनेद्धेरम्बादीनां द्विद्विसङ्ख्यया॥ ३ प्रादेशमात्रादिभिरन्यलक्षाभिर्घृतकीटाद्यजग्धाभिः कनिष्ठावत्स्थूलाभिर्मधुसर्पिर्दध्याक्ताभिरर्कादिसमिद्भिर्होमः कार्यः ॥ ४ ग्रहहोमः स्कान्दे—आदित्ये कपिलो नाम सोमे पिङ्गल उच्यते । धूमकेतुस्तथा भौमे जाठरोग्निर्बुधे स्मृतः॥ गुरौ चैव शिखी नाम शुक्रे भवति हाटकः । शनैश्चरे महातेजा राहुकेत्वोर्हुताशनः ॥ ज्ञात्वैवं ह्यग्निनामानि गृह्यकर्म समाचरेत् ॥

Vartikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

२ मधुसर्पिर्दध्याक्तपलाशसमिदाज्यचरुतिलाइति द्रव्यचतुष्टयं यथाविभागं गृहीत्वा–इमन्देवाइत्यस्य वरुणऋषिः अत्यष्टीछन्दः सोमो देवता सोमप्रीतये पिङ्गलाग्नौ पलाशसमिच्चरुतिलाज्यहोमे विनियोगः॥ॐइमन्देवाऽअसपुक्षऽइमुवद्धम्महुते क्षुत्रायं महुते ज्यैष्ठ्यायं महुते जानराज्यायेन्द्रस्येन्द्रियायं ॥ इषमूर्ज्जमूष्ण्यं पुत्रममुष्ण्यै पुत्रमुस्स्यै विशऽएष वोमी राजा सोमोस्माकम्ब्राह्मणानाङ्राजा स्वाहा॥ ५० ॥

३ मधुसर्पिर्दध्याक्तखादिरसमिच्चरुतिलाज्यद्रव्यचतुष्टयं यथाविभागं गृहीत्वा–अग्निर्म्मूर्द्धेत्यस्य विरूपाक्षऋषिः गायत्रीछन्दः अङ्गारको देवता अङ्गारकप्रीतये धूमकेत्वग्नौ खादिरसमिच्चरुतिलाज्यहोमे विनियोगः ॥ अग्निर्म्मूर्द्धा दिव? ककुत्पतिः पृथिव्याऽ अयम् ॥ अपाꣳ रेताꣳसि जिन्वति स्वाहा ॥ ५१ ॥

४ मधुसर्पिर्दध्याक्तापामार्गसमिदाज्यचरुतिलाइति द्रव्यचतुष्टयं यथाविभागं गृहीत्वा–उद्बुद्ध्यस्वेत्यस्य परमेष्ठीऋषिः त्रिष्टुप्छन्दः बुधो देवता बुधप्रीतये जठरनाम्नाग्नौ अपामार्गसमिच्चरुतिलाज्यहोमे विनियोगः ॥ ॐ उद्बुद्धयस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते सꣳसृजेथामयश्च ॥ अस्मिन्त्सधस्थेऽ अध्युत्तरस्मिन्विश्वे देवा यजमानश्च सीदत स्वाहा ॥ ५२ ॥

कुण्डकल्पद्रुमे–क्षेत्र ग्राह्यं भद्रपीठे द्विहस्तं तद्वत्पीठं खेचराणां विदध्यात्॥ कुण्डतत्त्वप्रदीपे–वेदे पङ्क्तिपदायतां समभुजां मित्स्योत्तरापूर्वयोर्वेद्याः षोडशकाङ्गुलान्तरमिते पीठं द्विहस्तायतम्॥खेटानां रचयेत्करार्द्धमितमुन्नत्या च कुण्डांशतस्यक्त्वा त्रिंशदशाङ्गुलानि नवदिग्यादर्शमध्योन्नतम्॥ग्रहाणां मण्डलप्रमाणम्–पीठंयुग्मकरं मिताय विलिखेत्पद्मं दलैश्चाष्टभिर्युक्तं मध्यमवर्णिकां तु कुदुरे सौरेः सुवृत्तं गृहम्॥चन्द्राश्वर्तुमितांगुलादिमिरिह व्यासार्द्धयुक्तया हि तद्वेदाब्ध्याक्षिमितैस्तथाग्निकदले सौम्यं चतुःकोणिकम् ॥ भौमं याम्यदलेऽक्षिबाणविमितं कुंभान्तरे भूतले वह्नयाप्राप्तिभिरङ्गुलादिरचितं तावन्मिते स्वद्वयम् । एवं व्यस्रियहं निमाय भवदिग्व्यब्ध्यंशविच्छुभयुङ्मूलादङ्गुलमध्यसूत्रमुपरि त्र्यंशं च तिर्यग्द्वयम्॥ मध्यस्थैकभुवं त्रिकोणयुगलं पूर्वापराग्रं लिखेन्मूले वृत्तयुतं शराच्छ्रुतिहतं चन्द्रात्मजस्योत्तमम् । सौम्ये पद्मदले गुरोस्तदहनैरायामसूत्रं भवेद्विस्तारेऽगुलयुग्ममत्रकथितं दीर्घं चतुःस्वस्तिकम् ॥ ऐन्द्र्यां भार्गवपंजरं सुविपुलं त्र्यंशं च पार्श्वद्वये भित्तिद्वयङ्गुलमुच्छ्रिते तदुपरि प्राच्यां त्रिकोणं भवेत् । वेदांशान्तरसूत्रमत्र रचितं पंचास्रमत्युत्तमं वारुण्यां धनुषं शनैः कुमुनिषड्व्यासार्द्धवृत्तार्द्धकम् ॥ स्वर्भानोः शरनेत्ररामयमयुक्पूर्णास्यलक्षैर्लवैर्विष्कुंभं युगदृग्गुणाक्षितिरधः साध्याः सुरे भूः समाः । केतूनां ध्वजमूलभूर्गुणयुगत्वब्ध्यंशमानानिले पंचाशैर्मितमध्यसूत्रमुदितं मूले सुदंडांकितम् ॥ एवं भानुजिनाब्धिवेदरसनिर्ध्यंशैर्जिनांकांगुलाचंद्रैः सद्गुणितेन हर्म्यरचनं सूर्यादिखेटक्रमात् ॥

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-
Kirtikant Sharma Collection, Najafgarh

५ मधुसर्पिर्दध्याक्ताश्वत्थसमिच्चरुतिलाज्यद्रव्यचतुष्टयं यथाविभागं गृहीत्वा ॥ बृहस्पत इत्यस्य गृत्समदऋषिः त्रिष्टुप्छन्दः बृहस्पतिर्देवता बृहस्पतिप्रीतये शिखिनामाग्नौ अश्वत्थसमिच्चरुतिलाज्यहोमे विनियोगः ॥ ॐ बृहस्पतेऽ अति यदुर्य्योऽ अर्हाँद्युमद्विभाति क्रतुमज्जनेषु ॥ यद्दीदयुच्छवसऽ ऋतप्रजातु तदुस्मासु द्रविणन्धेहि चित्रम् स्वाहा ॥ $\frac{9}{22}$ ॥

६ मधुसर्पिर्दध्याक्तोदुम्बरसमिच्चरुतिलाज्यद्रव्यचतुष्टयं यथाविभागं गृहीत्वा ॥ अन्नात्परिस्रुत इत्यस्य अग्निसरस्वतीन्द्राऋषयः अतिजगतीछन्दः शुक्रो देवता शुक्रप्रीतये हाटकाग्नौ उदुम्बरसमिच्चरुतिलाज्यहोमे विनियोगः ॥ ॐ अन्नात्परिस्रुतो रसम्ब्रह्मणा व्यपिबत्क्षत्रम्पयः सोमम्प्रजापतिः ॥ ऋतेन सत्यमिन्द्रियं विपानꣳ शुक्रमन्धसऽ इन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु स्वाहा ॥ $\frac{10}{22}$ ॥

७ मधुसर्पिर्दध्याक्तशमीसमिच्चरुतिलाज्यद्रव्यचतुष्टयं यथाविभागं गृहीत्वा ॥ शन्नो देवीरित्यस्य दध्यङ्गाथर्वणऋषिः गायत्रीछन्दः शनैश्चरो देवता शनैश्चरप्रीतये महातेजस्यग्नौ शमीसमिच्चरुतिलाज्यहोमे विनियोगः ॥ ॐ शन्नो देवीरभिष्टयऽ आपो भवन्तु पीतये ॥ शंय्योरभि स्रवन्तु नः स्वाहा ॥ $\frac{13}{22}$ ॥

८ मधुसर्पिर्दध्याक्तितिन्तिडीदूर्वासमिच्चरुतिलाज्यद्रव्यचतुष्टयं यथाविभागं गृहीत्वा ॥ कयान इत्यस्य वामदेवऋषिः गायत्रीछन्दः राहुर्देवता राहुप्रीतये हुताशनाग्नौ दूर्वासमिच्चरुतिलाज्यहोमे विनियोगः ॥ ॐ कया नश्चित्रऽ आ भुवदूती सदावृधः सखा ॥ कया शचिष्ठया वृता स्वाहा ॥ $\frac{14}{22}$ ॥

९ मधुसर्पिर्दध्याक्तवहुपत्रकुशसमिच्चरुतिलाज्यद्रव्यचतुष्टयं यथाविभागं गृहीत्वा ॥ केतुकृण्वन्नित्यस्य मधुच्छन्दाऋषिः अनिरुक्तागायत्रीछन्दः केतवो देवताः केतुप्रीतये हुताशनाग्नौ कुशसमिच्चरुतिलाज्यहोमे विनियोगः—ॐ केतुकृण्वन्नकेतवे पेशो मर्य्याऽ अपेशसे ॥ समुषद्भिरजायथाः स्वाहा ॥ $\frac{19}{22}$ ॥

---

१ दूर्वाणां तिसृणां तिसृणामेकैकाहुतिः ॥ २ कुशस्य तु बहुपत्रस्यैव त्रिपत्रस्यैकाहुतिरिति भास्करे । ३ रोहिताग्नौ वा ।

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2
Vikant Sharma Collection, Najafgarh

॥ अथाधिदेवतानां मधुसर्पिर्दध्याक्तपलाशसमिच्चरुतिलाज्यैश्चतुश्चतुःसङ्ख्याभिर्होमः ॥

१ त्र्यम्बकमित्यस्य वसिष्ठऋषिः अनुष्टुप्छन्दः त्र्यम्बको रुद्रो देवता ईश्वरप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः ॥ ॐ त्र्यम्बकं यजामहे सुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्व्वारुकमिव बन्धनान्मृत्योर्म्मुक्षीय मामृतात् स्वाहा ॥ १०/३ ॥

२ श्रीश्चत इत्यस्य उत्तरनारायणऋषिः त्रिष्टुप्छन्दः उमा देवता उमाप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः—ॐ श्रीश्च ते लक्ष्मीश्चपत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् ॥ इष्णन्निषाणाम्मुम्मऽ इषाण सर्व्वलोकम्मऽ इषाण स्वाहा ॥ ३३/२९ ॥

३ यदक्रन्द इत्यस्य भार्गवजमदग्निर्दीर्घतमाऋषयः त्रिष्टुप्छन्दः स्कन्दो देवता स्कन्दप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः । ॐ यदक्रन्दः प्रथमजायमानऽ उद्यन्त्समुद्रादुत वा पुरीषात्॥श्येनस्य पक्षा हरिणस्य बाहूऽ उपस्तुत्युम्महि जातन्तेऽ अर्वन् स्वाहा ॥ ३३/२९ ॥

४ विष्णोरराटमित्यस्य प्रजापतिर्ऋषिः यजुश्छन्दः विष्णुर्देवता विष्णुप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः ॥ ॐ विष्णोः रुराटमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोसि ॥ वैष्णवमसि विष्णवे त्वा स्वाहा ॥ ३३/२९ ॥

५ आब्रह्मन्नित्यस्य प्रजापतिर्ऋषिः यजुश्छन्दः ब्रह्मा देवता ब्रह्मप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः—ॐ आ ब्रह्मन्ब्राह्मणो ब्रह्मवर्च्चसी जायतामा राष्ट्रे राजन्यऽ शूरऽ इषव्योतिव्याधी महारथो जायतान्दोग्ध्रीधेनुर्वोढानड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठा? सभेयो युवास्य यजमानस्य वीरो जायताम्निकामे निकामे नः पर्ज्जन्यो वर्षतु फलवत्यो नऽ ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् स्वाहा ॥ ३३/२९ ॥

---

१ अधिदेवतानां पलाशसमिद्भिरेव होमः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

६ सजोषाइन्द्रेत्यस्य विश्वामित्र ऋषिः त्रिष्टुप्छन्दः इन्द्रो देवता इन्द्रप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः ॥ ॐसुजोषाऽ इन्द्र सगणो मरुद्भि᳕ सोमम्पिब वृत्रहा शूर विद्वान् ॥ जहि शत्रूँरप मृधो नुदस्वाथाभयङ्कृणुहि विश्वतो न᳕ स्वाहा ॥ ३७/५ ॥

७ यमायत्वेत्यस्य दध्यङ्ङाथर्वण ऋषिः यजुश्छन्दः यमो देवता यमप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः—यमाय त्वाङ्गिरस्वते पितृमते स्वाहा ॥ स्वाहा घर्म्माय स्वाहा घर्म्म? पित्रे स्वाहा ॥ ३/८ ॥

८ कार्षिरसीत्यस्य प्रजापतिर्ऋषिः अनुष्टुप्छन्दः कालो देवता कालप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः ॥ ॐ कार्षिरसि समुद्रस्य त्वा क्षित्याऽ उन्नयामि ॥ समापोऽ अद्भिरग्मत समोषधीभिरोषधी᳕ स्वाहा ॥ ३९/६ ॥

९ चित्रावसो इत्यस्य हिरण्यस्तूप ऋषिः यजुर्जगतीछन्दः चित्रगुप्तो देवता चित्रगुप्तप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः ॥ ॐ चित्रावसो स्वस्ति ते पार मशीय स्वाहा ॥ ४०/७ ॥ इत्यधिदेवतानां होमः ॥

॥ अथ प्रत्यधिदेवतानां मधुसर्पिर्दध्याक्तपलाशसमिच्चरुतिलाज्यैश्चतुश्चतुःसङ्ख्याभिर्होमः ॥

१ अग्निन्दूतमित्यस्य विरूपाक्षऋषिः गायत्रीछन्दः अग्निर्देवता अग्निप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः ॥ ॐअग्निन्दूतम्पुरो दधे हव्यवाहमुप ब्रुवे ॥ देवाँऽ आ सादयादिह स्वाहा ॥ १७/२२ ॥

२ आपोहिष्ठेत्यस्य सिन्धुद्वीपऋषिः गायत्रीछन्दः आपो देवता अपां प्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः ॥ ॐ आपो हि ष्ठा मयो भुवस्ता नऽ ऊर्ज्जे दधातन ॥ महे रणाय चक्षसे स्वाहा ॥ १५/१६ ॥

३ स्योनापृथिवीत्यस्य मेधातिथिर्ऋषिः गायत्रीछन्दः पृथ्वी देवता पृथ्वीप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः ॥ ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी ॥ यच्छा नः शर्म्म सप्रथाः स्वाहा ॥ १३/१६ ॥

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2
Kirtikant Sharma Collection, Najafgarh

४ इदं विष्णुरित्यस्य मेधातिथिर्ऋषिः गायत्रीछन्दः विष्णुर्देवता विष्णुप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः॥ ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ॥ समूढमस्य पाꣳसुरे स्वाहा ॥ १५ ॥

५ त्रातारमिन्द्रमित्यस्य गर्गऋषिः त्रिष्टुप्छन्दः इन्द्रो देवता इन्द्रप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः॥ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवे हवे सुहवꣳ शूरमिन्द्रम् ॥ ह्वयामि शक्रम्पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः स्वाहा ॥ ५० ॥

६ अदित्यैरास्ना इत्यस्य दध्यङ्ङाथर्वणऋषिः यजुश्छन्दः इन्द्राणी देवता इन्द्राणीप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः–ॐअदित्यै रास्नासीन्द्राण्याऽ उष्णीषः॥ पूषासि घर्म्माय दीष्व स्वाहा ॥ ३ ॥ ३८ ॥

७ प्रजापत इत्यस्य हिरण्यगर्भऋषिः त्रिष्टुप्छन्दः प्रजापतिर्देवता प्रजापतिप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः॥ॐ प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परि ता बभूव॥यत्कामास्ते जुहुमस्तन्नोऽअस्तु वयꣳ स्याम पतयो रयीणाम् स्वाहा॥ ६० ॥

८ नमोस्तुसर्पेभ्यइत्यस्य प्रजापतिर्ऋषिः अनुष्टुप्छन्दः सर्पादेवताः सर्पप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः ॥ ॐ नमोस्तु सर्प्पेभ्यो ये के च पृथिवीमनु ॥ येऽ अन्तरिक्षे ये दिवि तेभ्यः सर्प्पेभ्यो नमः स्वाहा ॥ ६३ ॥

९ ब्रह्मयज्ञानमित्यस्यप्रजापतिर्ऋषिःत्रिष्टुप्छन्दःब्रह्मादेवताब्रह्मप्रीतयेपलाशसमिच्चरुतिलाज्यहोमेविनियोगः॥ॐब्रह्मꣳजज्ञानम्प्रथमम्पुरस्ताद्विसीमत?सुरुचोवेनऽआवः८॥सबुध्न्याऽउपमाऽअस्यविष्ठाः८सतश्चयोनिमसतश्चविवः स्वाहा ६५ ॥इतिप्रत्यधिदेवतानांहोमः॥

विनायकादिपञ्चलोकपालानां स्वस्वमन्त्रैः प्रत्येकं प्रतिद्रव्यं द्वाभ्याम् द्वाभ्यां आहुतिभ्यां होमः कार्यः ॥

१ गणानान्त्वेत्यस्य प्रजापतिर्ऋषिः अनुष्टुप्छन्दः गणपतिर्देवता गणपतिप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः॥

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

ॐ गणानान्त्वा गणपतिꣳ हवामहे प्रियाणान्त्वा प्रियपतिꣳ हवामहे निधीनान्त्वा निधिपतिꣳ हवामहे वसो मम ॥ आहमजानि गर्भ्यमा त्वमजासि गर्भ्यम् स्वाहा ॥ ११/२७ ॥

२ अम्बेअम्बिकेत्यस्य प्रजापतिर्ऋषिः अनुष्टुप्छन्दः दुर्गादेवता दुर्गाप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः । ॐ अम्बेऽअम्बिकेऽम्बालिके न मा नयति कश्चन ॥ ससस्त्यश्वुक? सुभद्रिकाङ्काम्पीलवासिनीम् स्वाहा ॥ १६/२७ ॥

३ आनइत्यस्य वसिष्ठऋषिः त्रिष्टुप्छन्दः वायुर्देवता वायुप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः—ॐ आ नो नियुद्भिः शतिनीभिरध्वरꣳ सहस्रिणीभिरुप याहि यज्ञम् ॥ वायोऽअस्मिन्त्सवने मादयस्व यूयम्पात स्वस्तिभिꣳ सदा नꣳ स्वाहा ॥ ३८/२७ ॥

४ घृतंघृतपावानइत्यस्य प्रजापतिर्ऋषिः ऋचांपङ्क्तिश्छन्दः आकाशोदेवता आकाशप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः॥ ॐ घृतह्नृतपावानꣳपिबतुवसांवसापावानꣳपिबतुान्तरिक्षस्यहुविरासिस्वाहा॥ दिशꣳप्रदिशꣳआदिशोंविदिशꣳउद्दिशोंदिग्भ्य?स्वाहा ११/२७॥

५ यावाङ्कुशेत्यस्य मेधातिथिर्ऋषिः गायत्रीछन्दः अश्विनौदेवते अश्विनोः प्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः॥ ॐ या वाङ्कुशा मधुमत्यश्विना सूनृतावती ॥ तया यज्ञम्मिमिक्षतम् स्वाहा ॥ १७॥ इति विनायकादिपञ्चलोकपालदेवताहोमः ॥

॥ क्षेत्रपालस्य वास्तोश्च स्वस्वमंत्राभ्यां प्रत्येकं प्रतिद्रव्यं द्वाभ्यां द्वाभ्याम् आहुतिभ्यां होमः कार्यः ॥

१नहिस्पशमविदमित्यस्य विश्वामित्रऋषिःत्रिष्टुप्छन्दः क्षेत्राधिपतिर्देवताक्षेत्राधिपतिप्रीतयेपलाशसमिच्चरुतिलाज्यहोमेविनियोगः ॥ ॐ नुहि स्पशमविदन्नुक्थमुस्मार्द्वैश्वानुराच्चुरऽएतारमुग्ने?॥ एमेनमवृधन्नमृताऽअमर्त्यं वैश्वानुरꣳक्षैत्रजित्यायदेवा? स्वाहा॥ १८/२७॥

२ वास्तोष्पत इत्यस्य वसिष्ठऋषिः त्रिष्टुप्छन्दः वास्तोष्पतिर्देवता वास्तोष्पतिप्रीतये औदुम्बरसमिच्चरुतिलाज्यहोमे विनियोगः॥ ॐ वास्तोष्पते प्रतिजानीह्यस्मान्त्स्वावेशो अनमीवो भवानः ॥ यत्त्वेमहे प्रतितन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे स्वाहा ॥

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥ इन्द्रादिदशदिक्पालानां स्वस्वमन्त्रैः प्रत्येकं प्रतिद्रव्यं द्वाभ्यां द्वाभ्याम् आहुतिभ्यां होमः कार्यः ॥

१ त्रातारमित्यस्य गर्गऋषिः त्रिष्टुप्छन्दः इन्द्रो देवता इन्द्रप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः ॥ ॐ त्रातारमिन्द्र मवितारमिन्द्रꣳ हवे हवे सुहवꣳ शूरमिन्द्रम् ॥ ह्वयामि शक्रम्पुरुहूतमिन्द्रꣳस्वस्ति नो मघवाधात्विन्द्रः स्वाहा ॥ ५/१० ॥

२ त्वन्नोऽअग्नेइत्यस्य हिरण्यस्तूपआङ्गिरसऋषिः जगतीछन्दः अग्निर्देवता अग्निप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः ॥ ॐत्वन्नोऽअग्नेवरुणस्यविद्वान्देवस्य हेडोऽअवयासिसीष्ठाः॥यजिष्ठो वह्नितमꣳ शोशुचानोविश्वाद्वेषाꣳसिप्रमुमुग्ध्यस्मत् स्वाहा॥२/२०॥

३ यमायेत्यस्य दधीचऋषिः आसुर्युष्णिक्छन्दः यमो देवता यमप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः—ॐ यमाय त्वाङ्गिरस्वते पितृमते स्वाहा ॥ स्वाहा घर्म्माय स्वाहा घर्म्मः? पित्रे स्वाहा ॥ ५/८ ॥

४ अमुष्त्वन्तमित्यस्य प्रजापतिर्ऋषिः त्रिष्टुप्छन्दः निर्ऋतिर्देवता निर्ऋतिप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः—ॐअमुष्त्वन्तुमर्यजमानमिच्छ स्तेनस्येत्थामक्विहि तस्करस्य॥ अक्ष्यमुस्म्मदिच्छ सा तऽइत्या नमो देवि निर्ऋते तुभ्यमस्तु स्वाहा ॥६/१५॥

५ तच्चायामीत्यस्य शुनःशेपऋषिः त्रिष्टुप्छन्दः वरुणोदेवता वरुणप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः—ॐतच्चा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः॥ अहेडमानो वरुणेह बोध्युरुशꣳस मा नऽआयुः प्रमोषीः स्वाहा ॥३/१९॥

६ आनोनियुद्भिरित्यस्य वसिष्ठऋषिः त्रिष्टुप्छन्दः वायुर्देवता वायुप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः॥ ॐ आ नो नियुद्भिः शतिनीभिरध्वरꣳ सहस्रिणीभिरुपयाहि यज्ञम्॥वायोऽअस्मिन्सवने मादयस्व यूयम्पात स्वस्तिभिः सदा नः स्वाहा॥३/२०॥

७ वयꣳसोमेत्यस्य वन्धुर्ऋषिः गायत्रीछन्दः सोमोदेवता सोमप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः ॥ ॐ वयꣳसोम व्रते तव मनस्तनूषु विभ्रतः ॥ प्रजावन्तः सचेमहि स्वाहा ॥ ५/१ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

८ तमीशानमित्यस्य गौतमऋषिः जगती छन्दः ईशानो देवता ईशानप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः–ॐ तमीशा॑नुजगंतस्तुस्थुषस्पतिंन्धियञ्जिन्वमवंसे हूमहे वयम् ॥ पूषा नो॒ यथा॒ वेदंसामसद्वृधे रक्षिता॒ पायुरदब्धः॑ स्वस्तयें स्वाहा ॥ १८/२५ ॥

९ अस्मेरुद्रामेहनेत्यस्य प्रगाथऋषिः त्रिष्टुप्छन्दः ब्रह्मादेवता ब्रह्मप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः॥ॐअस्मे रुद्रा मेहना पर्व॑तासो वृत्रहत्ये भर॑हूतौ सजोषा॑ः ॥ यः शꣳ संते स्तुवते धायिं पुज्रऽ इन्द्रज्येष्ठाऽअस्माꣳऽअ॑वन्तु देवा॒ स्वाहा ॥ २०/२६ ॥

१० स्योनापृथिवीत्यस्य मेधातिथिर्ऋषिः गायत्रीछन्दः अनन्तोदेवता अनन्तप्रीतये पलाशसमिच्चरुतिलाज्यहोमे विनियोगः॥ ॐ स्योना पृ॑थिवि नो भवानृक्षरा नि॒वेश॑नी ॥ यच्छा॑ नः॒ शर्म्मं॑ सुप्रथा॑ः स्वाहा ॥ १३/१६ ॥ इति इन्द्रादि दश दिक्पाल होमः ॥

॥ गुर्जराचाराद् गुग्गुलहोमः ॥

गुग्गुलं घृतेनाभिघार्य–त्र्यम्बकमित्यस्य वसिष्ठऋषिः अनुष्टुप्छन्दः रुद्रो देवता त्र्यम्बकप्रीतये गुग्गुलहोमे विनियोगः ॥ ॐ त्र्यम्बकं य॒जामहे सुगन्धिम्पुं॑ष्टि॒वर्द्धनम् ॥ उर्व्वारु॑कमि॑व॒ बन्धनान्मृ॒त्योर्म्मु॑क्षीय॒ मामृतात् स्वाहा ॥ १०/३ ॥

॥ गुर्जराचाराद् शत्रुविनाशार्थं सर्षपहोमः ॥

सर्षपान् घृतेनाभिघार्य–सजोषाइत्यस्य विश्वामित्रऋषिः निचृदार्षीत्रिष्टुप्छन्दः इन्द्रोदेवता शत्रुविध्वस्तये सर्षपहोमे विनियोगः॥ ॐसु॒जोषा॑ऽ इन्द्र सगंणो मरुद्भि॑ः सोमंम्पिव वृत्रहा शू॑र विद्वान्॥ जहि शत्रूँ॑ रप मृधो॑ नुदस्वाथाभ॑यङ्कृणुहि विश्वतो॑नः॑ स्वाहा ॥३७/७॥

---

१ अत्र गुग्गुलहोमः सर्षपहोमः लक्ष्मीहोमश्च कृताकृतः गुर्जरदेशीयैरेवाद्रियतेनान्यैः प्राचीनग्रन्थेषु प्रमाणाभावात्॥ २ अत्र केचन–ॐ जातवे॑दसे सुनवा॒मसोम॑मरातियतो निद॑हातिवे॑द÷॥सन॑÷पर्षदतिदु॑र्गाणि॒ विश्वानावे॒वसिन्धुं॑ दुरि॒तात्य॒ग्नि÷॥ इत्यपि मन्त्रं पठन्ति परं चायं मन्त्रो ऋग्वेदीयत्वात् परशाखीयः ॥

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

॥ गुर्जराचारात् लक्ष्मीहोमः ॥

क्षीरदूर्वादाडिमादि होमद्रव्याणि एकीकृत्य घृतेनाभिघार्य मनस इत्यस्य दधीचऋषिः निचृदार्षीबृहतीछन्दः श्रीर्देवता लक्ष्मीहोमे विनियोगः—ॐ मनसु॰ कामुमाकूतिं वाच?सुन्यमशीय ॥ पशूनाꣳ रूपमन्नस्य रसो यशु॰ श्री?श्रयतुाम्मयि स्वाहा ॥ ५/५ ॥

अथन्यूनातिरिक्तपरिपूरणार्थं घृताक्तकृष्णतिलद्रव्येण व्यस्तसमस्तव्याहृत्या अष्टोत्तरसहस्रैः अष्टोत्तरशतैः अष्टाविंशतिभिराहुतिभिर्वा व्याहृतिहोमः ॥

यजमानः हस्ते जलमादाय—अस्मिन्ग्रहशान्त्याख्ये कर्मणि देशतः कालतस्तन्त्रतो मन्त्रतो वा ज्ञानतोऽज्ञानतो वा अयथाकरणन्यूनकरणचतुर्विधकर्मातिरिक्तकरणप्रेषजातमत्यवायपरिहारद्वाराकर्मसाद्गुण्यसिद्धये तथा प्रधानदेवताभ्योश्च मध्ये गमने तथा समिदाज्यचरुतिलादिहविषां मध्ये अन्यतमस्याभावे होमस्वाहाकारयोः पूर्वापराभावे अग्निमध्ये हविर्गतकीटाद्युपघाते प्रणीताभ्योर्मध्ये गमने प्रणीतास्कन्दे इध्मपरिस्तरणादिदाहे कुण्डाद्बहिरग्निपतने समिच्चरुतिलाज्यमध्ये कृमिकीटकादिसंयोगे होममन्त्रपठनसमये स्वरवर्णादिविस्मृतौ देवतावदानमन्त्रतन्त्रकर्मविपर्यासमक्षिकाकीटकेशादिभिर्हविर्दुष्टदग्धपाकहितस्थाने होमाकरणादिज्ञाताज्ञातदोषपरिहारार्थम्—

घृताक्तकृष्णतिलद्रव्येण व्यस्तसमस्तव्याहृत्या अष्टोत्तरसहस्रैरष्टोत्तरशतैरष्टाविंशतिभिराहुतिभिर्वा होमं करिष्ये ॥

पुनर्जलमादाय—भूर्भुवः स्वरितितिसृणां महाव्याहृतीनां प्रजापतिर्ऋषिः गायत्र्युष्णिगनुष्टुप्छन्दांसि क्रमेण अग्निवायुसूर्या देवताः सर्वासां वा प्रजापतिर्देवता प्रायश्चित्तहोमे विनियोगः ॥

१ ॐभूः स्वाहा ॥ २ ॐभुवः स्वाहा॥ ३ ॐस्वः स्वाहा॥ ४ ॐभूर्भुवः स्वः स्वाहा॥ एवं सप्तवारं होमे अष्टाविंशत्याहुतयः भवन्ति । सप्तविंशतिवारं होमे अष्टोत्तरशताहुतयः भवन्ति। द्विपञ्चाशदधिकशतद्वयाहुतिहोमे(२५२) अष्टोत्तरसहस्राहुतयः भवन्ति ॥

१ सीताफलं क्षीरमाज्यं दाडिमं मधु शर्करा ॥ शमीपत्राणि दूर्वा च बिल्वपत्राणि तन्दुलाः ॥ कदलीफलमिश्राणि कृत्वा वै जुहुयात्ततः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

॥ अथ उत्तरपूजनम् ॥

हस्तेजलमादाय पूर्वोचारितशुभपुण्यतिथौ कृतस्य ग्रहशान्त्याख्यकर्मणः साङ्गतासिद्धयर्थं स्थापितदेवतानां मृडाग्नेश्चोत्तरपूजनं करिष्ये॥

गणपतिपूजनम्—गणानान्त्वेत्यस्य प्रजापतिर्ऋषिः आर्षीबृहतीछन्दः गणपतिर्देवता गणपतिपूजने विनियोगः ॥ ॐ गणानान्त्वा गणपतिꣳ हवामहे प्रियाणान्त्वा प्रियपतिꣳ हवामहे निधीनान्त्वा निधिपतिꣳ हवामहे वसो मम॥ आहमजानि गर्भ्यमाऽत्वमजासि गर्भ्यम् ॥ $\frac{१५}{२३}$ ॥ ॐ भूर्भुवःस्वः सिद्धिबुद्धिसहितमहागणपतये नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ॥

मातृकापूजनम्—समख्यइत्यस्य वत्सऋषिः आस्तारपङ्क्तिश्छन्दः मातृकादेवता वसोःपवित्रमित्यस्य प्रजापतिर्ऋषिः यजुश्छन्दः वसोर्द्धारादेवता उत्तरपूजने विनियोगः॥ ॐ समक्ख्ये देव्याधिया सन्दक्षिणयोरुचक्षसा॥ मा मऽ आयुः प्रमोषीर्म्मोऽ अहन्तव दुरिं विदेयु तव देवि सुन्दशि ॥ $\frac{२३}{४}$ ॥ ॐ वसोः पवित्रमसि शतधारꣳ वसोः पवित्रमसि सहस्रधारम् ॥ देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः ॥ $\frac{३}{१}$ ॥ ॐ भूर्भुवः स्वः वसोर्द्धारासहितसगणेशगौर्याद्यावाहितमातृभ्यो नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ॥

ग्रहमण्डलदेवतापूजनम्—ग्रहाइत्यस्य बृहस्पतिर्ऋषिः अनुष्टुप्छन्दः ग्रहादेवताःसूर्याद्यावाहितग्रहमण्डलदेवतापूजने विनियोगः ॥ ग्रहाऽ ऊर्ज्जाहुतयोऽअन्तो विष्पाय मुतिम् ॥ तेषां विशिप्रियाणां ब्रोहमिषमूर्ज्जꣳहुसर्मग्रभमुपयामगृहीतोसीन्द्राय त्वाजुष्टꣳगृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम्॥ $\frac{४}{२}$ ॥ॐ भूर्भुवः स्वः सूर्याद्यावाहितग्रहमण्डलदेवताभ्यो नमःसर्वोपचारार्थे गन्धाक्षतपुष्पाणिसमर्पयामि ॥

---

१ उत्तराङ्गानि—पूजा स्विष्टं नवाहुत्यो बलिः पूर्णाहुतिस्तथा ॥ श्रेयः सम्पाद्यं दानं च ह्यभिषेको विसर्जनम् ॥ २ यज्ञपार्श्वे कल्पद्रुमे च—पूर्वं प्रज्वलितो ह्यग्निर्हविर्हव्यबुभुजितः । तृप्तो निर्धूमनिर्ज्वालो मृडाग्निः परिकीर्तितः ॥ ३ अवकाशे सति षोडशोपचारैर्वा पूजयेत् ॥ बृहच्छौनकः—हूयमाने हविर्यज्ञे बहिः पतति यद्धविः । द्रप्सश्च स्कन्दमन्त्रेण तदग्नौ निक्षिपेत्पुनः ॥ इति तद्धूयमानचर्वाद्याहुतेः हस्ताद् भूमौ पाते ज्ञेयम् ॥

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding by MoE-Grant-
Kirtikant Sharma Collection, Najafgarh

अग्निपूजनम्—अग्नेनयेत्यस्य अगस्त्यऋषिः त्रिष्टुप्छन्दः अग्निर्देवता अग्निपूजने विनियोगः ॥ ॐ अग्ने नय सुपथा रायेऽ-
स्मान्विश्वानि देव वयुनानि विद्वान् ॥ युयोध्यस्मज्जुहुराण मेनो भूयिष्ठान्ते नमऽ उक्तिं विधेम ॥११॥ ॐ भूर्भुवः स्वः स्वाहा-
स्वधायुताय मृडाग्नये नमः सर्वोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ॥ इत्युत्तरपूजनम् ॥

स्विष्टकृद्धोमः—हविःशेषोत्तरार्धात् द्विर्द्विरवदानधर्मेणावदाय द्विरभिघार्य ब्रह्मणा अन्वारब्धः—ॐ अग्नये स्विष्टकृते
स्वाहा—इदमग्नये स्विष्टकृते न मम ॥ उदकोपस्पर्शः ॥

॥ ब्रह्मणान्वारब्धः नवाहुतिहोमः ॥

भूरित्यस्य प्रजापतिर्ऋषिः गायत्रीछन्दः अग्निर्देवता भुवरित्यस्य प्रजापतिर्ऋषिः उष्णिक्छन्दः वायुर्देवता स्वरित्यस्य
प्रजापतिर्ऋषिः अनुष्टुप्छन्दः सूर्यो देवता—स्वन्नो ऽअग्नइत्यस्य हिरण्यस्तूपत्रामदेवऋषिः जगतीछन्दः अग्नीवरुणौ देवते सत्त्वन्न

---

१ अग्नये गन्धादिकं बहिरेव देयमिति कल्पद्रुमकाराः ॥ अन्ये तु मध्ये पूजनमिच्छन्ति । विष्णुधर्मोत्तरे—मध्येऽपि गन्धपुष्पादीन्दद्यादग्नेर्न संशयः । बहिर्नैवे-
त्यमात्रन्तु दातव्यमिति निश्चितम् ॥ २ कल्पद्रुमे—उत्तरपूजाम् अत्रावसरे केचिन्मन्यन्ते अन्ये तु नवाहुतिहोमान्ते अपरे तु यजमानाभिषेकान्ते ॥ ३ अनेकदिन-
साध्यहोमश्चेत्तदापर्युषितदोषपरिहारार्थं हविःशेषं स्विष्टकृदर्थं घृतमध्ये स्थापयेत् ॥ नष्टे दुष्टे वा हविषि आज्येनैव स्विष्टकृद्धोमः ॥ ४ अन्वारब्धआधारावाज्यभागौ
महाव्याहृतयः सर्वप्रायश्चित्तं प्राजापत्यꣳ स्विष्टकृच्च ॥ एतन्नित्यꣳ सर्वत्र ॥ जयरामः—एतच्चतुर्दशाहुतिकं नित्यं सर्वकर्मसु भवति यत्र यत्र होमोस्ति ॥ तथा च
प्राङ्महाव्याहृतिभ्यः स्विष्टकृदन्यत्रेदाज्याद्धविः शेषास्विष्टकृते समवद्यति यावद्धविरुत्तरार्धात्स्विष्टकृत्॥ नाज्यादशेषात् ॥ आज्यैकहविष्के कर्मणि शेषादाज्यादन्ते स्विष्ट-
कृत्यागः॥ तत एव होमः ॥ तत इत्युत्तरइत्यर्थः॥ असंसृष्टामाहुतिभिः॥ ५ रौद्रत्वात्—रौद्रꣳराक्षसमासुरमाभिचरणिकं मन्त्रमुक्त्वापिप्यमात्मानं चालम्भ्योपस्पृशेदपः॥
आत्माहृदयम् ॥ चात्कर्मं चं कृत्वेति ॥ काण्डानुसमये पूजनम्—हेमाद्रौ भविष्योत्तरे संग्रहे च—एकैकस्यावाहनादिपुष्पाञ्जल्यन्तपूजनम् । समाप्य च ततोऽन्यस्य इति
काण्डोऽनुकीर्तितः ॥ पदार्थानुसमयेन पूजनम्—सर्वेषामेकतन्त्रेण रुद्रादीनां यथाविधि । पूजनं तु प्रकर्तव्यं पदार्थोऽनुप्रकीर्तितः ॥

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

इत्यस्य वामदेवऋषिः त्रिष्टुप्छन्दः अग्नीवरुणौ देवते अयाश्चाग्नइत्यस्य वामदेवऋषिः बृहती छन्दः अग्निर्देवता येतेशतमित्यस्य वामदेवऋषिः त्रिष्टुप्छन्दः वरुणः सविता विष्णुर्विश्वेदेवा मरुतः स्वर्काश्च देवताः उदुत्तममित्यस्य शुनःशेपऋषिः त्रिष्टुप्छन्दः वरुणादयो देवताः प्रजापतय इत्यस्य ब्रह्माऋषिः यजुश्छन्दः प्रजापतिर्देवता सर्वेषां होमे विनियोगः॥ सर्वत्र ब्रह्मणा अन्वारब्धः—

१ ॐ भूः स्वाहा । इदमग्नये न मम ॥ २ ॐ भुवः स्वाहा । इदं वायवे न मम ॥ ३ ॐ स्वः स्वाहा । इदं सूर्याय न मम ॥

४ ॐ त्वन्नोऽ अग्ने वरुणस्य विद्वान्देवस्य हेडोऽ अवयासिसीष्ठाः ॥ यजिष्ठो वह्नितमः शोशुचानो विश्वाद्वेषाᳬसि प्रमुमुग्ध्यस्मत् स्वाहा ॥ $\frac{3}{25}$ ॥ इदमग्नीवरुणाभ्यां न मम ॥

५ स त्वन्नोऽअग्नेवमो भवोती नेदिष्ठोऽ अस्याऽउषसो व्युष्टौ ॥ अवयक्ष्वनो वरुणꣳ रराणो वीहि मृडीकꣳ सुहवो नऽ एधि स्वाहा ॥ $\frac{4}{25}$ ॥ इदमग्नीवरुणाभ्यां न मम ॥

६ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्त्वमयाऽ असि॥ अयानो यज्ञं वहास्ययानोधेहिभेषजꣳ स्वाहा॥इदमग्नये अयसे न मम॥

७ ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः॥ तेभिर्नोऽअद्यसवितोत विष्णुर्विश्वेमुञ्चन्तु मरुतः स्वर्काः स्वाहा॥ इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम ॥

८ ॐ उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमꣳ श्रथाय । अथा वयमादित्य व्रते तवानागसोऽ अदितये स्याम स्वाहा ॥ $\frac{5}{25}$ ॥ इदं वरुणाय आदित्याय अदितये च न मम ॥

९ ॐ प्रजापतये स्वाहा—इदं प्रजापतये न मम ॥ इति नवाहुतिहोमः ॥

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding JKS-MoE-Grant-
Kirtikant Sharma Collection, Najafgarh

बलिदानप्रयोगः ॥ हस्ते जलमादाय—आरब्धस्य ग्रहमखाख्यस्य कर्मणः साङ्गतासिद्ध्यर्थं दिक्पालपूर्वकं स्थापितदेवताभ्यो बलिदानं करिष्ये ॥

१ त्रातारमित्यस्य गर्गऋषिः त्रिष्टुप्छन्दः इन्द्रो देवता इन्द्रप्रीतये बलिदाने विनियोगः—ॐ त्रातारमिन्द्रमवितारमिन्द्रꣳ हवे हवे सहवꣳ शूरमिन्द्रम् ॥ ह्वयामि शक्रम्पुरुहूतमिन्द्रꣳस्वस्तिनो मघवा धात्विन्द्रः ॥ ५० ॥ प्राच्याम् इन्द्रं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि ॥ इन्द्राय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपमाषभक्तबलिं समर्पयामि ॥ भो इन्द्र दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्याभ्युदयं कुरु ॥ आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव ॥ अनेन बलिदानेन इन्द्रः प्रीयताम् ॥

२ त्वन्नोअग्नइत्यस्य हिरण्यस्तूपआङ्गिरसऋषिः जगती छन्दः अग्निर्देवता अग्निप्रीत्यर्थे बलिदाने विनियोगः—ॐ त्वन्नोऽ अग्ने वरुणस्य विद्वान्देवस्य हेडोऽ अवयासिसीष्ठाः ।यजिष्ठो वह्नितमꣳ शोशुचानो विश्वाद्वेषाꣳसि प्रमुमुग्ध्यस्मत् ॥ ३/२ ॥ आग्नेय्याम् अग्निं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि ॥ अग्नये साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय

---

१ दिक्पालेभ्यः एकतन्त्रेण बलिदानपक्षे—ॐ प्राच्यै दिशे स्वाहेन्द्राय दिशे स्वाहा दक्षिणायै दिशे स्वाहेन्द्राय दिशे स्वाहा प्रतीच्यै दिशे स्वाहेन्द्राय दिशे स्वाहोदीच्यै दिशे स्वाहेन्द्राय दिशे स्वाहेन्द्राय दिशे स्वाहा ध्रुवायै दिशे स्वाहेन्द्राय दिशे स्वाहेन्द्राय दिशे स्वाहोर्ध्वायै दिशे स्वाहेन्द्राय दिशे स्वाहेन्द्राय दिशे स्वाहा ॥ १५/२ ॥ इन्द्रादिदशदिक्पालान् साङ्गान् सपरिवारान् सायुधान् सशक्तिकान् एभिर्गन्धाद्युपचारैर्वः अहं पूजयामि ॥ इन्द्रादिदशदिक्पालेभ्यः साङ्गेभ्यः सपरिवारेभ्यः सशक्तिकेभ्यः इमं सदीपमाषभक्तबलिं समर्पयामि ॥ भो भो इन्द्रादिदशदिक्पालाः दिशं रक्षत बलिं भक्षत मम सकुटुम्बस्याभ्युदयं कुरुत ॥ आयुःकर्तारः क्षेमकर्तारः शान्तिकर्तारः पुष्टिकर्तारः तुष्टिकर्तारः निर्विघ्नकर्तारः वरदाः भवत ॥ अनेन बलिदानेन इन्द्रादिदशदिक्पालाः प्रीयन्ताम् ॥

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

इमं सदीपमाषभक्तबलिं समर्पयामि ॥ भो अग्ने दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्याभ्युदयं कुरु ॥ आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव ॥ अनेन बलिदानेन अग्निः प्रीयताम् ॥

३ यमायत्वेत्यस्य दधीचऋषिः आसुर्युष्णिक्छन्दः यमोदेवता यमप्रीत्यर्थे बलिदाने विनियोगः—ॐ युमायुस्वाङ्गिरस्वते पितृमते स्वाहा ॥ स्वाहा घुर्म्माय स्वाहा घुर्म्म? पित्रे ॥ ३/२२॥ दक्षिणस्यां यमं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि ॥ यमाय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपमाषभक्तबलिं समर्पयामि ॥ भो यम दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्याभ्युदयं कुरु॥ आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव ॥ अनेन बलिदानेन यमः प्रीयताम्॥

४ असुन्वन्तमित्यस्य प्रजापतिर्ऋषिः त्रिष्टुप्छन्दः निर्ऋतिर्देवता निर्ऋतिप्रीत्यर्थे बलिदाने विनियोगः—ॐ असुन्वन्तमयजमानमिच्छस्तेनस्येत्यामन्विहि तस्करस्य ॥ अन्यमुस्मन्निधेच्छ साते ऽ इत्यानमो देवि निर्ऋते तुभ्यमस्तु ॥ ३/२३॥ नैर्ऋत्यां निर्ऋतिं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि ॥ निर्ऋतये साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपमाषभक्तबलिं समर्पयामि ॥ भो निर्ऋते दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्याभ्युदयं कुरु ॥ आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव ॥ अनेन बलिदानेन निर्ऋतिः प्रीयताम् ॥

५ तत्त्वायामीत्यस्य शुनःशेपऋषिः त्रिष्टुप्छन्दः वरुणो देवता वरुणप्रीत्यर्थे बलिदाने विनियोगः—ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हुविर्भिः÷॥ अहेडमानो वरुणेह बोध्युरुशꣳसमा नु ऽ आयुः प्रमोषीः ॥ ३/२४ ॥ पश्चिमायां वरुणं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि ॥ वरुणाय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपमाषभक्तबलिं समर्पयामि ॥ भो वरुण दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्याभ्युदयं कुरु ॥ आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव ॥ अनेन बलिदानेन वरुणः प्रीयताम् ॥

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

६ आनोनियुद्भिरित्यस्य वसिष्ठऋषिः त्रिष्टुप्छन्दः वायुर्देवता वायुप्रीत्यर्थे बलिदाने विनियोगः—ॐ आनो नियुद्भिः॑ शतिनीभिरध्वरꣳ सहस्रिणीभिरुपयाहि यज्ञम् ॥ वायोऽअस्मिन्त्सवने मादयस्व यूयम्पातस्वस्तिभिः॑ सदा नः॑ ॥३६॥ वायव्यां वायुं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि ॥ वायवे साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपमाषभक्तबलिं समर्पयामि ॥ भो वायो दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्याभ्युदयं कुरु ॥ आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव ॥ अनेन बलिदानेन वायुः प्रीयताम् ॥

७ वयꣳ सोमेत्यस्य बन्धुर्ऋषिः गायत्रीछन्दः सोमो देवता सोमप्रीत्यर्थे बलिदाने विनियोगः—ॐ वयꣳ सोम व्रते तव मनस्तनूषु बिभ्रतः॑ ॥ प्रजावन्तः॑ सचेमहि ॥ ३५/३ ॥ उदीच्यां सोमं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि ॥ सोमाय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपमाषभक्तबलिं समर्पयामि ॥ भो सोम दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्याभ्युदयं कुरु ॥ आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव ॥ अनेन बलिदानेन सोमः प्रीयताम् ॥

८ तमीशानमित्यस्य गौतमऋषिः जगतीछन्दः ईशानो देवता ईशानप्रीत्यर्थे बलिदाने विनियोगः—ॐ तमीशानꣳ जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसे हूमहे वयम् ॥ पूषानो यथा वेदसामसद्वृधे रक्षिता पायुरदब्धः॑ स्वस्तये ॥३६॥ ईशान्याम् । ईशानं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि ॥ ईशानाय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपमाषभक्तबलिं समर्पयामि ॥ भो ईशान दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्याभ्युदयं कुरु ॥ आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव ॥ अनेन बलिदानेन ईशानः प्रीयताम् ॥

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

९ अस्मेरुद्रामेहनेत्यस्य प्रगाथऋषिः त्रिष्टुप्छन्दः ब्रह्मा देवता ब्रह्मणीत्यर्थे बलिदाने विनियोगः—ॐ अुस्मे रुद्रा मेहनु पर्वतासो वृत्रहत्ये भरहूतौ सुजोषा॑ः ॥ य? शꣳसंते स्तुवतेधायि पुज्ज्रऽ इन्द्रज्येष्ठाऽ अुस्मा२ँऽ अवन्तु देवा? ॥ ११/१३ ॥ पूर्वेशानयोर्मध्ये ऊर्ध्वायां ब्रह्माणं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि ॥ ब्रह्मणे साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपमाषभक्तबलिं समर्पयामि ॥ भो ब्रह्मन् दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्याभ्युदयं कुरु ॥ आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव ॥ अनेन बलिदानेन ब्रह्मा प्रीयताम् ॥

१० स्योनापृथिवीत्यस्य मेधातिथिर्ऋषिः गायत्रीछन्दः अनन्तो देवता अनन्तप्रीत्यर्थे बलिदाने विनियोगः—ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी ॥ यच्छा नः शर्म॑ सुप्रथा॑ः ॥ ३/३६ ॥ निर्ऋतिपश्चिमयोर्मध्ये अधःस्थायां दिशि अनन्तं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि ॥ अनन्ताय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपमाषभक्तबलिं समर्पयामि ॥ भो अनन्त दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्याभ्युदयं कुरु ॥ आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव ॥ अनेन बलिदानेन अनन्तः प्रीयताम् ॥

॥ स्थापितदेवतावलिदानम् ॥

१ गणेशबलिः—गणानान्त्वेत्यस्य प्रजापतिर्ऋषिः आर्षीबृहतीछन्दः गणपतिर्देवता बलिदाने विनियोगः—ॐ गुणानान्त्वा गुणपतिꣳ हवामहे प्रियाणान्त्वा प्रियपतिꣳ हवामहे निधीनान्त्वा निधिपतिꣳ हवामहे वसो मम ॥ आहमजानिगर्भ्युधमात्वमजासिगर्भ्युधम् ॥ ११/१३ ॥ गणपतिं साङ्गं सपरिवारं सायुधं सशक्तिकम् एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि ॥ गणपतये साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय इमं सदीपमाषभक्तबलिं समर्पयामि ॥ भो गणपते इमं बलिं गृहाण मम सकुटुम्बस्याभ्युदयं कुरु ॥ आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव ॥ अनेन बलिदानेन गणपतिः प्रीयताम् ॥

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding by MoE-Grant-
Kirtikant Sharma Collection, Najafgarh

२ मातृकाबलिः—समक्ख्यइत्यस्य वत्सऋषिः आस्तारपङ्क्तिश्छन्दः वाग्देवतामातृप्रीत्यर्थे बलिदाने विनियोगः—ॐ समक्ख्ये देष्ठा धिया सन्दक्षिणयोरुचक्षसा ॥ मा मुऽ आयुः प्रमोषीर्मोऽ अहन्तव वीरं विदेयु तव देवि सुन्दर्शि ॥ $\frac{33}{5}$ ॥ वसोर्द्धारा-सहितसगणेशगौर्याद्यावाहितमातः साङ्गाः सपरिवाराः सायुधाः सशक्तिकाः एभिर्गन्धाद्युपचारैः वः अहं पूजयामि ॥ वसोर्द्धारास-हितसगणेशगौर्याद्यावाहितमातृभ्यः साङ्गाभ्यः सपरिवाराभ्यः सायुधाभ्यः सशक्तिकाभ्यः इमं सदीपमाषभक्तबलिं समर्पयामि ॥ भो वसोर्द्धारासहितसगणेशगौर्याद्यावाहितमातरः इमं बलिं गृह्णीत मम सकुटुम्बस्याभ्युदयं कुरुत ॥ आयुःकर्त्र्यः क्षेमकर्त्र्यः शान्तिकर्त्र्यः पुष्टिकर्त्र्यः तुष्टिकर्त्र्यः निर्विघ्नकर्त्र्यः वरदाः भवत ॥ अनेन बलिदानेन वसोर्द्धारासहितसगणेशगौर्याद्यावाहितमातरः प्रीयन्ताम् ॥

३ ग्रहबलिः—ग्रहाइत्यस्य बृहस्पतिर्ऋषिः निचृदार्ष्यनुष्टुप्छन्दः ग्रहा देवताः सूर्याद्यावाहितग्रहप्रीत्यर्थे बलिदाने विनियोगः-ॐग्रहाऽऊर्ज्जाहुतयो व्यन्तो विष्पाय मतिम् ॥ तेषां विशिष्प्रियाणां वोहमिषुमूर्ज्जꣳ समग्रभमुपयाभगृहीतोसीन्द्राय त्वा जुष्टङ्गृह्णाम्युषते योनिरिन्द्राय त्वा जुष्टतमम् ॥ $\frac{\text{५}}{\text{२}}$ ॥ आदित्याद्यावाहितदेवताः साङ्गाः सपरिवाराः सायुधाः सशक्तिकाः एभि-र्गन्धाद्युपचारैः वः अहं पूजयामि ॥ आदित्याद्यावाहितदेवताभ्यः साङ्गाभ्यः सपरिवाराभ्यः सायुधाभ्यः सशक्तिकाभ्यः इमं सदीप-माषभक्तबलिं समर्पयामि ॥ भो भो आदित्याद्यावाहितदेवताः साङ्गाः सपरिवाराः सायुधाः सशक्तिकाः इमं बलिं गृह्णीत मम सकुटुम्बस्याभ्युदयं कुरुत॥ आयुःकर्त्र्यः क्षेमकर्त्र्यः शान्तिकर्त्र्यः पुष्टिकर्त्र्यः तुष्टिकर्त्र्यः निर्विघ्नकर्त्र्यः वरदाः भवत॥ अनेन बलिदा-नेन आदित्याद्यावाहितदेवताः प्रीयन्ताम् ॥

४ क्षेत्रपालमहाबलिः—षण्डपाढ्यहिः वंशपात्रे सदीपमाषभक्तदध्योदनताम्बूलदक्षिणाकूष्माण्डोदकुम्भयुतं बलिं संस्थाप्य हरिद्राकुङ्कुमसिन्दूरपताकायुतं कृत्वा । हस्ते जलमादाय० अद्य पूर्वोच्चारितशुभपुण्यतिथौ सकलारिष्टशान्तिपूर्वकं मारीप्सितस्य ग्रहशान्त्याख्यस्य कर्मणः साङ्गतासिद्ध्यर्थं क्षेत्रपालाय पूजनपूर्वकं बलिदानं करिष्ये ॥ बलिदानपात्रे पूगीफले क्षेत्रपालमावाहयेत् ॥

१ हेमाद्रिः—तोदकुम्भं सकूष्माण्डं क्षेत्रपालबलिं हरेत् ॥ चतुर्वर्तिसमायुक्तं दीपं तत्र निधापयेत् ॥

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

५ नहिस्पशमित्यस्य विश्वामित्रऋषिः त्रिष्टुप्छन्दः क्षेत्रपालो देवता क्षेत्रपालपूजने बलिदाने च विनियोगः—ॐ नुहि स्पशुमविं-दन्नुक्थमुस्मद्रैश्वानुराच्चुरऽपुतारमुग्ने?॥ एमे नमदृधक्नुमृताऽअमर्त्यं वैश्वानुरङ्क्रत्रिजित्यायदेवा?॥६।७।१॥ॐ भूर्भुवः स्वः क्षेत्रपालाय नमः क्षेत्रपालमावाहयामि स्थापयामि ॥ क्षेत्रपालाय नमः इत्यनेन षोडशोपचारैः पञ्चोपचारैर्वा सम्पूजयेत् ॥ प्रार्थयेत्—ॐ नमामि क्षेत्रपाल त्वां भूतप्रेतगणाधिप । पूजां बलिं गृहाणेमं सौम्यो भवतु सर्वदा ॥ आयुरारोग्यमस्मे देहि निर्विघ्नं कुरु सर्वदा ॥ मा विघ्नं मोऽस्तु मे पापं मा सन्तु परिपन्थिनः॥ सौम्या भवन्तु तृप्ताश्च भूतप्रेताः सुखावहाः॥ यं यं यं यक्षरूपं दशदिशिवदनं भूमिकम्पाय-मानं संसंसंहारमूर्तिं शिरमुकुटजटाशेखरं चन्द्रबिम्बम् । दं दं दं दीर्घकेशं विकृतनखमुखं चोर्ध्वरेखाकपालं पं पं पं पापनाशं प्रण-तपशुपतिं भैरवं क्षेत्रपालम् ॥ ॐ नमो क्षेत्रपाल चित्रतुरङ्गवाहन सर्वभूतप्रेतपिशाचशाकिनीडाकिनीवेताळादिपरिवृत दध्योदनप्रिय सकलशक्तिसहित इमां पूजां गृहाण ॥ अनया पूजया क्षेत्रपालः प्रीयताम् ॥

क्षेत्रपालाय साङ्गाय सपरिवाराय वर्वरकेशाय भूतप्रेतपिशाचशाकिनीडाकिनीकूष्माण्डगणवेताळादियुताय सायुधाय सशक्ति-काय सवाहनाय इमं सदीपभाषभक्तबलिं समर्पयामि ॥

भो क्षेत्रपाल सर्वतो दिशं रक्ष बलिं भक्ष मम सकुटुम्बस्याभ्युदयं कुरु॥ आयुःकर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता वरदो भव ॥ अनेन बलिदानेन क्षेत्रपालः प्रीयताम् ॥

पश्चादनवेक्षमाणेन दुर्ब्राह्मणेन शूद्रेण वा बलिं नीत्वा चतुष्पथे स्थापयेत् ॥

यजमानस्तस्य पृष्ठतो द्वारपर्यन्तं गत्वा जलं क्षिपेत्—हिङ्कारायेत्यादीनां प्रस्कण्वऋषिः दैवीत्रिष्टुप्दैवीपङ्क्तिर्दैवी नगतीछन्दांसि लिङ्गोक्ता देवता जलक्षेपणे विनियोगः । ॐ—हिङ्कारायु स्वाहा हिङ्कृतायु स्वाहा क्रन्दते स्वाहावक्रन्दायु स्वाहा प्रोथते स्वाहा

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding by MoE-Grant-

त्थायु स्वाहा गुन्धाय स्वाहा ग्लाताय स्वाहा निविष्टाय स्वाहोपविष्टाय स्वाहा सन्दिताय स्वाहा बल्गते स्वाहासीनाय स्वाहा शयानाय स्वाहा स्वपते स्वाहा जाग्रते स्वाहा कूजते स्वाहा प्रबुद्धाय स्वाहा विजृम्भमाणाय स्वाहा विचेष्टाय स्वाहा सङ्हानाय स्वाहोपस्थिताय स्वाहायनाय स्वाहा प्रायणाय स्वाहा ॥ ५ ॥ पाणिपादं प्रक्षाल्य आचामेत् ॥

पूर्णाहुतिहोमः तत्र उपकल्पनीयानि—आज्यस्थाली होमावशिष्टादाज्यादन्यदाज्यं वैकङ्कतीस्रुक् खादिरः स्रुवः सम्मार्गकुशाः पवित्रे नारिकेलफलं ताम्बूलवीटकं पूगीफलं पट्टवस्त्रखण्डं रक्तसूत्रं पुष्पाणि पुष्पमाला च इत्युपकल्प्य हस्ते जलमादाय अद्यपूर्वो-चारितशुभपुण्यतिथौ कृतस्य ग्रहशान्त्याख्यस्य सम्पूर्णतासिद्ध्यर्थं वसोर्धारासमन्वितं पूर्णाहुतिहोमं करिष्ये ॥

आज्यं निरूप्याग्नावधिश्रित्य स्रुवं स्रुचं च प्रतप्य सम्मार्गकुशैः सम्मृज्य प्रणीतोदकेनाभ्युक्ष्य पुनः प्रतप्य अग्नेः पश्चिमतो याम्यायां निदध्यात् ॥ आज्यमुद्वास्य पवित्राभ्यामुत्पूय अवेक्ष्य अपद्रव्यं निरस्य स्रुवेण चतुर्वारमाज्यं स्रुचि गृहीत्वा शिष्टाचाराच्चस्यां सपूगी-फलं ताम्बूलवीटकं निधाय तदुपरि रक्तवस्त्रवेष्टितं रक्तसूत्रबद्धं पुष्पमालापरिवेष्टितं सिन्दूरादिभिश्चर्चितं नारिकेलफलं निधाय अधो-मुखस्रुवच्छन्नां तां स्रुचमादाय वामस्तनान्तमानीय यजमानान्वारब्धः आचार्यः आसीन एव पूर्णाहुतिं जुहुयात् ॥

---

१ प्रयोगदर्पणे रेणुः—अस्या हि ग्रहशान्त्यास्तु होमस्य परिपूर्त्यै पूर्णाहुतिं करिष्येऽहं वसोर्धारासमन्विताम्॥ अन्यदाज्यं समानीयाधिश्रिते स्रुक्स्रुवावुभौ। तौ तु प्रतप्य सम्मार्गकुशैः सम्मृज्य सिञ्चयेत्॥ पुनः प्रतप्य याम्यायां निदध्यात्स्रुक्स्रुवौ च तौ॥ आज्यमुद्वास्य चोत्पूयावेक्ष्यापद्रव्यनिष्कृतिः॥ चतुर्यंशीतमाज्यं तदुद्गृहीत्वा स्रुचिमध्यतः। वस्त्रताम्बूलपूगाद्यैफलपुष्पसमन्विताम्॥ अधोमुखस्रुवच्छन्नां गन्धमाल्याद्यलङ्कृताम्॥ पूर्वं दक्षिणहस्तेन पश्चाद्वामेन पाणिना॥ गृहीत्वाथ स्रुचं कर्ता शङ्खसन्निभमुद्रया। वामस्तना-न्तमानीय नाभिमूलांस्रुचं ततः॥ ॐ प्रमध्यममध्यैर्यं मूलमध्यममध्यतः। पाणिद्वयेन होतव्यं पाणिरेको निरर्थकः॥ सततमाज्यधारां तां पूर्णाहुतिमथाचरेत्। समुद्रादूर्मिवत्तेन पुनस्त्वेत्यनयाथवा॥ ससेतेऽग्न इति वा मूर्द्धानन्दिवमन्त्रतः। पूर्णादर्वीतिमन्त्रेण पूर्णाहुतिमथाचरेत्॥ २ रुद्रकल्पद्रुमहोमपरिच्छेदे—केचित्तिष्ठन् पूर्णाहुतिमाचरन्ति तन्निर्मूलम्॥ परशुसममहारुद्रप्रयोगे—होमोऽग्नौ द्विविधः प्रोक्तः श्रौतः स्मार्तश्च होतृभिः। श्रौतो यजतिसंज्ञोऽसौ स्मार्तो जुहोतिसंज्ञकः॥ तिष्ठता हूयते यत्र याज्यया चानुवाक्यया।

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

Kirtikant Sharma Collection, Najafgarh

सङ्कल्पः—समुद्रादूर्मिरित्येकादशर्चस्य वामदेवऋषिः त्रिष्टुप्छन्दः यज्ञपुरुषो देवता पुनस्त्वेत्यस्य प्रजापतिर्ऋषिः त्रिष्टुप्छन्दः अग्निर्देवता सप्ततअग्नइत्यस्य सप्तऋषयः त्रिष्टुप्छन्दः अग्निर्देवता मूर्द्धानमित्यस्य भरद्वाजऋषिः त्रिष्टुप्छन्दः अग्निर्देवता पूर्णादर्वीत्यस्य और्णवाभऋषिः अनुष्टुप्छन्दः शतक्रतुर्देवता सर्वेषां पूर्णाहुतिहोमे विनियोगः ॥ ॐसमुद्रादूर्म्मिर्मधुमाँ२उदारदुपाꣳशुना सꣳसमृत्त्वमानट् ॥ घृतस्य नामु गुह्यँ य्यदस्ति जिह्वा देवानामुसृतस्य नाभिः ॥ ५/१ ॥ वयꣳसोमु व्रते तवामना घृतस्यास्मिन्यज्ञे धारयामा नमोभिः॥उपब्रह्मा शृणवच्छस्यमानुश्रत्तु+ शृङ्गोवमीद्गौरऽ उतत्॥१॥चत्वारि शृङ्गा त्रयोऽ अस्य पादा द्वे शीर्षे सप्त हस्तासोऽ अस्य॥त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ२ऽ आविवेश ॥२॥ त्रिधा हितम्पणिभिर्गुह्यमानङ्गवि देवासो घृतमन्वविन्दन्॥ इन्द्रऽ एकꣳ सूर्य्यऽ एकञ्जजान वेनादेकꣳ स्वधया निष्टतक्षुः ॥ ५/३ ॥ एताऽ अर्षन्ति हृद्याꣳसमुद्राच्छतव्रजा रिपुणा नावचक्षे ॥ घृतस्यधाराऽ अभिचाकशीमि हिरण्ययो वेतसो मध्यऽ आसाम् ॥ ५/४ ॥ सुम्भ्यक्स्रवन्ति सरितो नधेनाऽ अन्तर्हृदा मनसा पूयमानाः ॥ एतेऽ अर्षन्त्यूर्म्मयो घृतस्य मृगाऽ इव क्षिपणोरीषमाणाः ॥ ५/५ ॥ सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः पतयन्तियुह्वा?॥ घृतस्य धाराऽ अरुषो न वाजी काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः॥५/६॥ अभिप्रवन्त समनेव योषाः कल्याण्यःस्मयमानासोऽ अग्निम् ॥ घृतस्य धाराः समिधो नसन्त ता जुषाणो हर्य्यति जातवेदाः ॥ ५/७ ॥ कुम्भ्राऽइववहतुमेतुवाऽ ऽऽस

वषट्काराप्रदानेन स श्रौतः परिकीर्तितः ॥ यत्र होत्रोपविष्टेन स्वाहाकारेण हूयते । स स्मार्त इति विज्ञेयः पूर्णाहुत्यादिकर्मसु ॥ केचिदुत्थाय कुर्वन्ति कात्यायनमतं न तत् । तस्मादध्वर्युणा कार्या पूर्णाहीनेन सर्वदा ॥ कल्पद्रुमे तथा खण्डदीक्षितमहारुद्रपद्धतौ तु ऋचा एव पूर्णाहुतिः ॥ अन्येषां मन्त्राणामपि विकल्पेनैव पूर्णाहुतिः प्रोक्ता यथा—सप्ततेअग्न इति मन्त्रेण वा अत्र इदमग्नये सप्तवत इति त्यागः ॥ मूर्धानन्दिवइत्यनेन वा अत्र इदमग्नये वैश्वानरायेति त्यागः ॥ समुद्रादूर्मिरितिऋचेन वा पुनस्त्वेति वा पूर्णादर्वीत्यनया वा त्रयाणामिदमग्नय इति त्यागः ॥ केचन विकल्पं विहाय सर्वैरपि मन्त्रैः पूर्णाहुतिहोमं कुर्वन्ति तदेतत्करणं मन्त्राणां विकल्पानुगमात् समुच्चये च प्रमाणाभावात् चिन्त्यमिति कल्पद्रुमकाराः ॥

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding by IKS-MoE-Grant-

अक्तोरुषासानाऽ अभिचाकशीमि ॥ यत्र सोमः सूयते यत्र यज्ञो घृतस्य धाराऽ अभि तत्पवन्ते ॥ ५/१७॥
अभ्यर्षत सुष्टुतिङ्गव्यमाजिमस्मासु भद्रा द्रविणानि धत्त ॥ इमं यज्ञन्नयत देवता नो घृतस्य धारा मधुमत्पवन्ते ॥ ५/१८॥
धामन्ते विश्वमुभयन्तमधि श्रितमन्त? समुद्रे हृद्यन्तरायुषि ॥ अपामनीके समिथे यऽ आभृतस्तमश्याम मधुमन्तन्तऽ ऊर्म्मिम् ॥ ५/१९॥
पुनस्त्वादित्या रुद्रावसवः समिन्धतामपुनर्ब्रह्माणो वसुनीथयज्ञैः? ॥ घृतेन त्वन्तनूवं वर्द्धयस्व सत्या? सन्तु यजमानस्य कामाः ॥ ५/२०॥
सुप्त तेऽअग्ने समिधः सुप्तजिह्वा?सुप्तऽ ऋषयः सुप्तधाम प्रियाणि॥सुप्त होत्राः सप्तधात्वा यजन्ति सप्त योनीरापृणस्व घृतेन स्वाहा॥ ५/२१
मूर्द्धानन्दिवोऽ अरतिम्पृथिव्या वैश्वानरमृतऽ आ जातमग्निम्॥ कविः सम्राजमतिथिञ्जनानामासन्ना पात्रञ्जनयन्त देवाः?॥ ५/२२॥
पूर्णा दर्वि परा पत सुपूर्णा पुनरापत ॥ वस्नेव विक्रीणावहाऽ इषमूर्ज्जः शतक्रतो ॥ ५/२३ ॥

अथ प्रातुर्हुतेवाहुते वा यतरथा कामयेतु सोस्याऽ अनिरशितायै कुंभ्यै दर्व्योपहन्ति पूर्णा दर्वि परापत सुपूर्णा पुनरापत ॥ वस्नेवविक्रीणावहाऽ इषमूर्ज्जः शतक्रतो स्वाहा ॥ कां० २ । अ० ५ । प्रपाठकः ४ । ब्रा० ४

त्यागः—इदमग्नये वैश्वानराय वसुरुद्रादित्येभ्यः शतक्रतवे सप्तवतेऽग्नये अद्भ्यश्च न मम ॥ संस्रवप्रक्षेपः ॥ इति पूर्णाहुतिः ॥

---

१ पारस्करगृह्यसूत्रप्रथमकाण्डद्वितीयकण्डिकाभाष्ये हरिहरः—' बर्हिर्हुत्वा प्राश्नाति ' अत्र प्राशनोपदेशसामर्थ्यात् प्राश्यमाकांक्षितम् तत्किं हुतशेषः अन्यद्वा किञ्चित् उच्यते—पाकयज्ञेष्ववत्तस्या सर्वहोमो हुत्वा शेषप्राशनमिति कात्यायनेनोक्तेः स्रुवेणावत्तस्य होमद्रव्यस्य सर्वस्य होमनिषेधात् हुतशेषस्य च प्राशनविधानात् सर्वासामाहुतीनां होमद्रव्यं स्रुवेवशेषितं संस्रवत्वेन प्रसिद्धं पात्रान्तरे प्रक्षिप्यते तत्प्राश्यमिति ॥ इत्यनेन प्रमाणेन स्रुवाहुतीनामेव संस्रवप्रक्षेपः सिद्धः । परं चाग्रे गदाधरभाष्ये तु स्रुवभिन्नहस्तादिभिर्हुतीनां सर्वासामाहुतीनां संस्रवप्रक्षेपो दरीदृश्यते तद्यथा—गदाधरः—' बर्हिर्हुत्वा प्राश्नाति ' परिस्तरणबर्हिर्हस्तेनैव हुत्वा पात्रान्तरस्थापितहोमशेषद्रव्यं भक्षयति । प्राशनस्य प्राप्तत्वात् । बर्हिर्होमोत्तरकालविधानार्थं ग्रहणम् । शेषरक्षणं भक्षणं च श्रौतसूत्रे उक्तमस्ति—पाकयज्ञेष्ववत्तस्या सर्वहोमो

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-
Kirtikant Sharma Collection, Najafgarh

वसोर्द्धारा होमः—औदुम्बरीम् ऋजवीमकोटरां बाहुमात्रममाणां निर्मलघृतपूरितां स्रुचं धृत्वा अग्नेरुपरि वसोर्द्धारां पातयेत् ॥ तस्यां च घृतधारायां स्रुक्मणालिकया अग्नौ पतन्त्यां सत्यां वक्ष्यमाणमन्त्रान्पठेत्—

हुत्वा शेषप्राशनमिति । अस्यार्थः—पाकशब्देन च स्मार्तहोमा उच्यन्ते तत्र होमार्थे यदवत्तं गृहीतं तस्य असर्वहोमः कर्तव्यः स्रुवादिभिर्यद्गृहीतं तद्धुत्वा किञ्चित्परिशेष्य पात्रान्तरे स्थापनमित्यर्थः ॥ अत्र सर्वैरपि भाष्यकारैः पात्रान्तरे संस्रवप्रक्षेप उक्तः तस्मात्प्रोक्षणीपात्रे एव संस्रवप्रक्षेपः कर्तव्यः इति न किन्तु वायव्यकोणे पात्रान्तरं संस्थाप्य तत्र संस्रवप्रक्षेपो विधेयः ॥ केचन चतुर्दशाहुतीनामेव संस्रवप्रक्षेपः कर्तव्यः इति वदन्ति तन्निर्मूलं भाति । अत्र विद्यमानानि—मुद्रितं पारस्करभाष्यपञ्चकम्, संस्कारगणपतिः, संस्कारनृसिंहः, संस्कारभास्करः, रेणुकारिका, वैद्यनाथी, स्मार्तोल्लासः, स्मार्तगङ्गाधरी, प्रयोगरत्नम्, कुशकण्डिकाभाष्यम्, संस्कारदीपकः, स्मृतिकल्पद्रुमः, इत्यादीनि प्राचीनानि निबन्धपुस्तकानि यावद्बुद्धिबलं विविच्य मया परिशोधितानि परंनोपलभ्यते चतुर्दशाहुतिष्वेव संस्रवप्रक्षेपविषये मूलवचनम् । भगवद्भिः श्रीकात्यायनाचार्यैः श्रौतकल्पे षष्ठाध्याये षष्ठ्यां कण्डिकायाम् " पाकयज्ञेष्ववत्तस्या सर्वहोमो हुत्वा शेषप्राशनम् " इति सूत्रितम् पाकयज्ञेषु, स्मार्तहोमेषु पक्षादिकर्मसु, होमार्थे अवत्तस्य गृहीतस्य, आज्यचर्वादेः सर्वस्य होमो न कर्तव्यः । प्रतिहोमं किञ्चित्परिशेषणीयम् । हुत्वा साङ्गं पाकयज्ञं समाप्य तस्य शेषस्य प्राशनं भक्षणं कर्तव्यमिति तदर्थः । एवं च नक्षत्रादि चतुर्दशाहुतिष्वेव संस्रवप्रक्षेपः कार्य इति नियमः अपि तु—पाकहोमेषु यावत्यो वाऽऽहुतयोऽपेक्ष्यन्ते सर्वासु तासु नियमेन संस्रवप्रक्षेप आवश्यक इति सूत्रकृतामाशयः परिस्फुरति । स्मार्तमार्तण्डे—" ब्रह्मणान्वारब्धश्चतुर्दशाहुतिषु संस्रवप्रक्षेपं कुर्यात् " इत्यत्र चतुर्दशाहुतिसम्बन्धः स्वानन्तरोक्तब्रह्मणान्वारब्धशब्देन कर्तव्यः सूत्रभाष्यस्मृतिषु ब्रह्मणोन्वारब्धस्य चतुर्दशाहुतिष्वेव सुस्पष्टं प्रतीयमानत्वात् । संस्रवप्रक्षेपं प्रत्याहुतिं कुर्यात् इति सङ्गतिः कर्तव्या।अन्यच्च—संस्रवप्रक्षेपणार्थं प्रोक्षणीपात्रं अन्यत्पात्रं च वायव्यां दिशि स्थापयेदिति स्मार्तमार्तण्डवचनस्यापि संगतिः सुवचा । ननु संस्रवप्रक्षेपणार्थं पात्रद्वयस्थापनम् व्यर्थमिति चेन्न " प्रोक्षणीषु त्यजेच्छेषं संस्रवन्तु सुवाहुतेः । हस्ताहुतेर्हविः शेषक्षेपमन्यत्र कल्पयेत् " इति परशुरामकारिकायाम् ॥ आज्यहोमे संस्रवप्रक्षेपः प्रोक्षणीषु आज्यातिरिक्तचर्वादिहोमे पात्रान्तरे शेषप्रक्षेप इति पात्रद्वयस्थापनमावश्यकमेव ॥ रेणुकारिकास्वपि वचनमेतादृशमेवोपलभ्यते ॥ अत्र युक्तायुक्तमीमांसा तज्ज्ञैश्चिन्त्या ॥

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding by MoE-Grant-KS-

Kirtikant Sharma Collection, Najafgarh

सप्तत इत्यारभ्य इममित्यन्तानां सप्तर्षयऋषयः घृतमित्यस्य गृत्समदऋषिः सप्तत इत्यस्य त्रिष्टुप्छन्दः शुक्रज्योतिरित्यस्य उष्णिक्छन्दः ईदृङ्ऋतश्चेत्यनयोर्गायत्रीछन्दः ऋतजिच्चेत्यस्य उष्णिक्छन्दः ईदृक्षास इत्यस्य जगतीछन्दः स्वतवाँश्चेत्यस्य स्वराड्गायत्रीछन्दः इन्द्रमित्यस्य शकरीछन्दः इमं घृतमित्यनयोस्त्रिष्टुप्छन्दः सप्तत इत्यस्य अग्निर्देवता शुक्रज्योतिरित्यारभ्य इन्द्रमित्यन्तानां सप्तानां मरुतो देवताः इमं घृतमित्यनयोरग्निर्देवता सर्वेषां वसोर्द्धारोहोमे विनियोगः ॥

ॐसुप्सतेऽअग्नेसुमिधः सुप्तजिह्वा?सुप्तऽऋषयः सुप्तधामप्रियाणि॥सुप्तहोत्राः सप्तधात्वायजन्तिसुप्तयोनीरापृणस्वघृतेनस्वाहा॥१७॥

शुक्रज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्मांश्च ॥ शुक्रश्चऽऋतुपाश्चात्यंहाः ॥ १८ ॥

ईदृङ्चान्यादृङ्च सदृङ्प्रतिसदृङ्च ॥ मितश्च सम्मितश्च सभराः ॥ १९ ॥

ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च ॥ धर्त्ता च विधर्त्ता च विधारयः ॥ २० ॥

ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्च ॥ अन्तिमित्रश्च दूरेऽमित्रश्च गणः ॥ २१ ॥

ईदृक्षासऽएतादृक्षासऽऊषुणः सुदृक्षासुऽप्रतिसदृक्षासुऽएतने ॥ मितासश्चसम्मितासो नोऽअध सभरसो मरुतो यज्ञेऽअस्मिन्॥२२॥

स्वतवाँश्च प्रधासी च सान्तपनश्च गृहमेधी च ॥ क्रीडी च शाकी चौज्जेषी ॥ २३ ॥

इन्द्रन्दैवीर्विशोमरुतोनुवत्स्वर्मानोभवत्यथेन्द्रन्दैवीर्विशोमरुतोनुवत्स्वर्मानोभवन् ॥ एवमिमंयजमानन्दैवीश्चविशोमानुषीश्चानुवत्स्वर्मानो भवन्तु ॥२४॥ इमꣳस्तनमूर्जस्वन्तंधयापाम्पीनमग्ने सरिरस्य मध्ये ॥ उत्सञ्जुषस्वमधुमन्तमर्वन्त्समुद्रियꣳसदनमाविशस्व ॥२५॥

घृतम्मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतमस्वस्य धाम ॥ अनुष्वधमावह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम् ॥ २६ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

ब्राह्मणम्–अथातो वसोर्ध्दारां जुहोति ॥ अग्नेष सुर्वोग्निः सुंस्कृतः सुऽ एषोत्र वसुभ्स्तुस्मै देवाऽ एतां धाराम्ग्राग्रहूँस्तुयैनम-
प्रीणँस्तद्युदेतुस्मैवसवऽ एतान्धाराम्ग्राग्रहूंस्तुस्मादेनांम्वसोर्द्धारेत्याचक्षते तुयैवास्माऽ अयुमेतान्धाराम्ग्राग्रहातितुयैनं प्रीणाति ॥ १ ॥
यद्वेवैतांम्वसोर्धाराञ्जुहुोति ॥ अभिषेकुऽ एवास्यैषुऽ एतद्वाऽ एनन्देवाः सुर्वं कृत्स्नुहुं सँस्कृत्याथैनमेतैः कामैरुभिषिञ्चन्नेतुया
वसोर्द्धारया तुयैवैनमयुमेतत्सुर्वं कृत्स्नुहुं संस्कृत्याथैनमेतैः कामैराभिषिञ्चत्येतुयावसोर्द्धारयाज्येनपञ्चगृहीतेनौदुम्बर्यांस्रुचातुस्योक्तो
वुन्धुः ॥२॥ वैश्वानरुहुं हुत्वा॥ शिरो वै वैश्वानरुः शीर्ष्णो वाऽ अन्नमद्यतेथोशीर्षतो वाऽ अभिषिच्युमानोभिषिच्यते मारुत्यान्हुत्वा
प्राणा वै मारुत्याः प्राणैरुवाऽ अन्नमद्यतेथोप्राणेषु वाऽअभिषिच्युमानोभिषिच्युते ॥३॥ तद्वाऽ अरण्येनूच्ये । वाग्वाऽ अरण्येनूच्यो
वाचो वाऽअन्नमद्यतेथोवाचा वाऽअभिषिच्युमानोभिषिच्यते तुदेतत्सुर्वम्वसुभ्सुर्वुहोते कामाःसैषावसुमयीधारासुथाक्षीरुस्यवासर्पिषो
वैवुमारम्भ्युयैवेयुमाज्याहुतिर्हूयतेतद्युदेषा वसुमयीधारातुस्मादेनांम्वसोर्द्धारेत्याचक्षते ॥ ४ ॥ सुऽ आहऽ इदुश्चमऽ इदुश्चमऽ इत्यनुन
च त्वा भीणाम्यनुन चानुन च त्वाभिषिञ्चाम्यनुन चेत्येतदुथोऽ इदुश्चमे देहीदुश्चमऽ इति सायुदुवैषाधारााग्निम्माप्नुयादुथैतद्युजुः
मुतिपद्येत ॥५॥ एतद्वाऽ एनन्देवाः ॥ एतेनाग्नेन प्रीत्वैतैः कामैरभिषिच्यैतुया वसोर्द्धारयाथैनमेतान्कामानयाचन्ततुभ्यऽ इष्टः प्रीतो-
भिषिक्तऽ एतान्कामान्प्रयच्छन्त्वथैवैनमयुमेतुदेतेनाग्नेन प्रीत्वैतैः कामैरभिषिच्यैतुया वसोर्द्धारयाथैनमेतान्कामान्याचते तुस्माऽ इष्टः
प्रीतोभिषिक्तऽ एतान्कामान्प्रयच्छति द्वौ द्वौ कामौ संयुनक्त्युव्यवच्छेदायसुथाव्योकसौ संयुंक्ष्युदेवुंयज्ञेनकल्पतामिति ॥ ६ ॥
एतद्वै देवाऽ अब्रुवन्।केनेमान्कामान्प्रतिग्रहीष्यामऽ इत्यात्मुनैवेयज्ञमुवन्यज्ञो वै देवानामात्मायज्ञुऽउऽ एव युजमानस्य स यदाह यज्ञेन
कल्पन्तामित्यात्मुनामेकल्पन्तामित्येवै तुदाह॥७॥द्वादशुमुसाःसँवत्सरुः सँवत्सरोग्निर्य्युवानग्निर्य्युवत्यस्य मात्रात्रा-
वतैवैनमेतदुग्नेनभीणात्यथोतावतैवैनमेतदुग्नेनाभिषिञ्चति चतुर्दशुमुसुकल्पयत्यष्टासुकल्पयति दशुमुसुकल्पयति त्रयोदशुमुसुकल्पयति ॥ ८ ॥

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding by MoE-Grant-
Kirtikant Sharma Collection, Najafgarh

अथार्धेन्द्राणि जुहोति ॥ सुर्वमेतद्यदर्धेन्द्राणि सुर्वेणैवैनमेतत्प्रीणात्यथो सुर्वेणैवैनमेतदभिषिञ्चति ॥ ९ ॥ अथ ग्रहाञ्जुहोति ॥ यज्ञो वै ग्रहायज्ञेनैवैनमेतदुक्तेन प्रिणात्यथो यज्ञेनैवैनमेतदुक्तेनाभिषिञ्चति ॥ १० ॥ अथैतान्यज्ञक्रतूञ्जुहोति ॥ अग्निश्च मे घर्मश्चमऽ इत्येतैरेवैनमेतद्यज्ञक्रतुभिः प्रीणात्यथोऽ एतैरेवैनमेतद्यज्ञक्रतुभिरभिषिञ्चति ॥ ११ ॥ अथायुजस्तोमाञ्जुहोति ॥ सु हैषु यज्ञुऽउवाच नमुताया वै बिभेमीति कुा ते नमतेत्यभित एवमापुरिस्तृणीयुरितितुस्मादेतदग्निमभितः पुरिस्तृणन्ति तृष्णाया वै बिभेमीति कुा तेतृप्तिरितिति ब्राह्मणस्यैव तृप्तिमनुतृप्येयमितितुस्मात्सुꣳ स्थिते यज्ञे ब्राह्मणन्तर्प्पयित वै ब्रुयाद्यज्ञमेवैतत्तर्प्पयति ॥ १२ ॥ यत्कुर्मणा त्यरीरिचं यद्वान्यूनमिहाकरम् ॥ अग्निष्टत्स्विष्टकृद्विद्वान्त्स्विष्टꣳसुहुतं करोतु स्वाहा ॥ १३ ॥ इदमग्नये न मम ॥ नात्र संस्रवप्रक्षेपः ॥

अग्निमेदक्षिणां कुर्यात्—ॐसु हैषु यज्ञुऽ उवाच नमुताया वै बिभेमीति कुा ते नमतेत्यभितु एवमापुरिस्तृणीयुरिति तुस्मादेतुदग्निमभितः पुरिस्तृणन्ति तृष्णाया वै बिभेमीति कुा ते तृप्तिरिति ब्राह्मणस्यैव तृप्तिमनुतृप्येयमिति तुस्मात्सुꣳ स्थिते यज्ञे ब्राह्मण-

१ अत्र केचन रुद्रकलशसमीपे 'कुशे त्यागः' इति वदन्तः संस्रवप्रक्षेपं कुर्वन्ति तन्निर्मूलम् ॥ त्यागपठनरूपा क्रिया भिन्ना तथा च संस्रवप्रक्षेपरूपा क्रिया भिन्ना ॥ न तयोर्नित्यसम्बन्धः ॥ रुद्रकल्पद्रुमशास्त्रार्थपरिच्छेदे—वसोर्द्धारां हुत्वा यजमान एव तस्मिन्नग्नौ स्रुक्प्राशनं करोति अत्र तां स्रुचमनुप्राश्यति यदत्राज्यलिप्तं नैतद्वाहिर्द्धाग्नेरसदिति श्रवणात् ॥ महार्णवेऽपि—होमान्ते प्राशयेदग्नौ स्रुचं तामाज्यलिप्तिकाम् ॥ कात्यायनसूत्रेऽपि—वसोर्द्धारां जुहोत्यौदुम्बर्यां पञ्चगृहीत संततं यजमानोऽरण्येनूप्येऽग्निप्राप्ते राजश्चम इत्यद्यानुवाकेन हुत्वा स्रुक्प्राशनमिति ॥ संस्रवो नाम पात्रसंलग्नहुतशेषः ॥ श्राद्धसूत्रे—सꣳस्रवान् समवनीय—इत्यस्य व्याख्याने कर्कादिभाष्यकारैः संस्रवनाम—पात्रसंलग्नहुतशेष इत्युक्तमस्ति ॥ श्राद्धे संस्रवस्य शेषप्रतिपत्तिः—न्यूनीकरणम् ॥ कात्यायनश्रौतसूत्रे तृतीयाध्याये दर्शपौर्णमासेष्टयाम्—सꣳस्रवान् जुहोति सꣳस्रवभागास्थ इति ॥ श्रौते संस्रवस्य शेषप्रतिपत्तिः—होमः [illegible]मार्ते तु भक्षणम् ॥ बहिर्हुत्वा प्राश्नाति ॥ २ अनेन मन्त्रेण अग्निप्रदक्षिणीकरणं काशीदीक्षितेनोक्तम् ॥

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

न्तुर्प्पयित वै ब्रूयाद्यङ्गुमेवैतुत्तर्प्पयति ॥ शतपथब्राह्मण काण्ड १ प्रपाठक ६ ब्राह्मण १ मन्त्र २८ इत्यग्निं प्रदक्षिणीकृत्य अग्नेः पश्चात् प्राङ्मुखो यजमान उपविशेत् ॥

भस्मधारणम्—ॐ त्र्यायुषञ्जमदग्नेः—ललाटे । कुश्यपस्य त्र्यायुषम्—ग्रीवायाम् । यद्देवेषु त्र्यायुषम्—बाह्वोः । तन्नोऽ अस्तु त्र्यायुषम्—हृदये ॥ ततः संस्रवप्राशनम् ॥ पवित्राभ्यां मार्जनम् ॥ अग्नौ पवित्रप्रतिपत्तिः ॥

ब्रह्मणे पूर्णपात्रदानम्—प्रणीतोदकेन सङ्कल्पः-कृतस्य ग्रहशान्त्याख्यस्य कर्मणः साङ्गतासिद्ध्यर्थं ब्रह्मन् इदं पूर्णपात्रं सदक्षिणाकं तुभ्यमहं सम्प्रददे ॥ यजमानो वदेत्-प्रतिगृह्यताम् ॥ ब्रह्मा प्रतिगृह्णाति—ॐ द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु ॥

प्रणीताविमोकः अग्नेः पश्चात्—ॐ आपः शिवाः शिवतमाः शान्ताः शान्ततमास्तास्ते कृण्वन्तु भेषजम् ॥

श्रेयोदानम्—ब्रह्मादय ऋत्विजादयश्च आचार्यद्वारा श्रेयोदानं कुर्युः ॥ उदङ्मुख आचार्यः प्राङ्मुखस्थितयजमानहस्ते श्रेयोदानं कुर्यात्—

---

१ कल्पद्रुमादिग्रन्थेषु तु वरणक्रमेण आचार्यादयः स्वं स्वं श्रेयोदानं कुर्युः इत्युक्तम् । सौकर्याय अत्र प्रयोगे आचार्यद्वारा श्रेयोदानमाहृतमस्ति ॥ इदं श्रेयःसंपादनं निर्मूलत्वाद्यजमानप्रतारणमात्रमेव ऋत्विक्कर्तृककर्मणः फलस्य यजमाननिष्ठत्वात् ॥ कोचित्तु पुत्रकृतवैतरणीदानजन्यश्रेयोदानवन्माधवस्नानादिजन्यपुण्यदानवच्चेदमपि श्रेयोदानमविरुद्धमित्याहुः । इति कल्पद्रुमकारोक्तम् ॥ खंडदीक्षितास्तु-श्रेयोदानं निर्मूलत्वाद्यजमानप्रतारणमात्रमिति केचन वदन्ति तदयुक्तं विधिवाक्यश्रवणात् ॥ तदुक्तं प्रयोगपारिजाते वामनः-आचार्यप्रभृतिभ्यश्च ग्रहार्चनफलं ततः । समिदाज्यचरूणां च तिलहोमफलं तथा ॥ तेभ्यो जपफलं तद्वद्दूर्वाणीयाजलपूर्वकम् । ततस्तेभ्यो यथाशक्ति दातव्या दक्षिणाः पृथक् । इत्युक्तत्वात् ॥ परशुराममहारुद्रपद्धतौ—यथोक्तविधिना यादृक् अस्माभिर्हवनं कृतम् । तेन यजनितं पुण्यं स पुण्येन हि पुण्यभाक् ॥ भव देवप्रसादेन तत्पुण्यं तव नो मम ॥ इत्युक्त्वा शान्तिकृद्धस्ते श्रेयः सम्प्रार्पते द्विजैः ॥

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding by MoE-IKS-Grant-

Kirtikant Sharma Collection, Najafgarh

शिवा आपः सन्तु इति यजमानहस्ते उदकं दत्वा सौमनस्यमस्तु-इति पुष्पाणि ॥ अक्षतं चारिष्टं चास्तु इति अक्षतांश्च दत्वा ततो दीर्घमायुः शान्तिः पुष्टिस्तुष्टिश्चास्तु इति पुनरुदकं दत्वा ॥ आचार्यः-हस्ते साक्षतसोदकपूगीफलं गृहीत्वा भवन्नियोगेन मया अस्मिन् ग्रहशान्त्याख्ये कर्मणि यत्कृतम् आचार्यत्वं तथा च एभिर्ब्राह्मणैः सह यत्कृतं ब्रह्मत्वं गाणपत्यं सादस्यं च यः कृतो होमस्तस्मात् आचार्यत्वात् ब्रह्मत्वात् गाणपत्यात् सादस्यात् होमात् यदुत्पन्नं श्रेयः तत्तुभ्यमहं सम्प्रददे तेन श्रेयसा त्वं श्रेयस्वान्भव ॥ प्रतिगृह्ण भवामि इति यजमानो वदेत् ॥

दक्षिणादानम् ॥ सपत्नीको यजमानः अग्नेः पश्चिमतः उपविष्टः उदङ्मुखानाचार्यादीन्वरणक्रमेण पूजापूर्विकां दक्षिणां दद्यात् ॥ हस्तेजलमादाय देशकालौ स्मृत्वा मया आचरितस्य ग्रहशान्त्याख्यस्य कर्मणः साङ्गतासिद्धये आचार्यादिदृष्टेभ्यो ब्राह्मणेभ्यः पूजनपूर्वकं दक्षिणाप्रदानं करिष्ये ॥

आचार्यपूजनम्-आचार्याय एतत्ते पाद्यं शिष्टाचारात्पादौ प्रक्षाल्य इदमर्घ्यम् इमे तुभ्यं वार्हस्पत्ये वाससी एष ते गन्धः इमानि पुष्पाणि एष ते धूपः दीपः नैवेद्यताम्बूलादीनि इति दत्वा एतावतीं दक्षिणां तुभ्यमहं सम्प्रददे ॥

आचार्याय गोप्रदानम्—कुशाक्षतकुसुमजलान्यादाय पूर्वोक्तविशेषणवति काले मया आचरितस्य ग्रहशान्त्याख्यस्य कर्मणः फलप्रतिष्ठासिद्ध्यर्थं अमुकसगोत्राय अमुकप्रवराय शुक्लयजुर्वेदाम्नायवाजिमाध्यन्दिनीयशाखाध्यायिने अमुकशर्मणे आचार्याय गोनिष्क्रयभूतमिदं हिरण्यम् अग्निदैवतं तुभ्यमहं सम्प्रददे ॥ हिरण्यासम्भवे रजतं दद्यात् ॥

ततो ब्रह्मनेतत्ते पाद्यमित्यादिना पूर्वोक्तप्रकारेण पूजापूर्वकं ब्रह्मणे दक्षिणां दद्यात् ॥ एवं सदस्याय उपद्रष्ट्रे गाणपत्याय ऋत्विग्भ्यः ग्रहजापकेभ्यश्च यथोक्तदक्षिणां दत्वा आशिषो गृह्णीयात् ॥

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

स्वर्णदानमन्त्रः—हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः ॥ अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥ इदं यथाशक्ति सुवर्णम् अग्निदैवतम् अमुकशर्मणे तुभ्यमहं सम्प्रददे ॥ प्रतिगृह्णामि ॥ ॐ देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्॥

भूमिदानमन्त्रः—सर्वभूताश्रया भूमिर्विश्वरूपेण संस्थिता। अनन्तस्यफलदात्रतः शान्तिं प्रयच्छमे॥इमां भूमिं विष्णुदैवतां वा तन्निष्क्रयीभूतयथाशक्तिरजतद्रव्यम् अमुकशर्मणे आचार्याय तुभ्यमहं सम्प्रददे॥ॐदेवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्

तिलपात्रदानम्—महर्षेर्गोत्रसम्भूताः काश्यपस्य तिलाः स्मृताः। तस्मादेषां प्रदानेन मम दोषो व्यपोहतु॥एतांस्तिलान् प्रजापतिदैवतान् आचार्यायतुभ्यमहंसम्प्रददेनमम॥ॐदेवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्याम्॥प्रजापतयेमतिगृह्णामि॥

अथाभिषेकः—आचार्यादयः सर्वे उदङ्मुखास्तिष्ठन्तः ग्रहवेदीशानस्थकलशोदकं पात्रान्तरे उद्धृत्य दूर्वापञ्चपल्लवैर्वेदयमाणैर्वैदिकैः मन्त्रैः प्राङ्मुखोपविष्टं सकुटुम्बं यजमानं तद्वामत उपविष्टां पत्नीञ्च अभिषिञ्चेयुः ॥

ॐ आपो हिष्ठा मयोभुवस्ता न ऊर्जे दधातन ॥ महेरणाय चक्षसे ॥ १५/३६ ॥

योवः शिवतमो रसस्तस्य भाजयतेह नः ॥ उशतीरिव मातरः ॥ १५/३७ ॥ तस्मा अरङ्गमाम वो यस्य क्षयाय जिन्वथ॥आपोजनयथाचनः ८/१५/३८

---

१ दानानि—स्वर्णगोभूतिलान्दद्यात्सर्वदोषापनुत्तये ॥ २ परशुरामः—अभिषेक मूर्धिन होमं माङ्गल्यं स्वस्तिवाचनम् । प्रैष्यं च मन्त्रपाठं च विप्रान् कुर्यात् सदैव हि ॥ ३ संस्कारकौस्तुभे—सर्वेषु धर्मकार्येषु पत्नी दक्षिणतः स्थिता । विप्रपादक्षालने च होमाभिषेके च वामतः ॥ विप्रपादक्षालनं तु पित्र्यकर्मणि विहितम् ॥ वामे पत्नी त्रिषु स्थाने पितृणां पादशौचने । रत्नारोहणकाले तु ऋतुकाले सदा भवेत् ॥ ४ गीतत्राद्यादिमङ्गलघोषपुरःसरोऽभिषेकः कार्यः इति कल्पद्रुमकाराः ॥ परशुरामः—पीठस्थैः कुम्भतोयैश्च पञ्चपल्लवसंयुतैः । यजमानस्य कर्तव्यं स्नपनं चाभिषेचनम् ॥ ऋत्विग्भिरिहसन्तुष्टैः प्राङ्मुखैर्वाप्युदङ्मुखैः । अमङ्गलव्ययवैर्विप्रैस्तथा शुद्धीयभूषणैः ॥ मन्त्रैर्वैरुणदैवत्यैः स्वशाखोक्तैः पुराणजैः । अन्यैरप्यभिषेकोक्तैरभिषिञ्चेत्पुनः पुनः ॥

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding by MoE-Grant-

आपोऽ अस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु ॥ विश्वꣳ हि रिप्रम्प्रवहन्ति देवीरुदिदाभ्यः शुचिरा पूतऽ एमि ॥१॥
स्तोकानामिन्दुम्पतिर्मादयाधै सुतानाम्पिबति तिरोअह्न्यम् ॥ उतप्रिया प्रियासु गौषु सोमो मधु क्षरन्ती रभसाय जन्म ॥२॥
आ यात्विन्द्रोवसुऽ उप नऽ इह स्तुत? सधुमादस्तु शूरः ॥ वावृधानस्तविषीर्य्यस्य पूर्वीर्द्यौर्न क्षत्रमभिभूति पुष्यात् ॥३॥
आ नुऽ इन्द्रो दूरादा नऽ आसादभिष्टिकृदवसे यासदुग्र? ॥ ओजिष्ठेभिर्नृपतिर्वज्रबाहुः सुप्रे सुमत्तु तुर्वणिः पृतन्यून् ॥४॥
आ नुऽ इन्दो हरिभिर्याह्यर्वाङ्गोचीनोवसु राधसे च ॥ तिष्ठाति वज्री मघवा विरुप्शीमँ व्यह्नमनु नो वाजसातौ ॥५॥
त्रातारमिन्द्रमवितारमिन्द्रꣳ हवे हवे सुहवꣳ शूरमिन्द्रम् ॥ ह्वयामि शक्रम्पुरुहूतमिन्द्रꣳ स्वस्ति नो मघवा धात्विन्द्रः ॥६॥
हुमर्म्मे वरुण श्रुधी हवमुरुष्या च मृडय ॥ त्वामवस्युरा चके ॥७॥
तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ॥ अहेडमानो वरुणेह बोधयुरुशꣳस मा नऽआयुः प्रमोषीः ॥८॥
त्वन्नोऽ अग्ने वरुणस्य विद्वान्देवस्य हेडोऽअवयासिसीष्ठाः ॥ यजिष्ठो वह्नितमः शोशुचानो विश्वाद्वेषाꣳसि प्रमुमुग्ध्यस्मत् ॥९॥
स त्वन्नोऽ अग्नेऽवमो भवोती नेदिष्ठोऽअस्याऽउषसो व्युष्टौ ॥ अवयक्ष्व नो वरुणꣳ रराणो वीहि मृळीकꣳ सुहवो नऽएधि ॥१०॥
उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमꣳ श्रथाय ॥ अथा वयमादित्य व्रते तवानागसोऽ अदितये स्याम ॥११॥
वरुणस्योत्तम्भनमसि वरुणस्यस्कम्भसर्ज्जनीस्थोवरुणस्यऽऋतुसदनमसि वरुणस्य ऋतुसदनमासीद ॥१२॥
प्रातरग्निम्प्रातरिन्द्रꣳ हवामहे प्रातर्मित्रावरुणा प्रातरश्विना ॥ प्रातर्भगम्पूषणम्ब्रह्मणस्पतिम्प्रातः सोममुत रुद्रꣳ हुवेम ॥१३॥
भग प्रणेतर्भग सत्यराधो भगेमान्धियमुदवा ददन्नः ॥ भग प्र नो जनय गोभिरश्वैर्भग प्र नृभिर्नृवन्तः स्याम ॥१४॥
इदमापः प्रवहताव यच्च मलं च यत् ॥ यच्चाभिदुद्रोहानृतं यच्च शेपेऽ अभीरुणम् ॥ आपो मा तस्मादेनसः पवमानश्च मुञ्चतु ॥१५॥

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

सुमुद्राय स्वा वातायु स्वाहा सरिराय स्वा वातायु स्वाहा ॥ अनाधृष्यायं स्वा वातायु स्वाहा प्रतिधृष्यायं स्वा वातायु स्वाहा ॥
अवस्यवे स्वा वातायु स्वाहा शिमिदायं स्वा वातायु स्वाहा ॥ ६/८ ॥ पुनन्तु मा पितर÷सोम्यासः÷ पुनन्तु मा पितामुहाः पुनन्तु
प्रपितामहाः ॥ पवित्रेण शुतायुषा॥पुनन्तु मा पितामुहा÷ पुनन्तु प्रपितामहाः॥ पवित्रेण शुतायुषा विश्वमायुर्व्यश्नवै ॥३/१॥
अग्नऽ आयूꣳषि पवस आ सुवोर्ज्जमिषꣳ च नः । आरे बाधस्व दुच्छुनाम् ॥ ४/१ ॥
पुनन्तु मा देवजुनाः पुनन्तु मनसा धियः÷ ॥ पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ॥ ३/२ ॥
पवित्रेण पुनीहि मा शुक्रेण देव दीद्यत्॥अग्ने क्रत्वा क्रतूꣳ रनु॥४/२॥यत्ते पवित्रमर्चिष्यग्ने वितततमन्तरा॥ब्रह्म तेन पुनातु मा॥५/२॥
पवमानः सोऽअद्यनः÷पवित्रेण विचर्षणिः।यः पोतासः पुनातुमा॥६/२॥उभाभ्यान्देव सवितः पवित्रेण सुवेन चा॥माम्पुनीहि विश्वतः÷७/२॥
वैश्वदेवी पुनती देव्यागाद्यस्यामिमा बह्वस्तन्वो वीतपृष्ठाः ॥ तया मदन्तः सधमादेषु वयꣳ स्याम पतयो रयीणाम् ॥ ८/२ ॥
आप्यायस्व समेतु ते विश्वतः÷सोम वृष्ण्यम् ॥ भवा वाजस्य सङ्गथे ॥९/२॥
पञ्च नद्यः÷ सरस्वतीमपि यन्ति सस्रोतसः ॥ सरस्वती तु पञ्चधा सो देशेभवत्सुरित् ॥ १/३ ॥ त्रिष्पतिर्म्मा पुनातु वातपतिर्म्मा
पुनातु देवोमाःसविता पुनात्वच्छिद्रेणपवित्रेणसूर्य्यस्यरश्मिभिः÷॥ तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ॥ २/३ ॥
शिरो मे श्रीर्य्यशो मुखन्तिपिः केशाश्च श्मश्रूणि ॥ राजा मे प्राणोऽअमृतः सम्राडक्षुर्विराट्श्रोत्रम् ॥ ५/३ ॥
जिह्वा मे भद्रं वाङ्महो मनो मन्युः स्वराड्घ्राणम÷॥ मोदाः प्रमोदाऽअङ्गुलीरङ्गानि सिन्धवः सर्हः÷ ॥ ६/३ ॥
बाहू मे बलमिन्द्रियꣳ हस्तौ मे कर्म्म वीर्य्यम्॥ आत्मा क्षत्रमुरो मम ॥ ७/३ ॥
पृष्टीर्मे राष्ट्रमुदरꣳ सौ श्रोणी ॥ ऊरूऽअरत्नी जानुती विशो मेऽङ्गानि सर्वतः÷ ॥ ८/३ ॥

CC-0. Indic Public Domain. Digitization by eGangotri/Sarayu Trust. Funding by MoE-Grant-

Kirtikant Sharma Collection, Najafgarh

नाभिर्म्मेऽक्षित्तंविज्ञानंम्प्रायुर्म्मेपचितिर्म्भसत् ॥ आनन्दुनन्दावुण्डौमेषगुः सौभाग्युम्पसं÷ ॥ जङ्घाभ्याम्प्रद्रयान्धर्म्मोस्मिद्विशिराजा
प्रतिष्ठितः॥ ३/२० ॥ पर्य÷ पृथिव्याम्पयु ओषधीषु पयो दिव्यन्तरिक्षे पयो धाः ॥ पयस्वतीः प्रदिशः÷ सन्तु मह्यम् ॥ ३३/१८ ॥
देवस्यत्त्वासवितुः प्रसुवेश्विनोर्ब्बाहुभ्याम्पूष्णोहस्ताभ्याम् ॥ सरस्वत्यै वाचो यन्तुर्य्यन्त्रियै दधामि बृहस्पतेष्ट्वासाम्राज्येनाभि-
षिञ्चाम्यसौ ॥ ३०/२ ॥
देवस्य त्वा सवितुः प्रसुवे श्विनोर्ब्बाहुभ्याम्पूष्णो हस्ताभ्याम् ॥ सरस्वत्यै वाचो यन्तुर्य्यन्त्रेणाग्नेः साम्राज्येनाभिषिञ्चामि ॥३०/१८॥
देवस्य त्वा सवितुः प्रसुवेश्विनोर्ब्बाहुभ्याम्पूष्णो हस्ताभ्याम् ॥ अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्च्चसायाभिषिञ्चामि सरस्वत्यै
भैषज्येन वीर्य्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेण बलायश्रियै यशसेभिषिञ्चामि ॥ ३/२० ॥
सोमस्य त्वा द्युम्नेनाभिषिञ्चाम्यग्नेर्भ्राजसा सूर्य्यस्य वर्च्चसेन्द्रस्येन्द्रियेण ॥ क्षत्राणाङ्क्षत्रपतिरेद्धातिं दिद्युष्पाहि ॥ ५/१० ॥
विश्वानि देव सवितर्दुरितानि परा सुव ॥ यद्भद्रन्तन्नऽ आ सुव ॥ ३/३० ॥
आमुच्छदुग्मिरिन्द्रो ब्रह्मा देवो बृहस्पतिः÷ ॥ सचैतसो विश्वेदेवा युज्ञम्पावन्तु नः शुभे ॥ ५५/१८ ॥
स्वँर्व्यद्धि द्युशुषो नृँ?पाहि शृणुधी गिरः÷ ॥ रक्षा तोकमुत त्मनाः ॥ ३३/१८ ॥
अन्नंपतेन्नस्य नो देह्यनमीवस्य शुष्मिणः÷ ॥ प्रप्रदातारन्तारिषऽ ऊर्ज्जन्नो धेहि द्विपदे चतुष्पदे ॥ ६३/११ ॥
पालाशं भवति। तेन ब्राह्मणोभिषिञ्चति ब्रह्म वै पलाशो ब्रह्मणैवैनमे तदभिषिञ्चति ॥ औदुम्बरं भवति । तेन स्वोभिषिञ्चत्यन्नं वाऽ
ऊर्ग्वैदुम्बरऽ ऊर्गेवैस्वं यावद्वैपुरुषस्यस्वंभवति तावतावदशनायातितेनोर्क्स्वं तस्मादौदुम्बरेण स्वो भिषिञ्चति॥ नैयग्रोधपादम्भवति। तेन-
शिष्योराजन्यो भिषिञ्चति पद्भिर्वैन्यग्रोधऽ ऊर्ध्वतिष्ठतो मित्रेणवैराजन्यः प्रतिष्ठितस्तस्मान्नैयग्रोधपादेनशिष्योराजन्योभिषिञ्चति ॥

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

आश्वत्थं भवति। तेन वैश्योऽभिषिञ्चति सयुदेवादोश्वत्थे तिष्ठतऽ इन्द्रोमरुतऽ उपामंत्रयत तुस्मादाश्वत्थेन वैश्यो भिषिञ्चति ॥ सर्वमुरुभ्युन्मुर्दनम्भवति परमोवाऽ एषगन्धोयत्सर्वमुरुभ्युन्मुर्दनं गन्धे नैवैनमे तुदभिषिञ्चति ॥

सुदेव कुल्पाऽजुहोति। प्राणा वै कुल्पाऽ अमृतमुवै प्राणाऽअमृतेनैवैनमे तुदभिषिञ्चति ॥ अथसामगायतिक्षत्रं वैसामक्षत्रेणैवैनमेतुदभिषिञ्चत्यथोसाम्राज्यं वै सामसाम्राज्येनैवैनःसाम्राज्यंगमयति सुर्वेषांवाऽ एषवेदानाःरुसोयत्सामसुर्वेषामेवै तद्वेदानाःरुसेनाभिषिञ्चति ॥ ॐशान्तिःशान्तिः सुशान्तिर्भवतु॥हस्ते जलं गृहीत्वा अभिषेककर्तृभ्यो ब्राह्मणेभ्यो यथोत्साहदक्षिणां दास्ये तेन श्रीकर्माधीशः प्रीयताम्।

अभिषिक्तः सपत्नीको यजमानः सर्वौषधिभिरुद्वर्तिताङ्गः गङ्गादिशुद्धोदकेन स्नात्वा उभाभ्यामभिषिक्ताभ्यां त्यक्तानि स्नानवस्त्राण्याचार्याय दत्वा शुक्लमाल्याम्बरधरो घृतमङ्गलतिलकः स्वासने उपविशेत् ॥

घृतपात्रदानम्—घृतपूरितकांस्यपात्रे मुखावलोकनं कुर्यात्–ॐरूपेण वो रूपमभ्यागान्तुथो वो विश्वंवेदा विभजतु॥ऋतस्य पुथाप्रेत चन्द्रदक्षिणा वि स्व६ पश्युष्टयुन्तरिक्षं ख्यतंस्त्र सुदस्यै ६॥ ॥ ब्राह्मणम्–रूपंहु रूपम्प्रतिरूपोबभूवतुदस्यरूपुम्प्रति चक्षणाय ॥ हुद्रो मायाभिः पुरुरूपऽ ईयते युक्ता ह्यस्य हुरुयः शतादशेत्यर्यं वै हुरयो यम्वै दुशच सहुस्राणि वहुनिचानन्तानि चतदेतद्ब्रह्मापूर्वमनुपरमनंतरमबाह्यमयु मात्मा ब्रह्म सर्वानु भूरित्यनुशासनम् ॥ इदम् आज्यपात्रं सदक्षिणाकम् आचार्याय तुभ्यमहं सम्प्रददे ॥

ब्राह्मणभोजनसङ्कल्पः—कृतस्य कर्मणः साङ्गतासिद्ध्यर्थं यथाशक्ति ब्राह्मणान् भोजयिष्ये तेन श्रीकर्माङ्गदेवताः प्रीयन्ताम्॥

भूयसीदक्षिणाप्रदानम्—हस्ते जलमादाय नानावेदान्तर्गतनानाशाखाध्यायिभ्यो नानागोत्रेभ्यो नानाशर्मभ्यो ब्राह्मणेभ्यो दीनानाथेभ्यश्च यथाशक्ति भूयसीं दक्षिणां दातुमुत्सृजे ॥ ॐतत्सदिति वदन् भूयसीं दक्षिणां दत्वा तेषां आशिषो गृह्णीयात् ॥

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding by MoE-Grant-

देवताविसर्जनम्–पुष्पाक्षतप्रक्षेपेण स्थापितदेवान्विसर्जयेत्–ॐ उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे॥उप प्रयन्तु मरुतः सुदानवः इन्द्रं प्राशूर्भवा सचा ॥ ३/५३॥ यान्तु देवगणाः सर्वे स्वशक्त्या पूजिता मया ॥ इष्टकामप्रसिद्ध्यर्थं पुनरागमनाय च ॥

पीठादिदानम्–गणेशमातृकाग्रहपीठानि अवशिष्टपूजोपस्कराणि च आचार्याय दद्यात्–हस्ते जलं गृहीत्वा इमानि गणेशमातृकाग्रहपीठानि समूर्तिकानि सकलशानि सवस्त्राणि अवशिष्टपूजोपस्कराणि च आचार्याय तुभ्यमहं सम्प्रददे ॥

अग्निविसर्जनम्–अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् ॥ युयोध्यस्मज्जुहुराणमेनो भूयिष्ठान्ते नमऽउक्तिं विधेम ॥ ३/६/२॥ अग्नये नमः सकलोपचारार्थे गन्धाक्षतपुष्पाणि समर्पयामि ॥ ॐ वयः हि त्वा प्रयति यज्ञे अस्मिन्नग्ने होतारमवृणीमहीह ॥ ऋधगयाऽ ऋधगुताशमिष्ठाꣳ प्रजानन्यज्ञमुपयाहि विद्वान्त्स्वाहा ॥ ३/५॥ ॐ अनु वीरैरनु पुष्यास्मꣳ गोभिरनश्वैरनु सर्वेण पुष्टैः ॥ अनु द्विपदानु चतुष्पदा वयन्देवा नो यज्ञमृतुथा नयन्तु ॥ ३/६/१॥ ॐ यज्ञं यज्ञङ्गच्छ यज्ञपतिङ्गच्छ स्वाँ योनिङ्गच्छ स्वाहा ॥ एष ते यज्ञो यज्ञपते सहसूक्तवाकꣳ सर्ववीरस्तꣳ शुष्मस्तु स्वाहा ॥ ३/२॥ गच्छ त्वं भगवन्नग्ने स्वस्थाने विश्वतामुख॥ हव्यमादाय देवेभ्यः शीघ्रं देहि प्रसीद मे ॥ गच्छ गच्छ सुरश्रेष्ठ स्वस्थाने परमेश्वर । यत्र ब्रह्मादयो देवास्तत्र गच्छ हुताशन ॥

सम्पूर्णतावाचनम्–अञ्जलिं बद्धा–मया यत्कृतं ग्रहशान्त्याख्यं कर्म तत् कालहीनं भक्तिहीनं शक्तिहीनं श्रद्धाहीनं च भवतां ब्राह्मणानां वचनात् सर्वं सम्पूर्णमच्छिद्रं चास्तु ॥ विप्रा वदेयुः–अस्तु परिपूर्णम् ॥

॥ अथ प्रैषोत्तरकपुण्याहवाचनम् ॥

---

१ कर्मान्ते पुण्याहवाचननिर्णयः पुण्याहवाचनसूत्रम्—पुण्याहवाचनमृद्धिपूर्वंवृद्धिर्विवाहान्तापत्यसंस्कारः प्रतिष्ठोद्यापनादि पूर्वे तत्कर्मणश्चान्तयोः कुर्यात् तथा च शौनकः—स्वस्तिवाचनमेवं तु सर्वेषामृद्धिकारकम् । आदावन्ते च कर्तव्यमिति यशविदां मतम् ॥ अपरे तु–पुण्याहवाचनं शस्तमादौ स्यात् सर्वकर्मसु । कृत्वैव तद् बुधः कुर्यात् सर्वकर्माणि मानवः ॥ इत्याद्याश्वलायनवचनादादावेव कार्यमित्याहुः ॥ अत्र कुलदेशाचारतो व्यवस्था ॥

ग्रन्थकर्तृप्रशस्तिः—क्षेत्रं हि भारतेऽस्मिन्महत्सुपुण्यं चकास्ति सिद्धपुरम्। कपिलाश्रमविख्यातं यत्र प्राची सरस्वती वहति ॥ मुक्ता च देवहूतिर्यस्मिन्स्नानं सुवर्णदानं च । श्राद्धं मातृगयाख्यं भवत्यगणितं कृतं सर्वम्॥यस्मिन्नुत्तरखण्डान्मन्त्रद्रष्टो मूलराजभूपतिना । आहूता हि सहस्राधिकषोडशवाडवाः सुविख्याताः॥ तेष्वेकविंशतिभ्यो विप्रेभ्योऽदायि सिद्धपुरमेतत्। सर्वोपस्करयुक्तं तथैकविंशतिपदानि दत्तानि॥दत्तं प्रथमं पदकं द्विवेदिने भार्गवाय पुत्राय। द्वितीयीकं तु दत्तं द्विवेदिने

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2
Kirtikant Sharma Collection, Najafgarh

स्वपुरतः पञ्चवर्णः अष्टदल कृत्वा तत्र भूमं स्पृष्ट्वा–ॐ मुहा ह्वा? पृथुवीं चं नऽ इर्वं व्युन्नम्मिमिक्षताम्॥पिपृतान्नो भरीमभिः॥ ३३/१२॥

यवप्रक्षेपः–ॐ ओषधयः सं वदन्तु सोमेन सह राज्ञा ॥ यस्मै कृणोति ब्राह्मणस्तꣳ राजन्पारयामसि ॥ १८/१२ ॥

तदुपरिकलशस्थापनम्–ॐ आजिग्र कलशम्मह्या त्वा विशन्त्विन्दवः ॥ पुनरूर्ज्जा निवर्त्तस्व सा नः÷ सहस्रन्धुक्ष्वोरुधारा पयस्वती पुनर्म्मा विशताद्रयिं? ॥ २२/२ ॥

जलपूरणम्–ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्ज्जनी स्थो वरुणस्यऽ ऋतसदनमसि वरुणस्यऽ ऋतसदनमसि वरुणस्यऽ ऋतसदनमासीद ॥३६/१॥

गन्धप्रक्षेपः–ॐ त्वाङ्गन्धर्वाऽ अखनँस्त्वामिन्द्रस्त्वाम्बृहस्पतिः÷ ॥ त्वामोषधे सोमो राजा विद्वान्यक्ष्मादमुच्यत ॥१९/१॥

धान्यप्रक्षेपः–ॐ धान्यमसि धिनुहि देवान्प्राणाय त्वोदानाय त्वा व्यानाय त्वा ॥ दीर्घामनु प्रसितिमायुषे धान्देवो वः÷ सविता हिरण्यपाणिः प्रतिगृभ्णात्वच्छिद्रेण पाणिना चक्षुषे त्वा महीनाम्पयसि ॥२०/१॥

सर्वौषधीप्रक्षेपः–याऽ ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगम्पुरा ॥ मनै नु बभ्रूणामहꣳ शतन्धामानि सप्त चं ॥७५/१३॥

दूर्वाप्रक्षेपः–ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि ॥ एवा नो दूर्वे प्रतनु सहस्रेण शतेन च ॥ २९/१३ ॥

पञ्चपल्लवप्रक्षेपः–ॐ अश्वत्थे वो निषदनम्पर्णे वो वसतिष्कृता ॥ गोभाजऽ इत्किलासथ यत्सनवथ पूरुषम् ॥७५/१३॥

सप्तमृद्प्रक्षेपः–ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी ॥ यच्छा नः शर्म्म सुप्रथाः ॥ १३/३६ ॥

फलप्रक्षेपः–ॐ या? फलिनीर्य्याऽ अफलाऽ अपुष्पा याश्च पुष्पिणीः ॥ बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वꣳहसः ॥२९/१२॥

पञ्चरत्नप्रक्षेपः–ॐ परि वाजपतिः कविरग्निर्हव्यान्यक्रमीत् ॥ दधद्रत्नानि दाशुषे ॥ २५/१९ ॥

भार्गवाय पित्रे च ॥ दत्तं पदं तृतीयं कौशिकगोत्राय पण्डितायाथ । दत्तं पदं चतुर्थं त्रिवेदिने दाक्षभाय गोत्राय ॥ पञ्चमपदकं गौतमगोत्रायाथ द्विवेदिने दत्तम् । दत्तं षष्ठं पदकं वत्सगोत्राय ठक्कुरायाथ॥सप्तमपदकं दत्तं द्विवेदिपाराशराय मन्त्रदृशे। अष्टमपदकं दत्तं चोपाध्यायाय काश्यपायाथ॥ दत्तं नवमं पदकं भारद्वाज-द्विवेदिने सुमहत् । दशमं पदकं दत्तं शाण्डिल्याय द्विवेदिने चाथ ॥ एकादशं च पदकं शौनकगोत्राय पण्डितायाथ । दत्तं द्वादशपदकं त्रिवेदिने वै वासिष्ठगोत्राय ॥

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2
Kirtikant Sharma Collection, Najafgarh

हिरण्यप्रक्षेपः–ॐ हिरुण्यगुर्भ्म? समवर्त्तताग्रे भूतस्य जात? पतिरेकऽ आसीत्। स दाधार पृथिवीन्द्यामुतेमाङ्कस्म्मै देवाय हुविषा विधेम ॥ ४/१३ ॥

रक्तसूत्रवेष्टनम्–ॐ सुजातो ज्योतिषा सुह शर्म्म वरूथमासदत्स्व ÷।।वासोऽ अग्ने विश्वरूपुꣳ संव्ययस्व विभावसो ॥४/१४॥

पूर्णपात्रम्–ॐ पूर्णा दर्व्वि परा पत सुपूर्णा पुनरापत ॥ वस्नेव विक्रीणावहाऽ इषुमूर्ज्जꣳ शतक्रतो ॥४/१५॥

वरुणावाहनम्–ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हुविर्भि÷।। अहेडमानो वरुणेह बोधुरुशꣳ स मा नऽ आयुः प्रमोषीः ॥४/१६ ॥ अस्मिन् कलशे वरुणं साङ्गं सपरिवारं सायुधं सशक्तिकम् आवाहयामि स्थापयामि ॥

प्रतिष्ठापनम्–ॐ मनो जूतिर्ज्जुषतामाज्यस्य बृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टँय्यज्ञꣳ समिमन्दधातु ॥ विश्वेदेवासऽ इह मादयन्तामोꣳप्रतिष्ठ ॥४/१७॥ ॐ वरुणाय नमः चन्दनं समर्पयामि । इत्यादिपञ्चोपचारैः सम्पूज्य तत्त्वायामीति पुष्पाञ्जलिं समर्प्य अनेन पूजनेन वरुणः प्रीयताम् ॥ अनामिकया कलशं स्पृष्ट्वा अभिमन्त्रयेत्–कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः । मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥ कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुधरा । ऋग्वेदोऽथ यजुर्वेदः सामवेदोह्यथर्वणः ॥ अङ्गैश्च सहिताः सर्वे कलशाम्बुसमाश्रिताः । अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा॥ आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः। गायत्र्यादिभ्यो नमः इत्यनेन पञ्चोपचारैरभ्यर्च्य कलशं प्रार्थयेत्–देवदानवसंवादे मथ्यमाने महोदधौ । उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम् ॥ त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः । त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥ शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः । आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः ॥ त्वयि तिष्ठन्ति भूतानि यतः काम-फलप्रदाः । त्वत्प्रसादादिमां पूजां कर्तुमीहे जलोद्भव॥ सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा॥ नमो नमस्ते स्फटिकप्रभाय सुश्वेत-

---

मुख्यं त्रयोदशपदं मौनसगोत्राय ठक्कुरायाथ। तद्वच्चतुर्दशपदं याज्ञिकविप्राय गर्गगोत्राय॥पञ्चदशं वै कुच्छसगोत्राय द्विवेदिने पदकमाऽडहालकगोत्रायाथ षोडशपदकं द्विवेदिने दत्तम्॥कृष्णात्रिगोत्रिणे वै द्विवेदिने तत्र सप्तदशपदकम्। अष्टादशं पदं वै कौण्डिन्याय द्विवेदिने दत्तम्॥ एकोनविंशतितमं पाण्डतमाण्डव्यगोत्रिणे दत्तम्। विंशतितमं पदं यज्ञोपाध्यायौपमन्यवायाथ ॥ राज्ञा प्रसन्नमनसा विप्रवराय द्विवेदिने चाथ । श्वेतात्रिगोत्रिणे वै तथैकविंशतितमं पदं दत्तम् ॥ तेषां मुख्यतमे श्रीठक्कुरसंज्ञे त्रयोदशे पदके । शुक्ले यजुषि श्रेष्ठे माध्यन्दिन्यां वाजसनेय्यां च॥ धाराम्बा कुलदेवी यस्य गणेशो महोदराख्यश्च । वीरेश्वरश्च यक्षो महाकालभैरवः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हाराय सुमङ्गलाय । सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते॥ पाशपाणे नमस्तुभ्यं पद्मिनीजीवनायक । पुण्याहवाचनं यावत्तावत्त्वं सन्निधो भव ॥ ततो यजमानः युग्मविप्रान् गन्धमाल्यवस्त्रदक्षिणादिभिः सम्पूज्य तान् उदङ्मुखानुपवेश्य पूजितकलशं कराभ्यामालभ्य–मम गृहे ॐ पुण्याहं भवन्तो ब्रुवन्तु ॥ विप्राः ॐ पुण्याहम्॥ ॐ पुण्याहं भवन्तो ब्रुवन्तु ॥ विप्राः ॐ पुण्याहम् ॥ ॐ पुण्याहं भवन्तो ब्रुवन्तु ॥ विप्राः ॐ पुण्याहम् ॥ ममं गृहे स्वस्ति भवन्तो ब्रुवन्तु॥ विप्राः ॐ स्वस्ति॥ मम गृहे स्वस्ति भवन्तो ब्रुवन्तु॥ ॐ स्वस्ति॥ मम गृहे स्वस्ति भवन्तो ब्रुवन्तु ॥ ॐ स्वस्ति॥ मम गृहे ॐ ऋद्धिं भवन्तो ब्रुवन्तु॥ विप्राः ॐ ऋद्ध्यताम्॥ मम गृहे ॐ ऋद्धिं भवन्तो ब्रुवन्तु॥ॐ ऋद्ध्यताम्॥मम गृहे ऋद्धिं भवन्तो ब्रुवन्तु॥ॐ ऋद्ध्यताम्॥ इति पुण्याहं वाचयित्वा मन्त्राशिषो गृहीत्वा–प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु यत्। स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः॥ यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्॥ॐ विष्णवे नमः॥ॐ विष्णवे नमः॥ॐ विष्णवे नमः॥ततो ब्राह्मणान् भोजयित्वा दीनानाथांश्चान्नादिना सन्तोष्य स्वयं सुहृन्मित्रादियुतः सोत्साहः सन्तुष्टो हविष्यं भुञ्जीत इति वैदिकग्रहशान्तिप्रयोगः ॥

---

१ संक्षिप्तपुण्याहवाचने तु कल्याणं श्रीश्चेति द्वयोर्वाचनं नोक्तं तदाह रूपनारायणीये मदनरत्ने च बौधायनः–पुण्याहं स्वस्ति ऋद्धिरित्योंकारपूर्वकं त्रिस्त्रिरेकैकामाशिषो वाचयेत् ॥ एकैकमिति पुण्याहादिभिः संबद्धयते । एकैकमित्यस्यान्तरमाशिष्यमिति शेषः । तथा च पुण्याहादिरूपामेकैकामाशिषं त्रिस्त्रिर्वाचयेदित्येवमाशिषो वाचयेदिति वाक्यार्थः ॥ २ यजमानेनान्वारब्ध आचार्यो यदि पुण्याहं वाचयेत्तदा ममास्य यजमानस्य गृहे इति वाच्यम् ॥ ३ ॐकारपूर्वकं तु ब्राह्मणजातीययजमानमात्रविषयं तत्राह यमः पुण्याहवाचनं दैवे ब्राह्मणस्य विधीयते । एतदेव निरोंकारं कुर्यात्क्षत्रियवैश्ययोः ॥ सॉंकारं ब्राह्मणे कुर्यान्निरोंकारं महीपतौ । उपाशु च तथा वैश्ये स्वस्ति शूद्रे प्रकीर्तयेत् ॥

शर्मं विष्णुः ॥ ताण्ड्यौनसगोत्रे मौनसवैतानहव्यसावेति । प्रवरत्र संयुक्ते गणको गोविन्दरामशर्माऽभूत् ॥ गणितादिस्कन्धज्योतिःशास्त्रज्ञ एव यः प्रथितः । भाईशङ्करनामा तस्य सुतः शास्त्रवित्सुजनसेव्यः॥तत्तनय उमाशङ्कर आस्तिक्यप्रभृतिविप्रगुणयुक्तः । ज्ञानादियुतो ज्योतिषवैद्यकसद्धर्मशास्त्रनिष्णातः। । दुर्गाशङ्करशास्त्री तस्य सुतोऽहं स्वयं सुविख्यातः । श्रीब्रह्मचारिपदभृद् यस्य गुरुर्देवचेतनानन्दः ॥ श्रीबालुकेशसंस्कृतपाठगृहाध्यापकप्रधानेन । सिद्धपुरे संवसता ग्रन्थः संयोजितो मया चायम् ॥ ग्रहशान्त्याख्यो भूयादुपयुक्तः कर्मकाण्डिविप्रेभ्यः । इत्येवमर्थयेऽहं दुर्गाशङ्करसुतोर्विसुं नित्यम् ॥

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

Kirtikant Sharma Collection, Najafgarh

ग्रहशान्तिसाहित्यनी यादी.

श्रीफल ६, सुकुं श्रीफल १	अगरबत्ती तोला ५	प्रत्येक नवटांक	चहुला तोलो ०॥	वज तोलो०। चंपो तोलो०।	नीलम, प्रवाल, मोती,
सोपारी शेर १।	धूप छूटो तोला ५	कोपरूं तथा किसमिस	सरशव नवटांक	नागरमोथ तोलो ०।	मुख्यकलशाराधन,
नाडाछडी आंटी २	कर्पूरगोटी वंडल २	प्रत्येक शेर ०।	सुगंधीवालो नवटांक	ए दश वस्तु कुटीने राखवी	पुण्याहवाचन तथा ग्रहना
कुंकु नवटांक	सुखडनां छोडां नवटांक	जरदालु सेर ०।	सर्वौषधी माटे-कुष्ट ताला०।	सात जातनी माटीनी विगत	ऐशानमांवरुणपूजनमाटेमलो
गुलाल शेर ०।	चन्दनमाटे सुखडनो कडको	अंजीर सेर ०।, काजु सेर०।	जटांमांसी तोला ०।	घोडालनी, हस्तिस्थाननी,	त्रांबाना कलश त्रण तथा
सफेत अबीर सेर ०।	चन्दन घसवामाट ओरसियो	एलची तोलो १	हरदल तोलो ०।	राफडानी, संगमनी,	त्रांबानी तरभाणी त्रण
रांगुली शेर १	केसरतोलो ०।, मधतोला २	लविंग तोलो १	दारुहरदल तोलो ०।	ध्रोनी, राज्यस्थाननी,	त्रांबानुं अर्घपात्र १
कालो अबीर नवटांक	खडीसाकरसेर०।,खांडसेर०।	तल पाली १, जव सेर ०	मोरवेल तोलो ०।	गौशालानी,	आज्यस्थालो, चरुस्थाली
सिन्दुर नवटांक	गोलसेर ०।, खारेक सेर ०।	गुगल नवटांक	शिलाजीत तोलो ०।	पद्मरत्ननां पडीकां वे, ते	अने पूर्णपात्रमाटे
दळेली हरदल सेर ०॥	बदामगोला तथा पस्ता-	कपुरकाचली तोलो १	चन्दन तोलो ०।	प्रत्येकमां-- सुवर्ण, हीरो,	त्रांबाना त्रोप एक शेर
					चोख चढे तेवा त्रण

१ दशाङ्गधूपः मदनरले-पड्भागकुष्ठं द्विगुणो गुडश्च लाक्षात्रयं पञ्च नखस्य भागाः। हरीतकी सर्जरसं समांशं दर्पैकभागं त्रिलवं शिलाजम्॥ घनस्य चत्वारि पुरस्य चैको धूपो दशाङ्गः कथितो मुनीन्द्रैः॥ दर्पः-कस्तूरी॥ कुंकुमं-केशरम्॥ लाक्षा-लाख॥ नखं-नखला॥ सर्जरसः-राळ॥ घनः-नागरमोथ॥ पुरः-गुग्गुल इति प्रसिद्धः॥ २ कुष्ठं मांसी हरिद्रे द्वे मुरा शैलेयचन्दने। वचाचम्पकमुस्ते च सर्वौषध्यो दश स्मृताः॥ ३ अश्वस्थानाद्वृक्षस्थानाद्वल्मीकात् सङ्गमाद्वृक्षात्। राजद्वाराच्च गोष्ठाच्च मृदमानीय निक्षिपेत्। ४ कनकं कुलिशं नीलं पद्मरागं च मौक्तिकम्। एतानि पञ्चरत्नानि रत्नशास्त्रविदो विदुः॥ ५ आज्यस्थाली रेणुः-आज्यस्थाली प्रकर्तव्या तैजसद्रव्यसम्भवा। महीमयी वा कर्तव्या सर्वास्वाज्याहुतीषु च॥आज्यस्थाल्याः प्रमाणं च यथाकामं तु कारयेत्। तैजसं सुवर्णादि॥ ६ चरुस्थाली रेणुः-मृण्मय्यौदुम्बरी वापि चरुस्थाली प्रशस्यते। तिर्यगूर्ध्वं समिन्मात्रा दृढा नातिबृहन्मुखी॥ कुलालचक्रघटितमाप्तुरं मृण्मयं स्मृतम्। तदेवहस्तघटितं स्थाल्यादि खलु दैविकम्॥ औदुम्बरी ताम्रमयीत्यर्थः॥ ७ पूर्णपात्रलक्षणं रेणुः-यावतान्नेन भोक्तुस्तु तृप्तिः पूर्णैव जायते। तावता धर्मतः कुर्यात् पूर्णपात्रमिति स्थितिः॥ अन्यच्च-यवैर्वा व्रीहिभि. पूर्णं शूर्पं तत् पूर्णपात्रकम्॥ तथा च-अष्टमुष्टिर्भवेत् किंचित् किंचदधो तु पुष्कलम्। पुष्कलानि च चत्वारि पूर्णपात्रं विदुर्बुधाः॥ शूर्पप्रमाणम्-शूर्पं त्वरलिमात्रं स्यादर्पाकं वैणवं तु वा। लम्बं त्वरलिमात्रं स्यादिति यज्ञविदे विदुः॥

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कांसानी थाली एक
कांसानी वाटकी बे
त्रांबानी मोटी तरमाणी १
त्रांबानो मोटो वाटको एक
त्रांबानी आचमनी मोटी एक
घंटा १, आरती पीतलनी १
धूप करवानुं पात्र १
दीपमाटे त्रांबानां कोडियां बे
रंगुलीपुरवानुं यंत्र पित्तलनुं

जनोइना जोटा दश
अक्षतपुञ्ज अथवा पूगीफल
उपर सूर्यादिनुंआवाहन करवुं
होयतोमूर्तिनांजरूर नथी पण
जोनवेग्रहोनी मूर्तिओस्थापवी
होय तो तेनी विगत--
सूर्यनी त्रांबानी, चंद्रनीरुपानी
मंगलनी त्रांबानी
बुधनी सोनानी

गुरुनीसोनानी शुक्रनी रुपानी
शनिनी लोढानी
राहुनी लोढानी
केतुनां कांसानी
अथवा शिसानी
ग्रह तथा ब्रह्माना स्थापनमाटे
सफेत मलमल वार बे
गणपती तथा मातृका स्थापन
माटे लाल कापड वार एक

समग्रग्रहोमाटेएकजवस्त्रतथा
उपवस्त्र अर्पण करवुं होयतो
मुकटो एक तथा
रेशमी कडको श्वेत एक
अथवा धोतीयुं एक
अने खेस एक
जो अनुकूलताहोयतो प्रत्येक
ग्रहोमाटे जुदाजुदारंगनांवस्त्रो
रेशमी कटकानी विगत--

सूयमाट लाल,चंद्रमाटे श्वेत,
मंगलमाटे लाल, बुध माटे
लीलुं,गुरुमाटे पीलुं,शुक्रमाटे
श्वत,शनिमाटे काळुं,राहुमाटे
लीलु, केतु माट वादळी,
स्थण्डिल वा कुण्डमाटे माटी
होममाटे घी सेर पांच
गायनु दूध सेर०।, गायनुं
दहींसेर०।,गायनुं घृतनवटांक

पञ्चगव्यनी विगत--
लालगायनुंमूत्रआठमासा
श्वेतगायनुंछाणशोलमासा
पीलीगायनुंदूधबारमासा
कालीगायनुंदहिंबारमासा
कालीगायनुंघृतआठमासा
जोजूदाजूदारंगवाली गायोनां
मूत्रादि मलवा असंभवहोय
तो यमे ते गायनां लेवां

१ ग्रहप्रतिमाधातवः--रविभौमौ ताम्रमयौ राजतौ सोमभार्गवौ । बुधजीवौ स्वर्णमयौ लौहौमन्दविधुन्तुदौ ॥ केतुः कांस्योथवा सीसः प्रतिमाधातवः स्मृताः॥ याज्ञवल्क्यः--ताम्रिकारत्नफटिकाद्रक्तचन्दनास्वर्णकाद्रुमौ । राजतादयसः सीसात् कांस्यात् कार्या ग्रहाः क्रमात्॥ स्ववर्णैर्वापरे लेख्या गन्धैर्मंडलकेषु वा॥ग्रहप्रतिमाकारः मात्स्ये--पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः। सप्ताश्वरथसंस्थोपि द्विभुजः स्यात्सदा रविः ॥ श्वेतः श्वेताम्बरधरो दशाश्वः श्वेतभूषणः । गदापाणिर्द्विबाहुश्च कर्तव्यो वरदः शशी ॥ रक्तमाल्याम्बरधरः शक्तिशूलगदाधरः। चतुर्भुखो मेषगमो वरदः स्यात्धरासुतः ॥ पीतमाल्याम्बरधरः कर्णिकारसमद्युतिः । खड्गचर्मगदापाणिः सिंहस्थो वरदो बुधः॥ देवदैत्यगुरूतद्वत्पीतश्वेतौ चतुर्भुजौ । दण्डिनौ वरदौ कार्यौ साक्षसूत्रौ कमण्डलु॥ इन्द्रनीलद्युतिः शूली वरदो गृध्रवाहनः । बाणबाणासनधरः कर्तव्योर्कसुतः सदा॥करालवदनः खड्गचर्मशूली वरप्रदः । नीलसिंहासनस्थश्च राहुश्चात्र प्रशस्यते॥धूम्राद्विबाहवः सर्वे गदिता विकृताननाः।गृध्रासनगता नित्यं केतवः स्युर्वरप्रदाः॥सर्वे किरीटिनः कार्या ग्रहा लोकहितावहाः।स्वाग्रुलेनोछ्रिताः सर्वे शतमष्टोत्तरावधि॥ ग्रहवस्त्राणि--यथावर्णं प्रदेयानि वासांसि कुसुमानि च । नवग्रहभ्यो देयानि सुगन्धसहितान्यपि॥ग्रहवर्णाः वसिष्ठः--भास्कराङ्गारकौ रक्तौ शुक्रौ शुक्रनिशाकरौ।बुधजीवौ सुवर्णाभौ कृष्णो राहुशनैश्चरौ॥केतवो धूम्रवर्णाश्च ग्रहवर्णाः प्रकीर्तिताः॥ २रुद्रकल्पद्रुमजपपरिच्छेदे--सुवर्णादिपात्रे पद्मपलाशादिपत्रे वा ताम्रायाः कृष्णायाः वा गोः पलमितस्याष्टमाषपरिमितस्य वा गोमूत्रस्य गायत्र्या ग्रहणम्॥गन्धद्वारामिति मन्त्रेण श्वेताया गोः अंगु घ्रार्धमितस्य षोडशमाषपरिमितस्य वा गोमयस्य ग्रहणम्॥आप्यायस्वेति ताम्रायाः हेमवर्णाया वा गोः सप्तपलस्य द्वादशमाषमितस्य वा गोमयाष्टस्य गोमूत्रत्रिगुणस्य वा क्षीरस्यादानम्॥ दधिक्राण्ण इति रक्तायाः कृष्णवर्णाया वा गोस्त्रिपलस्य दशमाषपरिमितस्य गोमयात्पञ्चगुणस्य गोमूत्राद्विगुणस्य वा

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

कुशनुं जल चारमासा	जंबीर एटलेएकजातनुं	माटिनां कोडियां बे	समिधनी विगत–	शमीनी समिध ८	नवग्रहो माटे
चोखापाली एक, घहुंशेर बे	लांबुंफल १	पञ्चपल्लवनी विगत–	आकडानी समिध ८	दूर्वाना जुडा २	पुष्पोनी विगत–
अडदशेर एक	जामफल २	पीपलानां पान ५	खाखरानी समिध १११	दर्भनो मोटो जुडो १	सूर्यमाटे जासुंद
सफेत कुष्माण्ड १	बिजोरुं १ केलांसांनेरी बार	उंबराना पान ५	खेरनी समिध ८	छुटां पुष्प टोपली एक नीचे	चन्द्रमाटे श्वेतकमल
लींलीद्राक्षसेर ०।	दाडिम ३ मोसंबि ३	पिपरीनां पान ५	अघाडानी समिध ८	मुजब–	भौमार्थे रक्तकणेर
शेरडी एकडो १	सफरचंद	तोरणमाटे आंबानांपान१००	पिपलानी समिध ८	गुलाब, मोगरो, जावेल,	बुधमाटे चम्पक
लींलो सोपारी एक	ऋतुप्रमाणेबीजं फलाएकएक	वडनां पान ६	उंबरानी समिध ८	कमल, चंपक, बकुल,	गुरुमाटे शतपत्रिका
नारंगी (संतरां) ३	केलना स्थंभ ४	नागरवेलनां पान २५		सेवति, कणेर, विगेरे	

दन्तोग्रहणम् ॥ तेजोसीतिमन्त्रेण कपिलाया वा गोरेकपलस्याष्टमासमितस्य वा गोमयचतुर्गुणस्य वाज्यस्य ग्रहणम् ॥ देवस्यत्वेत्यादिकेन पूष्णोहस्ताभ्यां गृह्णामीत्यन्तेन मन्त्रेण पलमितस्य चतुर्मासमितस्य वा कुशोदकस्य ग्रहणम् । गोमूत्रादिकापिलं वा ग्राह्यं अलाभेगव्यमात्रम् ॥ १ पञ्चपल्लवाः ब्राह्मे–अश्वत्थोदुम्बरप्लक्षचूतन्यग्रोधपल्लवाः । पञ्चभद्रा इति प्रोक्ताः सर्वकर्मसु शोभनाः॥ २ ग्रहसमिधः–अर्कः पालाशखदिरावपामार्गोथपिप्पलः । उदुम्बरः शमी दूर्वा कुशाश्च समिधः क्रमात् ॥ अलाभे तु प्रकर्तव्या सर्वेपालाशजाः शुभाः ॥ यस्य यस्य ग्रहस्य या या समित् सा सा तस्यतस्याधिदेवतानां प्रत्यधिदेवतानां चेति केचिदुक्तमस्ति तथापि कल्पद्रुमकारैस्तु अधिदेवताप्रत्यधिदेवतापञ्चलोकपालावास्तुक्षेत्रपालदिक्पालदेवतानां पालाशसमिद्भिरेव होम उक्तः तथैवानुसृतमस्माभिः ॥ अत्र समित्संख्या अष्टाष्टपक्षाश्रयेण यत्रान्यत्पक्षाश्रयेण होमः तत्र समित्संख्याप्यधिकाहेया ॥ सभिद्धोमसंख्या–ग्रहान्प्रत्येकं प्रतिद्रव्यं अष्टोत्तरशतमष्टाविंशतिरष्टौ वा आहुतीनां संख्या । यदाग्रहाणामष्टोत्तरशतं तदा अन्येभ्योऽष्टाविंशतिः । यदाग्रहाणामष्टाविंशतिस्तदाऽन्येभ्योऽष्टौ॥यदाग्रहाणामष्टौ तदाऽन्येभ्यश्चतस्रः द्वौ इति संप्रदायः॥वसिष्ठः–यदिग्रहाणामष्टौस्यादधिप्रत्यधिकेषु च । चतुश्चतुर्दुनेद्वंरम्बादीनां द्विद्विसंख्यया ॥ समिधां लक्षणम्-यज्ञपार्श्वे–समित्पविन्नं वेदश्च त्रयः प्रादेशसम्मिताः ॥ छन्दोगपरिशिष्टे कात्यायनः–नाङ्गुष्ठादधिका कार्या समित्स्थूलतरा क्वचित । नविद्युक्तत्वचा चैव न सकीटा न पाटिता ॥ प्रादेशान्नाधिका नोना न तथा वै द्विशाखिका । न सर्पणासमित्कार्या होमकर्मसु जानता ॥ स्मृत्यर्थसारे–सत्वचः समिधः कार्या ऋजुलक्षणाः समास्तथा । शस्ता दशाङ्गुलास्तास्तु द्वादशाङ्गुलिकास्तु वा । आर्द्राः पक्वाः समच्छेदास्तर्जन्यङ्गुलिवर्तुलाः अपाटिताश्चाद्विशाखाः कृमिदोषविवर्जिताः ॥ ईदृशोहोमयेत्प्राज्ञः प्राप्नोति विपुलां श्रियम् ॥ प्रागग्राः समिधो ग्राह्या अखर्वा नैव स्फाटिताः । काम्येषु वक्ष्यकर्मादौ विपरीता जिघांसतः ॥ विशीर्णा विफला हस्वा वक्राबहुशिखाः कृशाः । दीर्घाः स्थूलाश्चगेर्हाश्च कर्मसिद्धिविनाशकाः ॥ प्रादेशमात्राः समिध अशाखा अपलाशिनी । होतव्यामधुसर्पिर्भ्यां दध्ना क्षीरेणसंयुताः ॥ शङ्खः–समित्पुष्पकुशादीनि ब्राह्मणः स्वयमाहरेत् ॥ शूद्रानातैः क्रयक्रीतैः कर्मकुर्वन् व्रजत्यधः ॥ संस्काररत्नमालायाम्–यज्ञार्थं शूद्रादिभिराहृतानां दर्भसमिधादीनां पवमानानुवाकेन प्रोक्षणाच्छुद्धिः ॥

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2
Kirtikant Sharma Collection, Najafgarh

शुक्रमाटे जाई	वस्त्रीमाटे कापुस,	घोतीयां ५ खेस ५	खेरनां, डबल फोडेलां	पन माटे लाकडाना बाजठ२	मङ्गलमाटे कंसार
शनिमाटे मल्लिका	कांद्रिडुं वाकस	गौमुखी ५ मालारुद्राक्षनी ५	सरपण मण बे	यजमानादिने बेसवा पाटला	बुधमाटे क्षीर
राहुमाटे कुन्द	दडियापुडो१ पत्रावली पंदर	पंचपात्र ५ तरभाणी ५	वरुणीना ब्राह्मणो माटे सवा-	पाटलापर विछावा गालिचा	गुरुमाटे दध्योदन
केतुमाटे चित्रित पुष्प	वरुणीना विप्रो पांच अथवा	अर्घपात्र ५ आचमनी ५	रमां दूध. मण्डहे फलाहार	कंथल अथवा दर्भासनो.	शुक्रमाट घृतादन
तुलसीपत्र पैसा १ नां	सात श्रद्धाप्रमाणे, ते	टुवाल ५ आसन ५	तथा कर्मसमाप्तिये भोजन	ग्रहपरत्वेने घोनी विगत–	शनिमाटे तिलमाषामिश्रित
बिल्वपत्र पैसा १ नां	प्रत्येकमाटे वरुणसाहित्य–	स्रुक्, स्रुव. प्रणीता, प्रोक्षणी	अथवा सीधां, वांसनीभूंगळी	सूर्यमाटे गुडोदन	राहुमाट गुडोदन
पुष्पना हार १०		छाणां १२ तथा, होम माटे	ग्रह,मातृका तथा ब्रह्मनास्था	चन्द्रमाटे घृतपायस	केतुमाटे खीचडी

१ स्रुक्लक्षणं कात्यायनः–बाहुमात्र्यः स्रुचः पाणिमात्रपुष्करास्त्वग्निलाह २ समुखप्रसेका मूलदण्डा भवन्ति । त्रिः प्रादेशो बाहुः । प्रसृताङ्गुलिः पाणिरामणिबन्धनाद्धस्त उच्यते । तन्मात्रं पुष्करं भवतीत्यर्थः । कारिकायां तु–षड्भिश्चाङ्गुलदीर्घाश्रुक्कारयेत्खादिरादिभिः । कर्दमे गोपदाकारा पुष्करं तद्वदेवहि। पुष्कराग्रं षडंशं तु खातं द्वयङ्गुलविस्तृतम्॥ अङ्गुष्ठैकं स्थूलतरे दन्ते तस्य च कंकणम् । २ स्रुवमाह कात्यायनः–खादिरस्रुवः ॥ अरत्निमात्रस्रुवाङ्कुष्ठपर्ववृत्तपुष्करः ॥ यज्ञपार्श्वे–अङ्गुष्ठपर्ववृत्तश्चारत्निमात्रः स्रुवो भवेत् ॥ पुष्करार्द्धभवेत्खातं पिण्डकार्द्धं स्रुवस्तथा । पिण्डकार्द्धं मुष्टयर्द्धमित्यर्थः । ३ प्रणीतालक्षणं रेणुः–द्विषडंगुलदीर्घश्च तदर्द्धेन तु विस्तृतः । चतुरंगुलखातस्तु मूलदण्डो विकल्पितः ॥ प्रस्थमात्रोदकग्राही प्रणीता चमसो भवेत् ॥ चमसलक्षणं यज्ञपार्श्वे–चमसानां तु वक्ष्यामि दण्डाः स्युश्चतुरङ्गुलाः । त्र्यङ्गुलं तु भवेत्खातं विस्तारे चतुरङ्गुलम् ॥ विंशत्यङ्गुलदीर्घत्वमिति यज्ञविदो विदुः ॥ ४ प्रोक्षणीपात्रलक्षणम् ॥ रेणुः–वैकङ्कतं पाणिमात्रं प्रोक्षणीपात्रमुच्यते । हंसवक्त्रप्रसेकं च त्वग्विलं चतुरङ्गुलम् ॥ ग्रहनैवेद्यनिरूपणसारे–गुडौदनं रवेर्दद्यात्सोमाय घृतपायसम् अङ्गारकाय संयावं बुधाय क्षीरपाठिकम्॥दध्योदनं तु जीवाय शुक्राय च घृतौदनम्। शनैश्चराय कृसरमाजमांसं चराहवे ॥ चित्रौदनं तु केतुभ्यः ग्रहनैवेद्यमीरितम् ॥ ग्रहवेदीमाहमत्स्यपुराणे–गर्तस्योत्तरपूर्वेण वितस्तिद्वयविस्तृताम् । वप्रद्वययुतां वेदिं वितस्त्युच्छ्रायसंयुताम् ॥ स्थापनाय च देवानां चतुरस्रामुदक्प्लवाम् ॥ गर्तस्य कुण्डस्येत्यर्थः॥ उत्तरपूर्वेण ईशानभागेइत्यर्थः॥ वप्रद्वयं नाममेखलाद्वयं तत्र द्वयङ्गुलोच्छ्रायः प्रथमवप्रः त्र्यङ्गुलोच्छ्रायो द्वितीयवप्रः विस्तारस्तुद्वयोरप्यङ्गुलपरिमितः॥ अत्र प्रकारान्तरं वसिष्ठः–कुण्डस्यरुद्रदिग्भागे द्विहस्तपीठमाचरेत् । किंचिन्मध्योन्नतं कुर्यादुच्छ्राये द्वादशाङ्गुलम् ॥ त्रिंशाङ्गुलं प्रकर्तव्यं ह्यन्तरं कुण्डपीठयोः । वस्त्रेणाच्छादयेत्पीठं तत्प्रमाणेन धीमता ॥ तत्र चाष्टदलं पद्मं कुर्याच्छुष्टैः सिताक्षतैः ॥

CC-0. Indira Gandhi Rashtriya Manav Sangrahalaya. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

Kirtikant Sharma Collection, Najafgarh

॥ अथ ग्रहशान्त[illegible]गिपरिभाषा ॥ (शान्तये हितं शान्तिकम्) शान्तिकलक्षणम्—अस्पष्टपापनिदानकैहिकमात्रानिष्टनिवर्तकपापप्रयोजकं वैधं कर्म शान्तिकम्। क्षयादिहरदान[illegible] वारयितुं निदानकान्तम्। आमुष्मिकानिष्टनिवारके तं वारयितुमैहिकेति। प्रायश्चित्तं वारयितुं मात्रपदम्। प्रायश्चित्तं त्वामुष्मिकानिष्टनिवर्तकमपि। [illegible]भिचारादौ वारयितुं पापाप्रयोजकम्। तयोः फलतो हिंसात्वेन तदनुष्ठाने प्रायश्चित्तोक्तेश्च पापप्रयोजकत्वात्। अनिष्टनिवर्तकत्वं च शान्तिकस्य॥ (पुष्ट्यै हितं पौष्टिकम्) पौष्टिकलक्षणम्—अस्पष्टपापनिदानपापनाशरूपसामग्र्याविषटकत्वेन पुष्टिफलकं वैधं कर्म पौष्टिकम्॥ शान्त्यादौ ग्रहमखस्यावश्यकता याज्ञवल्क्य[illegible]—शान्त्यादौ विनायकं पूज्य ग्रहौघमैव विशेषतः। कर्मणां फलमाप्नोति श्रियं प्राप्नोत्यनुत्तमाम्॥ मात्स्ये—विवाहांत्सवयज्ञेषु प्रतिष्ठादिषु कर्मसु। नववेश्मप्रवेशे च [illegible] प्रथमार्तवे॥ नवग्रहमखं कृत्वा ततः कर्म समारभेत्॥ स्थण्डिलाभ्युक्षणम्॥ स्मार्तवैद्यनाथः—उत्तानेन तु हस्तेन प्रोक्षणं समुदाहृतम्। तिरश्चावोक्षणं [illegible]भ्युक्षणं स्मृतम्॥ अग्निप्रणयनम्—शुभं पात्रं तु कांस्यस्य तेनाग्निं प्रणयेद्बुधः। तस्याभावे शरावेण नवेनाभिमुखेन तम्॥ परिसमुह्नम्—पांसूनामपकारिकाकारः—एकेन दर्भेण वारत्रयम्॥ अन्ये तु त्रिभिर्दर्भैर्वारत्रयम्॥ तच्च प्राक्संस्थं उदक्संस्थं वा कार्यम्॥ पांसवपसारणयोर्यैर्दर्भादिभिर्यावत्पांसवपसारणं [illegible] तावत्कार्यमिति केचित्॥ वरलक्षणम्॥ रेणुः—वरोऽभिलषितं द्रव्यं सारभूतं तदुच्यते॥ स्रुवधारणप्रकारः॥ सङ्गहे—अग्रमध्याच्च यन्मध्यं मूलमध्याच्च [illegible]तः॥ स्रुवं धारयते विद्वान् होमकार्येषु सर्वदा॥ चरुलक्षणम्॥ कात्यायनः—स्वशाखोक्तेन सुस्विन्नो ह्यदग्धः कठिनः शुभः। न चातिशिथिलः पाच्यो न वीतरसो (श्लेष्मितमण्डः) भवेत्॥ हविर्लक्षणम्॥ कात्यायनः—व्रीहीन्यवान्वा हविषि प्रतीयाद्यज्ञकर्मसु॥ आज्यलक्षणम्—कात्यायनः—घृतमाज्ये लिङ्गादिति। तच्च गव्यमेव। महीनां पयोसीति मन्त्रलिङ्गात्। तदभावे प्रतिनिधिमाह मण्डनः—गव्याज्याभावतश्छागीमहिष्यादेर्घृतं क्रमात्। तदभावे गव्यादीनां क्रमात्क्षीरं विधीयते। तदभावे दधि प्राह्यमलाभे तैलमिष्यते॥ सम्मार्गकुशानां उपयमनकुशानां च लक्षणम्॥ ग्रहयज्ञकल्पवल्ल्याम्—स्रुवसम्मार्जनार्थाय पञ्च वाथ त्रयोऽपि वा। प्रादेशमात्रान् गृह्णीयात्सम्मार्गकुशसंज्ञकान्। उपयमनकुशाः सप्त पञ्च वाथ त्रयोऽपि वा॥

अथ ग्रहशान्तिप्रयोगानुक्रमः—गणेशं पूजयेदादौ स्वस्तिपुण्याहवाचनम्। मातृणां पूजनं कार्यं नान्दीश्राद्धमतः परम्॥ आचार्यं वरयित्वाथ ब्रह्माणं गाणपत्यकम्। सादस्यं ऋत्विजश्चैव जापकान्वरयेत्ततः॥ दिग्रक्षणं ततः कार्यं पञ्चगव्यं यथाविधि। भूमिं सम्पूज्य विधिवत्तत्र संस्कारपञ्चकम्॥ स्थण्डिलेऽग्निं प्रतिष्ठाप्य ध्यायेत्तं मुखपूर्वकम्। मूर्यन्युत्तारणं प्राणप्रतिष्ठास्थापनार्चनम्॥ ग्रहादीन्स्थापयित्वाथ स्थापयेद्रुद्रकुम्भकम्। अन्वाधानं ततः कृत्वा कारयेत्कुशकण्डिकाम्॥ लिङ्गोक्तैर्नाममन्त्रैर्वा यथाविध्युक्तसंख्यया। ग्रहहोमं ततः कुर्याद्वराहुतिपुरःसरम्॥ पूजा स्विष्टं नवाहुत्यो बलिः पूर्णाहुतिस्तथा। स्रुवाशादिविमोकान्तं होमशेषं समापयेत्॥ श्रेयःसम्पादनं पश्चादभिषेको विसर्जनम्। विप्राशिषः प्रगृह्णीयात्तान्मिष्टान्नेन भोजयेत्॥

Kirtikant Sharma Collection, Najafgarh
CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

इति शुक्लयजुर्वेदीयग्रहशान्तिप्रयोगः समाप्तः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-

Kirtikant Sharma Collection, Najafgarh